[सम्बोधनम्]

2.3.2 सम्बोधनप्रथमा-एकवचनम्

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

पुत्र ! पिब

पुत्र ! चल

गोविन्द ! पठ

मोहन ! लिख

पुत्र ! खाद

मदन ! मा वद

पुत्र ! शृणु

पुत्र ! आगच्छ।

बालिके ! पिब ।

लते ! आगच्छ ।

पुत्रि ! लिख ।

गौरि ! उत्तिष्ठ ।

उदाहरणानुगुणं सम्बोधनरूपाणि लिखन्तु–

[उदाहरणों के अनुसार सम्बोधन के रूपों को लिखिए। Write the vocative form of the words given in nominative case.]

प्रथमा	सम्बोधनप्रथमा
उदा0–रामः	राम !
बालकः	बालक !
पुत्रः	.....
कृष्णः	.....
भरतः	.....
भिक्षुकः	.....

गिरीशः	.....
भास्करः	.....
विवेकः	.....
सीता	..सीते..!...
रमा	.....
सुशीला	.....
भगिनी	..भगिनि..!..

स्त्रीलिङ्गे–

2.3.2 (क) एकवचनम्

'आ' कारान्ताः		'ई' कारान्ताः	
प्रथमा	सम्बोधनप्रथमा	प्रथमा	सम्बोधनप्रथमा
रमा	..रमे..!.....	गौरी	..गौरि..!....
सुधा	.....	पार्वती	.....
गीता	.....	सरस्वती	.....
बालिका	.....	सुमती	.....
ललिता	.....	भगिनी	.....
सुनीता	.....	देवी	.....
गिरिजा	.....	नलिनी	.....
अध्यापिका	.....	शालिनी	.....
वसुन्धरा	.....	कावेरी	.....
ममता	.....	नन्दिनी	.....

नपुंसकलिङ्गे–

प्रथमा	सम्बोधनप्रथमा
मित्रम्	मित्र !

सम्यक् स्मरन्तु –

[ध्यान से स्मरण कीजिए। Learn carefully.]

प्रथमा	सम्बोधनप्रथमा
अम्बा	अम्ब !

अभ्यासः – 113

सम्बोधन-प्रथमा-एकवचनस्य प्रयोगाः

कोष्ठे प्रदत्तस्य शब्दस्य सम्बोधनरूपेण रिक्तस्थानानि पूरयन्तु–

[कोष्ठ में दिए गए शब्दों के सम्बोधन रूप का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks by using the Vocative form of the words given in the brackets.]

1. ..उषे..!.. त्वम् आगच्छ। (उंषा)
2. ..... त्वं पाठं पठ। (पुत्री)
3. ..... त्वं कोलाहलं न कुरु। (बालकः)
4. ..... त्वं गृहपाठं लिख। (पुत्रः)
5. ..... भवती भोजनं यच्छतु। (अम्बा)
6. ..... त्वं क्षीरं पिब। (कृष्णः)
7. ..... किं पानीयं स्वीकरोति ? (मित्रम्)
8. ..... भवती सङ्कोचं मा अनुभवतु। (सखी)
9. ..... त्वं शीघ्रम् उत्तिष्ठ। (वत्सः)
10. ..... भवान् हस्तं प्रक्षालयतु। (महोदयः)
11. ..... भवान् आसन्दम् अलङ्करोतु। (अध्यक्षमहोदयः)
12. ..... भवान् कृपां प्रदर्शयतु। (देवः)
13. ..... त्वं घटीं पश्य। (बालकः)
14. ..... भवती भोजनं परिवेषयतु। (भगिनी)
15. ..... त्वं कुत्र गच्छसि ? (बालिका)
16. ..... त्वं किं खादसि ? (गणेशः)
17. ..... त्वं श्लोकं वद। (गीता)
18. ..... त्वं कार्यं कुरु। (ललिता)
19. ..... त्वं मा हस। (मूर्खः)
20. ..... त्वम् उत्तरं वद। (शिष्यः)
21. ..... त्वं लेखनीं यच्छ। (गौरी)
22. ..... भवान् समाधानं वदतु। (अध्यापकः)
23. ..... त्वं मा धाव। (पुत्रः)
24. ..... भवान् फलं स्वीकरोतु। (महोदयः)
25. ..... त्वं जलम् आनय। (शारदा)

2.3.2 (ख) सम्बोधनप्रथमा त्रिषु वचनेषु

उदाहरणानुसारं सम्बोधनरूपाणि लिखन्तु–

[उदाहरणों के अनुसार सम्बोधन के रूपों को लिखिए। Write down the forms of Vocative case as shown in the examples.]

	प्रथमा				सम्बोधनम्		
पुंल्लिङ्गे:–							
उदा0–	बालकः,	बालकौ,	बालकाः	→	बालक,	बालकौ,	बालकाः
1.	छात्रः,	छात्रौ,	छात्राः	1.	.....	.....	.....
2.	शिक्षकः,	शिक्षकौ,	शिक्षकाः	2.	.....	.....	.....
3.	सेवकः,	सेवकौ,	सेवकाः	3.	.....	.....	.....
4.	शिष्यः,	शिष्यौ,	शिष्याः	4.	.....	.....	.....
स्त्रीलिङ्गे–							
उदा0–	बालिका,	बालिके,	बालिकाः	→	बालिके,	बालिके,	बालिकाः
5.	महिला,	महिले,	महिलाः	5.	.....	.....	.....
6.	शिक्षिका,	शिक्षिके,	शिक्षिकाः	6.	.....	.....	.....
7.	छात्रा,	छात्रे,	छात्राः	7.	.....	.....	.....
8.	गायिका,	गायिके,	गायिकाः	8.	.....	.....	.....
उदा0–	भगिनी,	भगिन्यौ,	भगिन्यः	→	भगिनि,	भगिन्यौ,	भगिन्यः
9.	देवी,	देव्यौ,	देव्यः	9.	.....	.....	.....
10.	नर्तकी,	नर्तक्यौ,	नर्तक्यः	10.	.....	.....	.....
11.	पुत्री,	पुत्र्यौ,	पुत्र्यः	11.	.....	.....	.....
12.	जनत्री,	जनन्यौ,	जनन्यः	12.	.....	.....	.....
नपुंसकलिङ्गे–							
उदा0–	मित्रम्	मित्रे,	मित्राणि	→	मित्र,	मित्रे,	मित्राणि

अभ्यासः – 114

2.3.2.2 सम्बोधनप्रथमायाः मिश्रिताः प्रयोगाः

उदाहरणानुगुणं यथोचितं सम्बोधनरूपैः वाक्यानि पूरयन्तु –

[उदाहरणों के अनुसार सम्बोधन के रूपों से वाक्यों को पूरा कीजिए। Complete the following sentences with appropriate Vocative forms as shown in the examples.]

द्विवचने

उदा0– 1. .....पुत्रौ.... ! युवां पठतम्। (पुत्र)

2. ..... ! युवां पाठं लिखतम्। (शिष्य)

3. ..... ! युवां श्लोकं वदतम्। (बालिका)

4. ..... ! भवन्तौ उपविशताम्। (महोदय)

5. ..... ! युवां खादतम्। (वत्सा)

बहुवचने

उदा0– 1. अध्यापिकाः..... ! भवत्यः पाठयन्तु। (अध्यापिका)

2. ..... ! यूयं मा क्रीडथ। (छात्र)

3. ..... ! यूयं गृहपाठं लिखथ। (बालिका)

4. ..... ! भवत्यः आगच्छन्तु। (भगिनी)

5. ..... ! भवन्तः चित्रं पश्यन्तु। (जन)

2.3.2 (ग) अद्य/ह्यः/परह्यः/प्रपरह्यः
श्वः/परश्वः/प्रपरश्वः

12.2.2001

प्रपरह्यः - द्वादशदिनाङ्कः
प्रपरह्यः - त्रयोदशी तिथिः
प्रपरह्यः - बुधवासरः
प्रपरह्यः - अहं गृहे आसम्
प्रपरह्यः - भवान्/भवती कुत्र अगच्छत्?

13.12.2001

परह्यः - त्रयोदशदिनाङ्कः
परह्यः - चतुर्दशी तिथिः
परह्यः - गुरुवासरः
परह्यः - अहं कार्यालयं प्रविष्टवान् ।
परह्यः - अहं लेखनकार्यं सम्पादितवान् ।

14.12.2001

ह्यः - चतुर्दशदिनाङ्कः
ह्यः - अमावस्या तिथिः
ह्यः - शुक्रवासरः
ह्यः - रात्रौ गाढान्धकारः आसीत् ।
ह्यः - रात्रौ मम गृहे विद्युत् नासीत् ।

15.12.2001

अद्य - मार्गशीर्षशुक्लपक्षस्यारम्भः
अद्य - सर्वकारीयकार्यालयेषु अवकाशः
अद्य - पञ्चदशदिनाङ्कः
अद्य - शनिवासरः

16.12.2001

श्वः - षोडशदिनाङ्कः
श्वः - अपि सर्वत्र अवकाशः
श्वः - रविवासरः
श्वः - द्वितीया तिथिः

17.12.2001

परश्वः - सप्तदशदिनाङ्कः
परश्वः - तृतीया तिथिः
परश्वः - सोमवासरः
परश्वः - ईद–उल्फितर उत्सवः
परश्वः - कार्यालयेषु अवकाशः भविष्यति ।

18.12.2001

प्रपरश्वः - अष्टादशदिनाङ्कः
प्रपरश्वः - चतुर्थी तिथिः
प्रपरश्वः - मङ्गलवासरः
प्रपरश्वः - सर्वे कार्यालयान् गमिष्यन्ति । कार्याणि करिष्यन्ति ।
प्रपरश्वः - मम जन्मदिवसः
प्रपरश्वः - भवान्/भवती अवश्यम् मम गृहम् आगच्छतु ।

तृतीयः स्तबकः

3.1 प्रथमः पाठः

[भूतकालः (लङ्)]

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

3.1.1 आसीत्

बुद्धः

बुद्धः पूर्वं राजकुमारः आसीत्।

वृद्धः

वृद्धः पूर्वं युवकः आसीत्।

वृक्षः



वृक्षः पूर्वम् अङ्कुरः आसीत्।

अग्रे लिखितं पठन्तु–

[निम्नलिखित को पढ़िए। Please read the following.]

अद्य 23–दिनाङ्कः गुरुवासरः च अस्ति।

ह्यः 22–दिनाङ्कः बुधवासरः च आसीत्।

3.1.1+ अस् / भू

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]



वृद्धः चिन्तयति।

रिक्तस्थानानि पूरयन्तु–
[रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks.]

1. अद्य रविवासरः अस्ति। ह्यः शनिवासरः आसीत्।
2. अद्य शनिवासरः अस्ति। ह्यः शुक्रवासरः .....।
3. अद्य शुक्रवासरः अस्ति। ह्यः ....।
4. अद्य गुरुवासरः अस्ति। ..... बुधवासरः .....।
5. अद्य बुधवासरः अस्ति। ह्यः ....।
6. अद्य मङ्गलवासरः अस्ति। ..... सोमवासरः .....।
7. अद्य सोमवासरः अस्ति। ह्यः ....।

अभ्यासः – 115

अस्ति / आसीत्

यथोचितं क्रियापदरूपं लिखन्तु –
[सही क्रियापद लिखिए। Write the correct form of the verbs.]

उदा०– 1. अङ्कुरः अधुना वृक्षः .....अस्ति.....।
2. युवकः पूर्वं बालकः .....आसीत्.....।
3. वाल्मीकिः पूर्वं व्याधः .....।
4. गङ्गानदी भारतदेशे .....।
5. सुभाषचन्द्रबोसः देशभक्तः .....।
6. विश्वनाथमन्दिरं वाराणस्याम् .....।
7. पुष्पं पूर्वं कलिका .....।
8. विवेकानन्दस्य नाम नरेन्द्रः इति.....।
9. बालकः इदानीं तरुणः .....।
10. वाराणसी उत्तरप्रदेशे .....।

3.1.2 आसीत्, आस्ताम्, आसन्

उदाहरणानुगुणं भूतकालरूपाणि लिखन्तु–

[उदाहरणों के अनुसार भूतकाल के रूपों को लिखिए। Write down the forms (Rupas) of Past Tense as shown in the examples.]

	अधुना अस्ति।	पूर्वम् आसीत्।
उदा0– 1.	वृक्षः अस्ति।	अङ्कुरः ....आसीत्... ।
2.	वृद्धः अस्ति।	युवकः ..... ।
3.	दरिद्रः अस्ति।	धनिकः ..... ।
4.	पण्डितः अस्ति।	मन्दः ..... ।
5.	शान्तः अस्ति।	क्रूरः ..... ।
6.	कृशः अस्ति।	स्थूलः ..... ।

	अधुना स्तः।	पूर्वम् आस्ताम्
उदा0– 7.	वृद्धौ स्तः।	बालकौ ...आस्ताम्... ।
8.	धनिकौ स्तः।	दरिद्रौ ..... ।
9.	स्थूलौ स्तः।	कृशौ ..... ।
10.	क्रूरौ स्तः।	शान्तौ ..... ।
11.	दुर्जनौ स्तः।	सज्जनौ ..... ।
12.	सुन्दरौ स्तः।	कुरूपौ ..... ।

	अधुना सन्ति।	पूर्वम् आसन्।
उदा0– 13.	श्वेतकेशाः सन्ति।	कृष्णकेशाः आसन्।
14.	दन्ताः न सन्ति।	दन्ताः ...आसन्.... ।
15.	फलानि पक्वानि सन्ति।	फलानि अपक्वानि ..... ।
16.	नायकाः सन्ति।	नृपाः ..... ।
17.	यानानि सन्ति।	शकटाः ..... ।
18.	राज्यानि 28 सन्ति।	राज्यानि 25 ..... ।

3.1.3 आसीः, आस्तम्, आस्त

उदाहरणानुगुणं भूतकालिकरूपैः वाक्यानि पूरयन्तु–
[उदाहरणों के अनुसार भूतकाल के रूपों से वाक्यों को पूरा कीजिए। Complete the following sentences with the forms of verbs in past tense.]

अधुना त्वं ..... असि।	पूर्वं त्वं ..... आसीः।
उदा0– 1. त्वं नवमकक्ष्यायाम् असि।	त्वम् अष्टमकक्ष्यायाम् आसीः।
2. त्वं चतुरः असि।	त्वं मूर्खः ....आसीः.... ।
3. त्वं प्रवीणः असि।	त्वं मन्दः ..... ।
4. त्वं कृशः असि।	त्वं स्थूलः ..... ।
5. त्वं भारते असि।	त्वं विदेशे ..... ।

अधुना युवां ..... स्थः।	पूर्वं युवां ..... आस्तम्।
उदा0– 6. युवां स्वस्थौ स्थः।	युवां रुग्णौ ....आस्तम्.. ।
7. युवां मूर्खौ स्थः।	युवां पण्डितौ ..... ।
8. युवां सबलौ स्थः।	युवां दुर्बलौ ..... ।
9. युवां धीरौ स्थः।	युवां भीतौ ..... ।
10. युवां युवकौ स्थः।	युवां बालौ ..... ।

अधुना यूयं ..... स्थ।	पूर्वं यूयं ..... आस्त।
उदा0– 11. यूयम् अध्यापकाः स्थ।	यूयं छात्राः आस्त।
12. यूयं सरलाः स्थ।	यूयम् उद्दण्डाः ..... ।
13. यूयम् आचार्याः स्थ।	यूयं शिक्षकाः ..... ।
14. यूयं बालकाः स्थ।	यूयं शिशवः ..... ।
15. यूयं देहलीनगरे स्थ।	यूयं वाराणसीनगरे ..... ।

3.1.4 आसम्, आस्व, आस्म

उदाहरणानुगुणं भूतकालरूपैः वाक्यानि पूरयन्तु–
[उदाहरणों के अनुसार भूतकाल के रूपों से वाक्यों को पूरा कीजिए। Complete the following sentences with the verbs in past tense.]

अधुना अहं ..... अस्मि।	पूर्वम् अहं ..... आसम्।
उदा0– 1. अहं वृद्धः अस्मि।	अहं तरुणः ...आसम्.... ।
2. अहं विशेषज्ञः अस्मि।	अहम् अल्पज्ञः ..... ।
3. अहं राष्ट्रनायकः अस्मि।	अहं ग्रामनायकः ..... ।
4. अहम् अलसः अस्मि।	अहम् उद्यमशीलः ..... ।
5. अहं गृहस्थः अस्मि।	अहं छात्रः ..... ।

अधुना आवां ..... स्वः।	पूर्वम् आवां ..... आस्व।
उदा0– 6. आवां सुदृढौ स्वः।	आवां शिथिलौ ...आस्व.... ।
7. आवां सैनिकौ स्वः।	आवां कृषकौ ..... ।
8. आवां मित्रे स्वः।	आवाम् अपरिचितौ ..... ।
9. आवां देवभक्तौ स्वः।	आवां नास्तिकौ ..... ।
10. आवां सज्जनौ स्वः।	आवां दुष्टौ ..... ।

अधुना वयं ..... स्मः।	पूर्वं वयं ..... आस्म।
उदा0– 11. वयं धनिकाः स्मः।	वयं दरिद्राः ...आस्म.... ।
12. वयं शिक्षिताः स्मः।	वयं मूर्खाः ..... ।
13. वयं नागरिकाः स्मः।	वयं ग्रामीणाः ..... ।
14. वयं प्राध्यापकाः स्मः।	वयं शिक्षकाः ..... ।
15. वयं संस्कृतज्ञाः स्मः।	वयं वैज्ञानिकाः ..... ।

अभ्यासः – 116

उदाहरणानुगुणं यथोचितं संयोजनं कृत्वा वाक्यानि लिखन्तु–

[उदाहरण के अनुसार उचित संयोजन कर वाक्यों को लिखिए। Frame sentences by arranging the words in proper order.]

(अधुना)	पूर्वम्
1. वृक्षः	3. पूर्वं कुटीरम्
2. भवती महिला	4. पूर्वं दरिद्रः
3. भवनम्	2. पूर्वं बालिका
4. त्वं धनिकः	1. पूर्वम् अङ्कुरः
5. सा कोमला	13. पूर्वं मन्दौ
6. त्वं कुपितः	12. पूर्वं स्वार्थपराः
7. एतौ कुरूपौ	11. पूर्वं दरिद्रौ
8. त्वं मित्रम्	10. पूर्वं दुष्टाः
9. अहम् अध्यापकः	8. पूर्वम् अपरिचितः
10. वयं सज्जनाः	9. पूर्वं छात्रः
11. युवां धनिकौ	7. पूर्वं सुन्दरौ
12. यूयं सेवापराः	6. पूर्वं शान्तः
13. आवां चतुरौ	5. पूर्वं कठोरा

आसीत्	*आस्ताम्*	*आसन्*
आसीः	*आस्तम्*	*आस्त*
आसम्	*आस्व*	*आस्म*

उदा0–1. ...वृक्षः... ...पूर्वम्... ...अङ्कुरः... ...आसीत्..।

2. ....।

3. ....।

4. ....।

5. ....।

6. ....।

7. ....।

8. ....।

9. ....।

10. ....।

11. ....।

12. ....।

13. ....।

3.1.5 भूतकाले विविधक्रियापदानि

ध्यानेन पठन्तु–

[ध्यान से पढिए Please read carefully.]

जन्तुशाला

1. जन्तुशालायां मयूरः आसीत् । सः अनृत्यत् ।
2. जन्तुशालायां सिंहः आसीत् । सः अगर्जत् ।
3. जन्तुशालायां वानरः आसीत् । सः आरोहत् ।
4. जन्तुशालायां हरिणः आसीत् । सः अधावत् ।
5. जन्तुशालायाम् अश्वः आसीत् । सः अखादत् ।

अभ्यासः – 117

वर्त्तमानकालिकरूपात् भूतकालिके रूपे परिवर्त्तनम्

उदाहरणानुगुणं भूतकालरूपाणि लिखन्तु–

[उदाहरणों के अनुसार भूतकाल के रूपों को लिखिए। Write the forms of verbs in past tense.]

	वर्तमाने	भूते
उदा०–	1. खादति	अखादत्
	2. वदति	अवदत्
	3. चलति	.....
	4. हसति	.....
	5. नयति	.....
	6. क्रीडति	.....
	7. पश्यति	.....
	8. हरति	.....
	9. मिलति	.....
	10. पिबति	.....
	11. स्मरति	.....
	12. त्यजति	.....
	13. भवति	.....
	14. तिष्ठति	.....

वर्तमाने	भूते
15. रचयति	.....
16. पतति	.....
17. वसति	.....
18. पचति	.....
19. पठति	.....
20. नृत्यति	.....
21. वसति	.....
22. गायति	.....
23. स्थापयति	.....
24. मारयति	.....
25. ताडयति	.....
26. पाठयति	.....
27. दर्शयति	.....
28. चिन्तयति	.....
29. सूचयति	.....
30. चोरयति	.....
31. योजयति	.....

अभ्यासः – 118

वर्त्तमानकालिकवाक्यानां भूतकाले परिवर्त्तनम्

उदाहरणानुसारं भूतकालवाक्यानि लिखन्तु–

[उदाहरणों के अनुसार भूतकाल के वाक्यों को लिखिए। Convert the following sentences from present tense into past tense.]

	वर्तमाने	भूते		
उदा0–	1. बालकः पुस्तकं पठति।	बालकः	पुस्तकम्	अपठत्।
	2. बालिका पत्रं लिखति।	बालिका	पत्रम्	अलिखत्।
	3. भवान् श्लोकं वदति।	.....	.....	.....।
	4. सा फलरसं पिबति।	.....	.....	.....।
	5. एषः घटीं पश्यति।	.....	.....	.....।
	6. अध्यापकः पाठं पाठयति।	.....	.....	.....।
	7. माता शाकं कर्त्तयति।	.....	.....	.....।
	8. सः कार्यालयं गच्छति।	.....	.....	.....।
	9. भक्तः देवान् नमति।	.....	.....	.....।
	10. पुष्पं शुष्यति।	.....	.....।	
	11. सेवकः लताः सिञ्चति।	.....	.....	.....।
	12. आरक्षकः चोरं ताडयति।	.....	.....	.....।
	13. फलम् अत्र पतति।	.....	.....	.....।

	वर्तमाने	भूते
14. निर्वाहकः यात्रापत्रं यच्छति।	.....	..... ।
15. खलः सज्जनान् निन्दति।	.....	..... ।
16. आपणिकः पदार्थान् यच्छति।	.....	..... ।
17. छात्रः उत्तराणि स्मरति।	.....	..... ।
18. सा जलं नयति।	.....	..... ।
19. कर्मकरः स्वच्छतां करोति।	.....	..... ।
20. सेविका गृहं मार्जयति।	.....	..... ।
21. पिता वस्त्राणि धरति।	.....	..... ।
22. चालकः वाहनं चालयति।	.....	..... ।
23. व्यजनं भ्रमति।	.....	..... ।
24. एषा स्यूतं स्थापयति।	.....	..... ।
25. क्रीडापटुः क्रीडति।	.....	..... ।
26. कुक्कुरः भषति।	.....	..... ।
27. वैद्यः औषधं यच्छति।	.....	..... ।
28. महिला पुष्पाणि चिनोति।	.....	..... ।
29. गायिका गीतं गायति।	.....	..... ।
30. नर्तकी नृत्यति।	.....	..... ।

अभ्यासः – 119

भूतकाले रूपाणि (लङि)

उदाहरणानुसारं भूतकालस्य एकवचन–द्विवचन–बहुवचनरूपाणि लिखन्तु–
[उदाहरणों के अनुसार भूतकाल के एकवचन, द्विवचन और बहुवचन के रूपों को लिखिए।
Conjugate the following roots in past tense in all the three numbers.]

प्रथम–पुरुषे

उदा०–	1. पठ्	अपठत्	अपठताम्	अपठन्
	2. पिब्	अपिबत्	अपिबताम्	अपिबन्
	3. लिख्	.....	.....	.....
	4. पश्य्	.....	.....	.....
	5. नय्	.....	.....	.....
	6. गच्छ्	.....	.....	.....
	7. पृच्छ्	.....	.....	.....
	8. सूचय्	.....	.....	.....
	9. गणय्	.....	.....	.....
	10. वद्	.....	.....	.....
	11. याच्	.....	.....	.....
	12. चल्	.....	.....	.....
	13. यच्छ्	.....	.....	.....
	14. क्षालय्	.....	.....	.....
	15. भव्	.....	.....	.....

मध्यम—पुरुषे

उदा०—	16. पठ्	....अपठः.....	....अपठतम्.....	....अपठत.....
	17. पिब्	अपिबः	अपिबतम्	अपिबत .....
	18. लिख्	.....	.....	.....
	19. पश्य्	.....	.....	.....
	20. नय्	.....	.....	.....
	21. गच्छ्	.....	.....	.....
	22. सूचय्	.....	.....	.....
	23. पृच्छ्	.....	.....	.....
	24. गणय्	.....	.....	.....
	25. वद्	.....	.....	.....
	26. याच्	.....	.....	.....
	27. चल्	.....	.....	.....
	28. यच्छ्	.....	.....	.....
	29. क्षालय्	.....	.....	.....
	30. भव्	.....	.....	.....

उत्तम–पुरुषे

31.	पठ्	..अपठम्.....	....अपठाव.....	....अपठाम.....
32.	पिब्	..अपिबम्.....	....अपिबाव.....	....अपिबाम.....
33.	भव्	.....	.....	.....
34.	यच्छ्	.....	.....	.....
35.	याच्	.....	.....	.....
36.	वद्	.....	.....	.....
37.	गणय्	.....	.....	.....
38.	सूचय्	.....	.....	.....
39.	पृच्छ्	.....	.....	.....
40.	गच्छ्	.....	.....	.....
41.	नय्	.....	.....	.....
42.	पश्य्	.....	.....	.....
43.	हस्	.....	.....	.....
44.	तिष्ठ्	.....	.....	.....
45.	स्मर्	.....	.....	.....

अभ्यासः – 120

त्रिषु वचनेषु भूतकाले रूपाणि

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as per the example.]

	एकवचनम्	द्विवचनम्	बहुवचनम्
उदा0–1.	....अपठत्.....	....अपठताम्....	....अपठन्.....
2.	.....	....अलिखाव....	.....
3.	.....	.....	....अमिलन्.....
4.	.....अपश्यम्....	.....	.....
5.	.....	....अक्रीडतम्....	.....
6.	.....	.....	....अनयन्.....
7.	.....अवदः.....	.....	.....
8.	.....	..अस्थापयतम्...	.....
9.	.....	.....	....अचलाम.....
10.	.....अनिन्दम्....	.....	.....
11.	.....	..अगच्छतम्.....	.....
12.	.....	.....	....अचोरयन्....
13.	.....अशुष्यत्....	.....	.....
14.	.....अखादः.....	.....	.....
15.	.....अपिबम्....	.....	.....
16.	.....	...अनिन्दताम्....	.....
17.	.....	....अनिन्दाव....	.....
18.	.....	...अगायतम्.....	.....

19.	.....	.....	.....अभ्रमन्.....
20.	.....	.....	.....अनयाम.....
21.	.....	.....	....अताडयत....
22.	.....	.....	.....अजिघ्रन्.....
23.	.....	....अपठाव.....	.....
24.	.....	...अचालयतम्....	.....
25.	.....	.....	....अत्यजन्.....
26.	.....	...अस्मरताम्....	.....
27.	.....अरटम्.....	.....	.....
28.	.....अधावः.....	.....	.....
29.	.....	....अक्रीडाव.....	.....
30.	.....	.....	.....अकुर्वन्.....

अभ्यासः – 121

गम्–धातोः भूतकाले प्रयोगाः

रिक्तस्थानानि उचितक्रियापदैः पूरयन्तु–

[उचित क्रियापदों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable verbs.]

अगच्छत्	अगच्छताम्	अगच्छन्
अगच्छः	अगच्छतम्	अगच्छत
अगच्छम्	अगच्छाव	अगच्छाम

उदा०– 1. सः ह्यः विद्यालयं न ...अगच्छत्.... ।

2. एतौ छात्रौ ह्यः भ्रमणाय नगरम् ..... ।

3. ताः बालिकाः अपि परह्यः भ्रमणाय मुम्बईनगरीम् ..... ।

4. किं त्वम् अपि ह्यः कुत्रचित् ..... ?

5. अहं तु गृहे एव आसम्, कुत्रचिद् अपि न ..... ।

6. युवां कुत्र ..... ?

7. आवां गङ्गास्नानाय प्रयागम् ..... ।

8. यूयं कुत्र ..... ?

9. वयं वाराणसीम् ..... ।

10. भवान् कदा ..... ?

अभ्यासः – 122

अपठत् / अपठताम् / अपठन्

प्रथमपुरुषस्य उचितक्रियापदरूपेण रिक्तस्थानानि पूरयन्तु–
[प्रथमपुरुष के उचित क्रियापद के रूप से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable form of the verb in third person.]

1. सा पत्रिकाम् .....अपठत्..... ।
2. बालकाः कथाम् ..... ।
3. भवान् समाचारपत्रम् ..... ।
4. सीता निबन्धम् ..... ।
5. तौ श्लोकान् ..... ।
6. भवत्यौ ग्रन्थम् ..... ।
7. तौ व्याकरणम् ..... ।
8. ते बालिके काव्यम् ..... ।
9. सः सूचनाम् ..... ।
10. सा शास्त्रम् ..... ।
11. ताः विज्ञानम् ..... ।
12. भवन्तः व्याकरणम् ..... ।
13. एते महिले पत्रम् ..... ।
14. एताः वृद्धाः स्तोत्रम् ..... ।
15. छात्रौ कादम्बरीम् ..... ।

अभ्यासः – 123

अपठः / अपठतम् / अपठत

मध्यमपुरुषस्य उचितेन क्रियापदरूपेण वाक्यानि पूरयन्तु–

[मध्यमपुरुष के उचित क्रियापद से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable form of the verbs in sceond person.]

1. त्वं रामायणम् .....अपठः..... ।
2. यूयं काव्यम् ..... ।
3. यूयं साहित्यम् ..... ।
4. युवां समाचारम् ..... ।
5. त्वं गीताम् ..... ।
6. युवां विज्ञानम् ..... ।
7. त्वं किं न ..... ?
8. युवां ज्यौतिषम् ..... ।
9. यूयं पत्रिकाम् ..... ।
10. युवां प्रश्नम् ..... ।
11. त्वं लेखम् ..... ।
12. यूयं शोधग्रन्थम् ..... ।
13. यूयं फलकम् ..... ।
14. त्वं जीवनचरितम् ..... ।
15. युवाम् उत्तरम् ..... ।

अभ्यासः – 124

अपठम् / अपठाव / अपठाम

उत्तमपुरुषस्य क्रियापदेन रिक्तस्थानानि पूरयन्तु–

[उत्तमपुरुष के उचित क्रियापद से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with appropriate verb in first person.]

1. अहम् आदेशान् ...अपठम्..... ।
2. आवां दर्शनम् ..... ।
3. वयं वेदान् ..... ।
4. वयं सूचनाः ..... ।
5. आवां कथाः ..... ।
6. अहं नाटकानि ..... ।
7. आवां विनोदान् ..... ।
8. वयम् उत्तरपुस्तिकाः ..... ।
9. अहम् आत्मकथाम् ..... ।
10. अहम् उपदेशान् ..... ।
11. आवां ग्रन्थान् ..... ।
12. वयम् उत्तरम् ..... ।
13. वयम् आकरग्रन्थम् ..... ।
14. आवाम् आदेशम् ..... ।
15. अहं वाक्यानि ..... ।

अभ्यासः – 125

विविधक्रियाणां भूतकाले मिश्रिताः अभ्यासाः

उचितक्रियारूपेण रिक्तस्थानानि पूरयन्तु–

[उचित क्रिया–पद से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable form of the verbs.]

1. ते छात्राः पुस्तकम् ..... । (अपठत् / अपठन् / अपठाम)
2. वयं पत्रम् ..... । (अलिखाव / अलिखाम / अलिखत)
3. तौ कुत्र ..... ? (अगच्छः / अगच्छताम् / अगच्छतम्)
4. सिंहाः ..... । (अगर्जत् / अगर्जत / अगर्जन्)
5. मयूराः ..... । (अनृत्यत् / अनृत्यन् / अनृत्यत)
6. वानराः ..... । (अखादतम् / अखादत् / अखादन्)
7. मेघाः ..... । (अवर्षन् / अवर्षत / अवर्षः)
8. अध्यापकाः पाठान् ..... । (अपाठयाम / अपाठयत / अपाठयन्)
9. यूयं लेखनीः ..... । (अयच्छाम / अयच्छत / अयच्छः)
10. आरक्षकौ चोरम् ..... । (अताडयः / अताडयताम् / अताडयत)
11. आवाम् ..... । (अक्रीडाव / अक्रीडाम / अक्रीडत)
12. युवां पुस्तकम् ..... । (अलिखतम् / अलिखः / अलिखत)
13. अहं शिलाखण्डम् ..... । (अक्षिपत् / अक्षिपः / अक्षिपम्)
14. ते श्लोकान् ..... । (अवदन् / अवदः / अवदम्)
15. युवां शाकम् ..... । (अकर्तयन् / अकर्तयतम् / अकर्तयः)
16. सा गीतम् ..... । (अगायम् / अगायः / अगायत्)
17. पुष्पाणि ..... । (अशुष्यन् / अशुष्यः / अशुष्यतम्)

अभ्यासः – 126

त्रिषु पुरुषेषु भूतकाले द्विवचनाभ्यासः

उचितेन क्रियापदरूपेण रिक्तस्थानानि पूरयन्तु–

[उचित क्रिया–पद रूप से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable form of the verb.]

1. तौ कथाम् .....। (लिख्)
2. ते बालिके .....। (गच्छ्)
3. आवाम् अङ्कनीम् .....। (यच्छ्)
4. युवां मोदकानि .....। (खाद्)
5. बालौ दुग्धम् .....। (पिब्)
6. आवाम् आम्रफलम् .....। (पश्य्)
7. युवां छात्रम् .....। (बोधय्)
8. धनिकौ धनम् .....। (गणय्)
9. तौ वस्तूनि .....। (नय्)
10. बालिके उद्यानें .....। (क्रीड्)
11. एते महिले .....। (जल्प्)
12. आवां वेदमन्त्रान् .....। (जप्)
13. अनुजौ श्लोकम् .....। (वद्)
14. मूर्खौ मार्गे जनान् .....। (निन्द्)
15. बालकौ उत्तरम् .....। (स्मर्)

अभ्यासः – 127

भूतकाले त्रिषु पुरुषेषु बहुवचनस्य अभ्यासः

उचितेन क्रियापदरूपेण रिक्तस्थानानि पूरयन्तु–

[उचित क्रियापद रूप से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable form of the verb.]

1. कृपणाः फलानि ..... । (जिघ्र्)
2. चोराः धनम् ..... । (नय्)
3. सैनिकाः शत्रून् ..... । (मारय्)
4. ते दुर्गुणम् ..... । (त्यज्)
5. एताः गीतम् ..... । (गाय्)
6. नर्तकाः ..... । (नृत्य्)
7. छात्राः विषयम् ..... । (स्मर्)
8. धेनवः तृणम् ..... । (चर्)
9. सेविकाः पात्राणि ..... । (क्षालय्)
10. वयं कथाः ..... । (रचय्)
11. यूयं वस्त्राणि ..... । (धर्)
12. सेवकाः गृहम् ..... । (मार्जय्)
13. वयम् आम्रफलम् ..... । (खाद्)
14. यूयं तान् ..... । (निन्द्)
15. वयं सेवकान् ..... । (सूचय्)

अभ्यासः – 128

भूतकालिकक्रियाणाम् अभ्यासः

अधोलिखितानि वाक्यानि भूतकाले लिखन्तु–

[निम्नलिखित वाक्यों को भूतकाल में लिखिए। Convert the following sentences into Past Tense.]

1. वयं गायामः। — वयम् अगायाम।
2. तौ पत्रं लिखतः। — ....।
3. एताः पाठयन्ति। — ....।
4. ताः पठन्ति। — ....।
5. वयं गीतं शृणुमः। — ....।
6. आवां श्लोकं वदावः। — ....।
7. ते गृहं गच्छन्ति। — ....।
8. वृक्षात् पर्णानि पतन्ति। — ....।
9. वानराः खादन्ति। — ....।
10. छात्रौ गुरुं नमतः। — ....।

अभ्यासः – 129

भूतकालिकक्रियाणाम् अभ्यासः

'ख' विभागतः उचितं क्रियापदं चित्वा 'क' विभागीयवाक्यानि पूरयन्तु–

['ख' विभाग से उचित क्रिया–पद का चयन कर 'क' विभाग के वाक्यों की पूर्ति कीजिए।]

Complete the sentences in column 'ka' by choosing suitable form of the verb from the column 'kha'.

	क		ख
1.	आवां पुस्तकम्	क.	अगच्छम्
2.	वयं पत्रम्	ख.	अपश्यम्
3.	ते बालकाः वार्ताम्	ग.	अखादताम्
4.	ताः महिलाः भोजनम्	घ.	अकुरुत
5.	ह्यः अहं विद्यालयं न	ङ.	अलिखाम
6.	एतौ वानरौ फलम्	च.	अपठाव
7.	यूयं किं कार्यम्	छ.	अशृण्वन्
8.	आवां गीतम्	ज.	अपचन्
9.	सः ह्यः चलचित्रम्	झ.	अगायाव
10.	अहं घटीम्	ण.	अपश्यत्

यथा– 1. आवां ..... पुस्तकम् ..... अपठाव।

2. .... ।

3. .... ।

4. .... ।

5. .... ।

6. .... ।

7. .... ।

8. .... ।

9. .... ।

10. .... ।

अभ्यासः – 130

कथायां वर्तमानकालिकक्रियाणां भूतकाले परिवर्तनम्

एतां कथां पठन्तु–
[इस कथा को पढ़िए। Read the following story.]

एकः काकः अस्ति। सः तृषितः भवति। सः जलस्य अन्वेषणं करोति। सर्वत्र पश्यति। कुत्रापि जलम् एव न अस्ति। सः सर्वत्र भ्रमति। सुदूरं गच्छति। एकं घटं पश्यति। जलं पातुं न शक्नोति। सः एकम् उपायं चिन्तयति। शिलाखण्डान् आनयति। घटे स्थापयति। पुनः बहुशिलाखण्डान् आनयति। घटे स्थापयति। जलम् उपरि आगच्छति। काकस्य आनन्दः भवति। काकः सन्तोषेण जलं पिबति। स्वनीडं गच्छति। सुखेन जीवनं यापयति।

उपरि कथायाम् अधोरेखया निर्दिष्टानां क्रियापदानां भूतकालरूपाणि अधस्तनकथायां लिखन्तु–
[ऊपर की कथा में रेखाङ्कित क्रियाओं के भूत–काल के रूपों को नीचे की कथा में लिखिए। Complete the following story by converting the underlined verbs of the above story into past tense.]

उदा०–

एकः काकः ..आसीत्... । सः तृषितः ..अभवत्... । सः जलस्य अन्वेषणम् .....। सर्वत्र .....। कुत्रापि जलम् एव न .....। सर्वत्र .....। सुदूरम् .....। एकं घटम् .....। जलं पातुं न .....। सः एकम् उपायम् .....। शिलाखण्डान् .....। जलम् उपरि .....। काकस्य आनन्दः .....। काकः सन्तोषेण जलम् .....। स्वनीडम् .....। सुखेन जीवनम् .....।

अभ्यासः – 131

कथायां वर्तमानकालिकक्रियाणां भूतकाले परिवर्तनम्

एतां कथां पठन्तु–
[इस कथा को पढ़िए। Read the following story.]

कश्चन बालकः अस्ति। सः अलसः अस्ति। सः प्रतिदिनं समयेन विद्यालयं न गच्छति। एकदा सः उद्यानं गच्छति। तत्र एकं काकं पश्यति। सः काकं क्रीडार्थम् आह्वयति। काकः वदति 'मम समयः नास्ति' इति । अनन्तरं सः एकं शुकं पश्यति। बालकः शुकं क्रीडार्थम् आह्वयति। शुकः अपि 'मम समयः नास्ति' इति वदति। अनन्तरम् एकां पिपीलिकां पश्यति। क्रीडार्थम् आह्वयति च। तदा पिपीलिका अपि 'समयः नास्ति' इति वदति। बालकः सर्वं शृणोति। तस्य लज्जा भवति। 'सर्वे स्व-स्वकार्ये निरताः' इति जानाति। विद्यालयं समयेन गच्छति। सम्यक् पठति च।

उपरि कथायाम् अधोरेखया निर्दिष्टानां शब्दानां भूतकालरूपाणि अधस्तनकथायां लिखन्तु–
[ऊपर की कथा में रेखाङ्कित शब्दों के भूतकाल के रूपों को नीचे की कथा में लिखिए। Complete the following story by converting the underlined verbs of the above story into past tense.]

उदा0– कश्चन बालकः ..आसीत्... । सः अलसः..... । सः प्रतिदिनं समयेन विद्यालयं न ..... । एकदा सः उद्यानम् ..... । तत्र एकं काकम् ..... । सः काकं क्रीडार्थम् ..आह्वयत्.... । काकः ..... 'मम समयः नास्ति' इति । अनन्तरं सः एकं शुकम् ..... । बालकः शुकं क्रीडार्थम् ..... । शुकः अपि 'मम समयः नास्ति' इति ..... । अनन्तरम् एकां पिपीलिकाम् ..... क्रीडार्थम् ..... च। तदा पिपीलिका अपि – 'समयः नास्ति' इति ..... । बालकः सर्वम् ..... । तस्य लज्जा ..... । सर्वे स्वस्वकार्ये निरताः इति अजानात्.. । विद्यालयं समयेन ..... । सम्यक् ..... च।

तृतीयः स्तबकः

3.2 द्वितीयः पाठः

3.2.1 क्तवतु–प्रयोगाः

ध्यानेन पठन्तु–
[ध्यान से पढ़िए। Please read carefully.]

उदा०– बालकः विद्यालयम् अगच्छत् = बालकः विद्यालयं गतवान्।

बालिका विद्यालयम् अगच्छत् = बालिका विद्यालयं गतवती।

उदा०– छात्रः पत्रम् अलिखत् = छात्रः पत्रं लिखितवान्।

छात्रा पत्रम् अलिखत् = छात्रा पत्रं लिखितवती।

लङ्लकारे	क्तवतु–प्रत्यये	लङ्लकारे	क्तवतु–प्रत्यये
अगच्छत्	गतवान् / गतवती	अहसत्	हसितवान् / हसितवती
अनमत्	नतवान् / नतवती	अपतत्	पतितवान् / पतितवती
अपिबत्	पीतवान् / पीतवती	अखादत्	खादितवान् / खादितवती
अनयत्	नीतवान् / नीतवती	अधावत्	धावितवान् / धावितवती
आनयत्	आनीतवान् / आनीतवती	अचलत्	चलितवान् / चलितवती
अवदत्	उदितवान् / उदितवती	अलिखत्	लिखितवान् /लिखितवती
अकरोत्	कृतवान् / कृतवती	अकुप्यत्	कुपितवान् / कुपितवती
अशृणोत्	श्रुतवान् / श्रुतवती	अयाचत्	याचितवान् / याचितवती
ऐच्छत्	इष्टवान् / इष्टवती	अचोरयत्	चोरितवान् / चोरितवती
अपश्यत्	दृष्टवान् /दृष्टवती	अस्थापयत्	स्थापितवान् / स्थापितवती
अपृच्छत्	पृष्टवान् / पृष्टवती	प्रैषयत्	प्रेषितवान् / प्रेषितवती
अस्पृशत्	स्पृष्टवान् / स्पृष्टवती	अक्षालयत्	क्षालितवान् / क्षालितवती
अनश्यत्	नष्टवान् / नष्टवती	अचिन्तयत्	चिन्तितवान् / चिन्तितवती
अपठत्	पठितवान् / पठितवती	अरक्षत्	रक्षितवान् / रक्षितवती

क्तवतु–पुंलिङ्गे .....वान्

रेखाङ्कितक्रियापदानि क्तवतु–प्रत्ययान्ते परिवर्त्य रिक्तस्थानेषु लिखन्तु–

[रेखाङ्कित क्रियापदों को क्तवतु प्रत्ययान्त शब्दों में परिवर्तित कर रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by changing the underlined verbs into words ending in क्तवतु suffix]

उदा0– बालकः विद्यालयम् अगच्छत्। – बालकः विद्यालयं .....गतवान्.....।

1. छात्रः पुस्तकम् अपठत्। – छात्रः पुस्तकं .....।
2. पुत्रः पत्रम् अलिखत्। – पुत्रः पत्रं .....।
3. सः अहसत्। – सः .....।
4. मूर्खः अनिन्दत्। – मूर्खः .....।
5. युवकः अक्रीडत्। – युवकः .....।
6. सिंहः अगर्जत्। – सिंहः .....।
7. सुरेशः अचलत्। – सुरेशः .....।
8. वानरः फलम् अखादत्। – वानरः फलं .....।
9. गणेशः अपतत्। – गणेशः .....।
10. मृगः अधावत्। – मृगः .....।

क्तवतु–स्त्रीलिङ्गे .....वती

उदा0– बालिका विद्यालयम् अगच्छत्। – बालिका विद्यालयं .....गतवती.....।

1. छात्रा पुस्तकम् अपठत्। – छात्रा पुस्तकम् .....।
2. पुत्री पत्रम् अलिखत्। – पुत्री पत्रं .....।
3. सा अहसत्। – सा .....।
4. मूर्खा अनिन्दत्। – मूर्खा .....।
5. बाला अक्रीडत्। – बाला .....।
6. सिंही अगर्जत्। – सिंही .....।
7. रमा अचलत्। – रमा .....।
8. अजा पर्णम् अखादत्। – अजा .....।
9. महिला अपतत्। – महिला .....।
10. उषा अधावत्। – उषा .....।

ध्यानेन पठन्तु–
[ध्यान से पढ़िए। Please read carefully.]

लङ्लकारतः क्तवतुप्रत्ययान्ते परिवर्त्तनम्

पुं० / स्त्री० एकवचने		
सः / सा पुस्तकम् अपठत्	–	सः पुस्तकं पठितवान् सा पुस्तकं पठितवती
त्वं (पुं०) / त्वं (स्त्री०) पुस्तकम् अपठः	–	त्वं (पुं०) पुस्तकं पठितवान् त्वं (स्त्री०) पुस्तकं पठितवती
अहं (पुं०) / अहं (स्त्री०) पुस्तकम् अपठम्	–	अहं (पुं०) पुस्तकं पठितवान् अहं (स्त्री०) पुस्तकं पठितवती

पुं० / स्त्री० द्विवचने		
तौ छात्रौ / ते छात्रे पुस्तकम् अपठताम्	–	तौ छात्रौ पुस्तकं पठितवन्तौ ते छात्रे पुस्तकं पठितवत्यौ
युवां (पुं०) / युवां (स्त्री०) पुस्तकम् अपठतम्	–	युवां (पुं०) पुस्तकं पठितवन्तौ युवां (स्त्री०) पुस्तकं पठितवत्यौ
आवां (पुं०) / आवां (स्त्री०) पुस्तकम् अपठाव	–	आवां (पुं०) पुस्तकं पठितवन्तौ आवां (स्त्री०) पुस्तकं पठितवत्यौ

पुं० / स्त्री० बहुवचने	
ते बालकाः / ताः बालिकाः पुस्तकम् अपठन्	ते बालकाः पुस्तकं पठितवन्तः ताः बालिकाः पुस्तकं पठितवत्यः
यूयं (पुं०) / यूयं (स्त्री०) पुस्तकम् अपठत	यूयं (पुं०) पुस्तकं पठितवन्तः यूयं (स्त्री०) पुस्तकं पठितवत्यः
वयं (पुं०) / वयं (स्त्री०) पुस्तकम् अपठाम	वयं (पुं०) पुस्तकं पठितवन्तः वयं (स्त्री०) पुस्तकं पठितवत्यः

लङ्लकारतः क्तवतुप्रत्ययान्ते परिवर्त्तनम्

लङि →	प्र० पु०	अपठत् (पुं० / स्त्री०)	अपठताम् (पुं० / स्त्री०)	अपठन् (पुं० / स्त्री०)
		↓		
क्तवतुप्रत्ययान्ते →		पठितवान् (पुं०) पठितवती (स्त्री०)	पठितवन्तौ (पुं०) पठितवत्यौ (स्त्री०)	पठितवन्तः (पुं०) पठितवत्यः (स्त्री०)
लङि →	म० पु०	अपठः (पुं० / स्त्री०)	अपठतम् (पुं० / स्त्री०)	अपठत (पुं० / स्त्री०)
		↓		
क्तवतुप्रत्ययान्ते →		पठितवान् (पुं०) पठितवती (स्त्री०)	पठितवन्तौ (पुं०) पठितवत्यौ (स्त्री०)	पठितवन्तः (पुं०) पठितवत्यः (स्त्री०)
लङि →	उ० पु०	अपठम् (पुं० / स्त्री०)	अपठाव (पुं० / स्त्री०)	अपठाम (पुं० / स्त्री०)
		↓		
क्तवतुप्रत्ययान्ते →		पठितवान् (पुं०) पठितवती (स्त्री०)	पठितवन्तौ (पुं०) पठितवत्यौ (स्त्री०)	पठितवन्तः (पुं०) पठितवत्यः (स्त्री०)

संक्षेपः–

	एक०		द्वि०		बहु०
सः / सा	अपठत्	तौ / ते (स्त्री०)	अपठताम्	ते / ताः	अपठन्
त्वम्	अपठः	युवाम्	अपठतम्	यूयम्	अपठत
अहम्	अपठम्	आवाम्	अपठाव	वयम्	अपठाम
↓ पठितवान् / पठितवती (पुं०) (स्त्री०)		↓ पठितवन्तौ / पठितवत्यौ (पुं०) (स्त्री०)		↓ पठितवन्तः / पठितवत्यः (पुं०) (स्त्री०)	

अभ्यासः – 132

लङ्लकारप्रथमपुरुषस्य क्तवतुप्रत्ययान्ते परिवर्त्तनम्

क्तवतुप्रत्ययान्तरूपेण रिक्तस्थानानि पूरयन्तु–

[क्तवतु प्रत्ययान्त रूप से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks with words ending in क्तवतु suffix.]

उदा०– गोपालः ग्रामम् अगच्छत् – गोपालः ग्रामं .....गतवान्..... ।

1. छात्रः अनमत् । – छात्रः ..... ।
2. भक्तः अस्तौत् । – भक्तः ..... ।
3. रामः सीताम् ऐच्छत् । – रामः सीताम् ..... ।
4. शिष्याः गुरुम् अपृच्छन् । – शिष्याः गुरुं ..... ।
5. मार्जारौ मूषकम् अखादताम् । – मार्जारौ मूषकं ..... ।
6. रमेशः श्लोकम् अलिखत् । – रमेशः श्लोकं ..... ।
7. शिवः पार्वतीम् अनयत् । – शिवः पार्वतीं ..... ।
8. विष्णुः गजम् अरक्षत् । – विष्णुः गजं ..... ।
9. पुत्राः पितरम् अवदन् । – पुत्राः पितरम् ..... ।
10. कर्मकरौ कार्यम् अकुरुताम् । – कर्मकरौ कार्यं ..... ।

कृतवन्तौ,	नतवान्,	उदितवन्तः,	स्तुतवान्,	खादितवन्तौ,
रक्षितवान्,	पृष्टवन्तः,	नीतवान्,	लिखितवान्,	इष्टवान्

अभ्यासः – 133

लङ्लकारमध्यमपुरुषस्य क्तवतुप्रत्ययान्ते परिवर्त्तनम्

मञ्जूषायाः क्तवतुप्रत्ययान्तरूपेण रिक्तस्थानानि पूरयन्तु–

[मञ्जूषा से क्तवतु प्रत्ययान्त रूप का चयन कर रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by selecting appropriate word from the box given below.]

उदा0–	त्वम् अनमः।	–	त्वं .....नतवान्..... ।
1.	त्वम् ऐच्छः।	–	त्वम् ..... ।
2.	त्वं कार्यम् अकरोः।	–	त्वं कार्यं ..... ।
3.	युवां पत्रम् अलिखतम्।	–	युवां पत्रं ..... ।
4.	युवां गुरुम् अपृच्छतम्।	–	युवां गुरुं ..... ।
5.	युवां श्लोकम् अवदतम्।	–	युवां श्लोकम् ..... ।
6.	यूयं दुग्धम् अपिबत।	–	यूयं दुग्धं ..... ।
7.	यूयं चित्रम् अपश्यत।	–	यूयं चित्रं ..... ।
8.	यूयम् अहसत।	–	यूयं ..... ।
9.	त्वं कथाम् अलिखः।	–	त्वं कथां ..... ।
10.	यूयं संस्कृतम् अपठत।	–	यूयं संस्कृतं ..... ।

उदितवन्तौ,	पठितवन्तः,	इष्टवान्,	पृष्टवन्तौ,	लिखितवान्,
दृष्टवन्तः,	लिखितवन्तौ,	हसितवन्तः,	कृतवान्,	पीतवन्तः,

अभ्यासः – 134

लङ्लकार–उत्तमपुरुषस्य क्तवतुप्रत्ययान्ते परिवर्त्तनम्

मञ्जूषायाः क्तवतुप्रत्ययान्तरूपेण रिक्तस्थानानि पूरयन्तु–

[मञ्जूषा से क्तवतु प्रत्ययान्त रूप का चयन कर रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by selecting appropriate word from the box given below.]

उदा0–	अहं ग्रामम् अगच्छम्	–	अहं ग्रामं .....गतवान्..... ।
1.	अहं देवम् अनमम् ।	–	अहं देवं ..... ।
2.	अहं कार्यम् अकरवम् ।	–	अहं कार्यं ..... ।
3.	अहं मित्रम् अमिलम् ।	–	अहं मित्रं ..... ।
4.	आवां चित्रम् अपश्याव ।	–	आवां चित्रं ..... ।
5.	आवां शिलाम् अस्थापयाव ।	–	आवां शिलां ..... ।
6.	आवां मृगम् अरक्षाव ।	–	आवां मृगं ..... ।
7.	वयं कथाम् अकथयाम ।	–	वयं कथां ..... ।
8.	वयं पुरस्कारम् अगृह्णीम ।	–	वयं पुरस्कारं ..... ।
9.	वयं नियमम् अपालयाम ।	–	वयं नियमं ..... ।
10.	वयम् अरुदाम ।	–	वयं ..... ।

कथितवन्तः,	कृतवान्,	दृष्टवन्तौ,	पालितवन्तः,	स्थापितवन्तौ,
गृहीतवन्तः,	मिलितवान्,	रक्षितवन्तौ,	रुदितवन्तः,	नतवान् ।

अभ्यासः – 135

लङ्लकारप्रथमपुरुषस्य क्तवतुप्रत्ययान्ते परिवर्त्तनम् (स्त्रीलिङ्गे)

मञ्जूषायाः क्तवतुप्रत्ययान्तरूपेण रिक्तस्थानानि पूरयन्तु–

[मञ्जूषा से क्तवतु प्रत्ययान्त रूप का चयन कर रिक्तस्थानों की पूर्ति कीजिए। Please fill in the blanks by selecting appropriate word from the box given below.]

उदा0– बालिका नगरम् अगच्छत् । – .....बालिका नगरं गतवती

1. भवती पाठम् अपठत् । – ..... ।
2. महिले देवम् अपश्यताम् । – ..... ।
3. छात्राः अधावन् । – ..... ।
4. कन्ये अक्रीडताम् । – ..... ।
5. धाविका अधावत् । – ..... ।
6. गायिकाः गीतम् अगायन् । – ..... ।
7. माता बालकम् अताडयत् । – ..... ।
8. सा लेखनीम् अनयत् । – ..... ।
9. पार्वती उपासनाम् अकरोत् । – ..... ।
10. भवत्यः प्रश्नान् अपृच्छन् । – ..... ।

क्रीडितवत्यौ,	धावितवती,	नीतवती,	पृष्टवत्यः,	कृतवती,
गीतवत्यः	धावितवत्यः,	दृष्टवत्यौ,	पठितवती,	ताडितवती

अभ्यासः – 136

लङ्लकारमध्यमपुरुषस्य क्तवतुप्रत्ययान्ते परिवर्त्तनम् (स्त्रीलिङ्गे)

मञ्जूषायाः स्त्रीलिङ्गस्य क्तवतुप्रत्ययान्तरूपेण रिक्तस्थानानि पूरयन्तु–

[मञ्जूषा से क्तवतु प्रत्ययान्त स्त्रीलिङ्ग रूपों से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by selecting the feminine form of words ending in *क्तवतु* suffix from the box given below.]

उदा०– त्वम् ऐच्छः । – .....त्वम् इष्टवती..... ।
1. यूयम् अलिखत । – ..... ।
2. त्वं दुग्धम् अपिबः । – ..... ।
3. युवां कथाम् अपिबतम् । – ..... ।
4. त्वं चित्रम् अपश्यः । – ..... ।
5. युवां अखादतम् । – ..... ।
6. यूयं विद्यालयतः आगच्छत । – ..... ।

7. त्वं कन्दुकम् अक्रीडः। – .....।
8. त्वं तत्र अहसः। – .....।
9. युवां गुरुम् अनमतम्। – .....।
10. यूयं पितरम् अपृच्छत। – .....।

क्रीडितवती,	खादितवत्यौ,	लिखितवत्यः,	दृष्टवती,	नतवत्यौ,
पृष्टवत्यः,	हसितवती,	पीतवत्यौ,	आगतवत्यः,	पीतवती

अभ्यासः – 137

लङ्लकार-उत्तमपुरुषस्य क्तवतुप्रत्ययान्ते परिवर्त्तनम् (स्त्रीलिङ्गे)

मञ्जूषायाः क्तवतुप्रत्ययान्तरूपेण रिक्तस्थानानि पूरयन्तु–

[मञ्जूषा से क्तवतु प्रत्ययान्त रूपों से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by selecting appropriate word ending in क्तवतु suffix from the given box.]

उदा0– अहं कार्यम् अकरवम्। – .....अहं...कार्यं...कृतवती.....।
1. अहम् अरुदम्। – .....।
2. आवाम् अकथयाव। – .....।
3. वयं गृहम् अगच्छाम। – .....।
4. अहं चित्रम् अपश्यम्। – .....।
5. आवाम् पुरस्कारम् अददाव। – .....।
6. वयं संस्कृतम् अपठाम। – .....।
7. अहं मृगम् अरक्षम्। – .....।
8. आवां चोरम् अताडयाव। – .....।
9. वयं खाद्यं न अखादाम। – .....।
10. अहं कथाम् अलिखम्। – .....।

रुदितवती,	कथितवत्यौ,	गतवत्यः,	पठितवत्यः,	रक्षितवती,
दृष्टवती,	दत्तवत्यौ,	ताडितवत्यौ,	लिखितवती,	खादितवत्यः

अभ्यासः – 138

क्तवतु प्रत्ययान्तानां प्रथमायां रूपाणि

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्तस्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

उदा0–	1. पठितवान्	पठितवन्तौ.....	पठितवन्तः..... ।
	2. क्रीडितवान्	क्रीडितवन्तौ	..... ।
	3. पीतवती	.....	..... ।
	4. दृष्टवती	.....	..... ।
	5. नीतवान्	.....	..... ।
	6.	हसितवत्यौ	..... ।
	7.	पीतवन्तौ	..... ।
	8. पीडितवती	.....	..... ।
	9. नन्दितवती	.....	..... ।
	10.	स्थितवन्तौ	..... ।
	11. नतवान्	.....	..... ।
	12.	.....	गतवन्तः ।
	13.	.....	उक्तवत्यः ।
	14. स्पृष्टवान्	.....	..... ।
	15. खादितवती	.....	..... ।
	16.	हसितवन्तौ	..... ।
	17. शिक्षितवती	.....	..... ।
	18. रचितवान्	.....	..... ।
	19.	दृष्टवन्तौ	..... ।
	20. दत्तवान्	.....	..... ।
	21.	.....	धृतवत्यः ।
	22. हृतवती	.....	..... ।
	23. कृतवान्	.....	..... ।
	24.	बोधितवत्यौ	..... ।
	25.	.....	पूजितवन्तः ।

अभ्यासः – 139

क्तवतुप्रत्ययान्ते परिवर्त्तनम् (स्त्रीलिङ्ग)

उदाहरणानुगुणं क्तुवतुप्रत्ययान्तानि स्त्रीलिङ्ग रूपाणि लिखन्तु–

[उदाहरण के अनुसार क्तवतु प्रत्ययान्त स्त्रीलिङ्ग रूपों को लिखिए। Please write the feminine forms of verbs ending in क्तवतु suffix]

	वर्त्तमाने	लङि	क्तवतुप्रत्यययान्ते (स्त्री0)
उदा0–	पठति	अपठत्	पठितवती.....
1.	क्रीडति	अक्रीडत्	क्रीडितवती.....
2.	गच्छति	अगच्छत्	गत.....
3.	नमति	अनमत्	नत.....
4.	यच्छति	अयच्छत्	दत्त.....
5.	पश्यति	अपश्यत्	दृष्ट.....
6.	नयति	अनयत्	नीत.....
7.	हसति	अहसत्	हसित.....
8.	पिबति	अपिबत्	पीत.....
9.	स्पृशति	अस्पृशत्	स्पृष्ट.....
10.	खादति	अखादत्	खादित.....
11.	आश्रयति	आश्रयत्	आश्रित.....
12.	पीडयति	अपीडयत्	पीडित.....
13.	नन्दति	अनन्दत्	नन्दित.....
14.	तिष्ठति	अतिष्ठत्	स्थित.....
15.	करोति	अकरोत्	कृत.....
16.	चलति	अचलत्	चलित.....
17.	पूजयति	अपूजयत्	पूजित.....
18.	गणयति	अगणयत्	गणित.....
19	त्यजति	अत्यजत्	त्यक्त.....

अभ्यासः – 139 +

क्तवतुप्रत्ययान्ते परिवर्त्तनम् (पुंलिङ्गे)

उदाहरणानुगुणं पुंलिङ्ग रूपाणि लिखन्तु–

[उदाहरण के अनुसार पुलिङ्ग रूपों को लिखिए। Please write the masculine forms of words ending in क्तवतु suffix.]

	वर्त्तमाने	लङि	क्तवतुप्रत्यययान्ते (पुं0)
उदा0–	नमति	अनमत्	नतवान्.....
1.	पठति	अपठत्	पठित.....
2.	गच्छति	अगच्छत्	गत.....
3.	यच्छति	अयच्छत्	दत्त.....
4.	त्यजति	अत्यजत्	त्यक्त.....
5.	तिष्ठति	अतिष्ठत्	स्थित.....
6.	नन्दति	अनन्दत्	नन्दित.....
7.	पिबति	अपिबत्	पीत.....
8.	हसति	अहसत्	हसित.....
9.	नयति	अनयत्	नीत.....
10.	पश्यति	अपश्यत्	दृष्ट.....
11.	खादति	अखादत्	खादित.....
12.	क्रीडति	अक्रीडत्	क्रीडित.....
13.	चलति	अचलत्	चलित.....
14.	करोति	अकरोत्	कृत.....
15.	गणयति	अगणयत्	गणित.....
16.	पूजयति	अपूजयत्	पूजित.....
17.	चोरयति	अचोरयत्	चोरित.....
18.	आश्रयति	आश्रयत्	आश्रित.....
19.	पीडयति	अपीडयत्	पीडित.....

अभ्यासः – 140

क्तवतुप्रत्ययान्ते परिवर्त्तनम् (पुं० / स्त्री०)

उदाहरणानुगुणं वाक्यानि लिखन्तु–

[उदाहरण के अनुसार रूपों को लिखिए। Please write the sentences as shown in the example]

उदा०–	जनाः नृपम् अस्तुवन्।	....जनाः....	.....नृपं.....	..स्तुतवन्तः.... ।
1.	वैद्यः रुग्णम् अपृच्छत्।	.....	.....	..... ।
2.	अहं शालाम् अगच्छम्।	.....	.....	..... ।
3.	सः माम् अस्मरत्।	.....	.....	..... ।
4.	जनकः पुत्रम् अपीडयत्।	.....	.....	..... ।
5.	जननी पुत्रीम् अवदत्।	.....	.....	..... ।
6.	मृगाः व्याधम् अपश्यन्।	.....	.....	..... ।
7.	आवां देवम् अस्मराव।	.....	.....	..... ।
8.	त्वं बालम् अनयः।	.....	.....	..... ।
9.	बालौ क्रीडाम् अक्रीडताम्।	.....	.....	..... ।
10.	युवां जनकम् अदर्शयतम्।	.....	.....	..... ।
11.	सेवकाः भारम् अनयन्।	.....	.....	..... ।
12.	बालौ श्लोकम् अवदताम्।	.....	.....	..... ।
13.	भक्ताः देवम् अस्मरन्।	.....	.....	..... ।
14.	वयं शैलम् अपश्याम।	.....	.....	..... ।
15.	यूयं पुराणम् अपठत।	.....	.....	..... ।
16.	एषः पुष्पम् अस्पृशत्।	.....	.....	..... ।
17.	राक्षसाः आञ्जनेयम् अपश्यन्।	.....	.....	..... ।
18.	इन्द्रः रामम् अनमत्।	.....	.....	..... ।
19.	अहम् औषधम् अपिबम्।	.....	.....	..... ।
20.	व्याधः मृगम् अमारयत्।	.....	.....	..... ।
21.	जनाः रामम् अस्मरन्।	.....	.....	..... ।
22.	सः देवम् अनमत्।	.....	.....	..... ।
23.	महिला पुष्पम् अधरत्।	.....	.....	..... ।
24.	बालिका वृक्षम् अपश्यत्।	.....	.....	..... ।
25.	गोपालः कृष्णम् अस्मरत्।	.....	.....	..... ।

अभ्यासः – 141

क्तवतुप्रत्ययान्ते परिवर्त्तनम् (पुं० / स्त्री०)

वर्तमानकालरूपाणां साहाय्येन उदाहरणानुगुणं क्तवतुप्रत्ययान्तपदानि योजयित्वा वाक्यानि रचयन्तु–
[वर्तमानकालिकरूपों की सहायता से उदाहरण के अनुसार क्तवतु प्रत्ययान्त पदों को जोड़कर वाक्य बनाइये। Please form sentences by adding *क्तवतु* suffixes with the help of verbs given in present tense as shown in the example.]

उदा०–	रामः विद्यालयं	...गतवान्... ।	(गच्छति)
1.	जननी पुत्रं	..... ।	(ताडयति)
2.	जनाः नृपं	..... ।	(वदति)
3.	अहं क्रीडां	..... ।	(क्रीडति)
4.	वयं जनकं	..... ।	(पश्यति)
5.	त्वं बालं	..... ।	(स्पृशति)
6.	रावणः अनुजं	..... ।	(त्यजति)
7.	राक्षसाः देवान्	..... ।	(पीडयति)
8.	गोपालः वृषभं	..... ।	(पालयति)
9.	बालः पुष्पं	..... ।	(स्पृशति)
10.	पुत्री जननीं	..... ।	(स्मरति)
11.	यूयं (स्त्री.) परीक्षां	..... ।	(यच्छति)
12.	वनिताः आभरणानि	..... ।	(धरति)
13.	मार्जारः मूषकं	..... ।	(खादति)
14.	सिंहः गजं	..... ।	(मारयति)
15.	व्याधः मृगं	..... ।	(नयति)
16.	अहं (महिला) पुष्पं	..... ।	(जिघ्रति)
17.	पाचकः पायसं	..... ।	(पिबति)
18.	देवः वरं	..... ।	(यच्छति)
19.	देवी असुरं	..... ।	(मारयति)
20.	हंसः सरोवरं	..... ।	(गच्छति)
21.	नृपः सचिवं	..... ।	(पृच्छति)
22.	रामः सीतां	..... ।	(पश्यति)
23.	विश्वामित्रः रामं	..... ।	(नयति)
24.	मारीचः रावणं	..... ।	(वदति)
25.	सेवकः भारं	..... ।	(त्यजति)

अभ्यासः – 142

क्तवतुप्रत्ययान्ते परिवर्त्तनम्

एतां कथां पठन्तु–

[इस कहानी को पढ़िए। Please read this story.]

कश्चन व्याधः अस्ति। सः अतीव दुष्टः निष्करुणः च। एकदा सः वनं गच्छति। तत्र जालं प्रसारयति। एका कपोती जाले पतति। व्याधः कपोतीं पञ्जरे स्थापयति, अग्रे गच्छति च। तदा वृष्टिः आरब्धा। भीतः व्याधः आश्रयम् अन्विष्यति। एकस्य महावृक्षस्य अधः आगच्छति। सः वृक्षम् उद्दिश्य – भोः अत्र यः वसति, तं प्रति शरणागतः अस्मि। मां रक्षतु" इति कथयति। तत्र वृक्षे एकः कपोतः आसीत्। कपोतः व्याधस्य पञ्जरे स्थितां पत्नीं पश्यति। तदा सा कपोती पतिम् उद्दिश्य वदति – "एषः व्याधः शीतार्तः, क्षुधार्तः अस्माकं गृहम् आगतः अस्ति। एतस्य सत्कारं करोतु" इति।

पत्न्याः वचनं कपोतः अङ्गीकरोति। सः अङ्गारकम् आनयति। अग्निं ज्वालयति। व्याधं वदति "भोः ! व्याध ! शीतबाधां दूरीकरोतु" इति। अनन्तरं कपोतः चिन्तयति - "व्याधः क्षुधार्तः। तस्मै दातुं गृहे आहारः नास्ति। किं करोमि ?" इति। कपोतः व्याधं वदति - "अतिथिमहाशय ! आहारं ददामि। कृपया स्वीकरोतु" इति। ततः कपोतः व्याधस्य आहारार्थम् अग्निं प्रविशति। कपोतस्य त्यागं दृष्ट्वा व्याधः लज्जाम् अनुभवति। कपोतीं बन्धनात् मोचयति। कपोती अपि पतिविरहदुःखेन अग्निं प्रविशति। इत्थं कपती-कपोतयोः त्यागं दृष्ट्वा व्याधः दुःखेन अश्रूणि स्रावयति।

उपरि कथायाम् अधोरेखया निर्दिष्टानां शब्दानां अधस्तनकथायां क्तवतुरूपाणि लिखन्तु–

[ऊपर दी गई कथा में रेखाङ्कित शब्दों के भूतकालिक क्तवतु रूप नीचे दी गई कथा में लिखिए। Complete the following story by Using the Past Tense forms of the verbs underlined in the story given above.]

कश्चन व्याधः आसीत्। सः अतीव दुष्टः निष्करुणः च। एकदा सः वनं .....। तत्र जालं .....। एका कपोती जाले .....। व्याधः कपोतीं पञ्जरे ....., अग्रे .....च। तदा वृष्टिः आरब्धा। भीतः व्याधः आश्रयम् .....। एकस्य महावृक्षस्य अधः .....। सः वृक्षम् उद्दिश्य – "भोः, अत्र यः वसति, तं प्रति शरणागतः अस्मि। मां रक्षतु" इति .....। तत्र वृक्षे एकः कपोतः आसीत्। कपोतः व्याधस्य पञ्जरे स्थितां पत्नीं .....। तदा सा कपोती पतिम् उद्दिश्य ..... – "एषः व्याधः शीतार्तः, क्षुधार्तः अस्माकं गृहम् आगतः अस्ति। एतस्य सत्कारं करोतु" इति।

पत्न्याः वचनं कपोतः ..... सः अङ्गारकम् .....। अग्निं .....। व्याधं ..... "भोः ! व्याध ! शीतबाधां दूरीकरोतु" इति। अनन्तरं कपोतः .....। 'व्याधः क्षुधार्तः। तस्मै दातुं गृहे आहारः नास्ति। किं करोमि ?' इति। कपोतः व्याधम् ..... "अतिथिमहाशय ! आहारं ददामि, कृपया स्वीकरोतु" इति। कपोतः व्याधस्य आहारार्थम् अग्निं ..... । कपोतस्य त्यागं दृष्ट्वा व्याधः लज्जाम् अनुभवति। कपोतीं बन्धनात् मोचयति। कपोती अपि पतिविरहदुःखेन अग्निं प्रविशति। इत्थं कपती-कपोतयोः त्यागं दृष्ट्वा व्याधः दुःखेन अश्रूणि स्रावयति।

3.2.2 नपुंसके क्तवतुप्रत्ययान्तस्य प्रयोगाः

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

फलम् अपतत् । = फलं पतितवत् ।

अभ्यासः – 143

उदाहरणानुसारं वाक्यानि लिखन्तु–

[उदाहरण के अनुसार वाक्य लिखिए। Please write the sentences as shown in the example.]

उदा0– 1.	फलम् अपतत् ।	1. .....फलं.....	.....पतितवत्... ।
2.	पुष्पम् अपतत् ।	2.	..... ।
3.	पर्णम् अपतत् ।	3.	..... ।
4.	विमानम् अपतत् ।	4.	..... ।
5.	कङ्कणम् अपतत् ।	5.	..... ।
6.	आभरणम् अपतत् ।	6.	..... ।
7.	यानम् अगच्छत् ।	7.	..... ।
8.	कारयानम् अगच्छत् ।	8.	..... ।
9.	मित्रम् अगच्छत् ।	9.	..... ।
10.	नेत्रम् अस्फुरत् ।	10.	..... ।
11.	जलम् अगच्छत् ।	11.	..... ।
12.	पत्रम् अगच्छत् ।	12.	..... ।
13.	वस्त्रम् अनश्यत् ।	13.	..... ।
14.	कार्यम् अनश्यत् ।	14.	..... ।

अभ्यासः – 144

उदाहरणानुगुणं रूपाणि लिखन्तु–

[उदाहरण के अनुसार रूपों को लिखिए। Please write the forms as shown in the example.]

वर्त्तमाने लट्	भूते लङ्	भूते क्तवतु	वर्त्तमाने लट्	भूते लङ्	भूते क्तवतु
1. पठति	अपठत्	...पठितवत्...	2. लिखति	अलिखत्	..लिखितवत्..
3. खादति	अखादत्	.....	4. हसति	अहसत्	.....
5. निन्दति	अनिन्दत्	.....	6. चलति	अचलत्	.....
7. वर्षति	अवर्षत्	.....	8. गर्जति	अगर्जत्	.....
9. क्रीडति	अक्रीडत्	.....	10. रक्षति	अरक्षत्	.....
11. गच्छति	अगच्छत्	.....	12. निन्दति	अनिन्दत्	.....
13. पतति	अपतत्	.....	14. कुप्यति	अकुप्यत्	.....
15. क्रन्दति	अक्रन्दत्	.....	16. खनति	अखनत्	.....
17. जपति	अजपत्	.....	18. धावति	अधावत्	.....
19. नृत्यति	अनृत्यत्	.....	20. मिलति	अमिलत्	.....
21. लुण्ठति	अलुण्ठत्	.....	22. वसति	अवसत्	.....
23. कथयति	अकथयत्	.....	24. दर्शयति	अदर्शयत्	.....
25. गणयति	अगणयत्	.....	26. चिन्तयति	अचिन्तयत्	.....
27. चोरयति	अचोरयत्	.....	28. ताडयति	अताडयत्	.....
29. तोलयति	अतोलयत्	.....	30. पालयति	अपालयत्	.....
31. सूचयति	असूचयत्	.....	32. पीडयति	अपीडयत्	.....

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

1.	गच्छति	–	गतवत्
2.	नमति	–	नतवत्
3.	यच्छति / ददाति	–	दत्तवत्
4.	पश्यति	–	दृष्टवत्
5.	नयति	–	नीतवत्
6.	पिबति	–	पीतवत्
7.	स्पृशति	–	स्पृष्टवत्
8.	करोति	–	कृतवत्
9.	तिष्ठति	–	स्थितवत्
10.	हरति	–	हृतवत्
11.	धरति	–	धृतवत्
12.	स्मरति	–	स्मृतवत्
13.	पृच्छति	–	पृष्टवत्
14.	कर्षति	–	कृष्टवत्
15.	क्रीणाति	–	क्रीतवत्
16.	गृह्णाति	–	गृहीतवत्
17.	जानाति	–	ज्ञातवत्
18.	त्यजति	–	त्यक्तवत्
19.	दहति	–	दग्धवत्
20.	पचति	–	पक्ववत्
21.	शक्नोति	–	शक्तवत्
22.	स्नाति	–	स्नातवत्

तृतीयः स्तबकः

3.3 तृतीयः पाठः

[भविष्यकालः]

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

एषः अङ्कुरः अस्ति।

एषः वृक्षः **भविष्यति**।

मेघः अस्ति।

वृष्टिः **भविष्यति**।



आम्रवृक्षः पुष्पितः अस्ति।

आम्राणि **भविष्यन्ति**।

बालकः उत्तमः अस्ति।

एषः वैद्यः **भविष्यति**।

1. एषः बालकः अस्ति।
   एषः युवकः **भविष्यति**।
2. अधुना दिनम् अस्ति।
   रात्रिः **भविष्यति**।
3. एषा कलिका अस्ति।
   एषा पुष्पं **भविष्यति**।
4. रात्रिः अस्ति।
   सुप्रभातं **भविष्यति**।
5. अद्य सोमवासरः अस्ति।
   श्वः मङ्गलवासरः **भविष्यति**।
6. फलम् अपक्वम् अस्ति।
   फलं पक्वं **भविष्यति**।
7. उषःकालः अस्ति।
   सूर्योदयः **भविष्यति**।
8. अद्य आगष्ट्मासस्य चतुर्दश-दिनाङ्कः अस्ति।
   श्वः स्वातन्त्र्यदिनं **भविष्यति**।
9. एषः अधुना अष्टमकक्षायाम् अस्ति।
   आगामिवर्षे नवमकक्षायां **भविष्यति**।
10. एषः अधुना अविवाहितः अस्ति।
    आगामिवर्षे विवाहितः **भविष्यति**।



ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

1. मम पुत्रः सम्यक् पठिष्यति।
2. वैद्यः भविष्यति।
3. विदेशं गमिष्यति।
4. धनं सम्पादयिष्यति।
5. समाजसेवां करिष्यति।
6. ग्रन्थान् लेखिष्यति।

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]



विद्यालयं गमिष्यति। पठिष्यति।

स्नातकः भविष्यति। उपाधिं प्राप्स्यति।

चलिष्यति।

वैद्यः भविष्यति। चिकित्सां करिष्यति।

बालकः भविष्यति।

जनसेवां करिष्यति।

पुरस्कारं कीर्तिं च अर्जयिष्यति।

जननी चिन्तयति

3.3.1 वर्तमानकालतः भविष्यकाले परिवर्तनम्

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

	वर्तमाने	भविष्यति
1.	गच्छति	गमिष्यति
2.	पठति	पठिष्यति
3.	वदति	वदिष्यति
4.	क्रीडति	क्रीडिष्यति
5.	चलति	चलिष्यति
6.	प्रेषयति	प्रेषयिष्यति
7.	करोति	करिष्यति
8.	लिखति	लेखिष्यति
9.	हसति	हसिष्यति
10.	पतति	पतिष्यति
11.	निन्दति	निन्दिष्यति
12.	मार्जयति	मार्जयिष्यति
13.	पिबति	पास्यति
14.	यच्छति/ददाति	दास्यति
15.	गायति	गास्यति
16.	पश्यति	द्रक्ष्यति
17.	नमति	नंस्यति
18.	क्रीणाति	क्रेष्यति
19.	जानाति	ज्ञास्यति
20.	शृणोति	श्रोष्यति
21.	पृच्छति	प्रक्ष्यति
22.	नयति	नेष्यति
23.	त्यजति	त्यक्ष्यति
24.	शक्नोति	शक्ष्यति
25.	फलति	फलिष्यति
26.	निर्माति	निर्मास्यति
27.	सिञ्चति	सेक्ष्यति

अभ्यासः – 145

वर्तमानकालिक–वाक्यानां भविष्यकाले परिवर्तनम्

उदाहरणानुगुणं भविष्यत्कालवाक्यानि लिखन्तु–

[उदाहरण के अनुसार वाक्यों को भविष्यकाल में बदलिए। Re-write the following sentences in future tense.]

	वर्तमानकाले	भविष्यकाले	
उदा०–	1. एषः पठति।	एषः	पठिष्यति।
	2. सा क्रीडति।	.....	.....।
	3. सेविका गृहं मार्जयति।	.....	.....।
	4. खलः निन्दति।	.....	.....।
	5. सीता वनं गच्छति।	.....	.....।
	6. गायकः गीतं गायति।	.....	.....।
	7. छात्रः विषयं जानाति।	.....	.....।
	8. शिष्यः प्रश्नं पृच्छति।	.....	.....।
	9. तरुणः सङ्गीतं शृणोति।	.....	.....।
	10. एषा शाटिकां क्रीणाति।	.....	.....।
	11. बालकः चित्रं पश्यति।	.....	.....।
	12. आपणिकः वस्तूनि यच्छति।	.....	.....।
	13. भक्तः देवतां नमति।	.....	.....।
	14. मार्जारः दुग्धं पिबति।	.....	.....।
	15. शिशुः हसति।	.....	.....।
	16. अर्चकः मन्त्रं वदति।	.....	.....।
	17. माता पत्रं लिखति।	.....	.....।
	18. पञ्चवादने वाहनं चलति।	.....	.....।
	19. पिता धनं प्रेषयति।	.....	.....।
	20. सा वस्त्रप्रक्षालनं करोति।	.....	.....।
	21. फलं पतति।	.....	.....।
	22. भगिनी धनं नयति।	.....	.....।
	23. अलसः दुर्गुणं त्यजति।	.....	.....।
	24. एषा गातुं शक्नोति।	.....	.....।
	25. गृहिणी जलं सिञ्चति।	.....	.....।

अभ्यासः – 146

भविष्यकाले प्रथमपुरुषे रूपाणि

उदाहरणानुगुणं द्विवचने, बहुवचने च रूपाणि लिखन्तु–

[उदाहरणों के अनुसार द्विवचन और बहुवचन में रूपों को लिखिए। Write down the verbs in dual and plural number as shown in the examples.]

		भविष्यकालः (प्रथमः पुरुषः)		
	वर्तमाने	एकवचनम्	द्विवचनम्	बहुवचनम्
1.	भवति	भविष्यति	भविष्यतः	भविष्यन्ति
2.	पठति	पठिष्यति	पठिष्यतः	पठिष्यन्ति
3.	गच्छति	गमिष्यति	गमिष्यतः	गमिष्यन्ति
4.	लिखति	लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति
5.	धावति	धाविष्यति	.....	.....
6.	करोति	करिष्यति	.....	.....
7.	स्थापयति	स्थापयिष्यति	.....	.....
8.	हसति	हसिष्यति	.....	.....
9.	निन्दति	निन्दिष्यति	.....	.....
10.	पश्यति	द्रक्ष्यति	.....	.....
11.	चोरयति	चोरयिष्यति	.....	.....
12.	पिबति	पास्यति	.....	.....
13.	खादति	खादिष्यति	.....	.....
14.	वदति	वदिष्यति	.....	.....
15.	क्षालयति	क्षालयिष्यति	.....	.....
16.	पृच्छति	प्रक्ष्यति	.....	.....
17.	मिलति	मेलिष्यति	.....	.....
18.	स्मरति	स्मरिष्यति	.....	.....
19.	रोदिति	रोदिष्यति	.....	.....
20.	नयति	नेष्यति	.....	.....

भविष्यकाले मध्यमे पुरुषे रूपाणि

वर्तमाने	भविष्यकाले (मध्यमः पुरुषः)		
	एकवचनम्	द्विवचनम्	बहुवचनम्
1. भवति	भविष्यसि	भविष्यथः	भविष्यथ
2. पठति	पठिष्यसि	पठिष्यथः	पठिष्यथ
3. गच्छति	गमिष्यसि	गमिष्यथः	गमिष्यथ
4. लिखति	लेखिष्यसि	.....	.....
5. धावति	.....	.....	.....
6. करोति	करिष्यसि	.....	.....
7. स्थापयति	स्थापयिष्यसि	.....	.....
8. हसति	.....	.....	.....
9. निन्दति	.....	.....	.....
10. पश्यति	द्रक्ष्यसि	.....	.....
11. चोरयति	चोरयिष्यसि	.....	.....
12. पिबति	पास्यसि	.....	.....
13. खादति	.....	.....	.....
14. वदति	.....	.....	.....
15. क्षालयति	.....	.....	.....
16. पृच्छति	प्रक्ष्यसि	.....	.....
17. मिलति	.....	.....	.....
18. स्मरति	.....	.....	.....
19. रोदिति	रोदिष्यसि	.....	.....
20. नयति	नेष्यसि	.....	.....

भविष्यकाले उत्तमपुरुषे रूपाणि

वर्तमाने	भविष्यकालः (उत्तमः पुरुषः)		
	एकवचनम्	द्विवचनम्	बहुवचनम्
1. भवति	भविष्यामि	भविष्यावः	भविष्यामः
2. पठति	पठिष्यामि	पठिष्यावः	पठिष्यामः
3. गच्छति	गमिष्यामि	गमिष्यावः	गमिष्यामः
4. लिखति	.....	.....	.....
5. धावति	.....	.....	.....
6. करोति	.....	.....	.....
7. स्थापयति	.....	.....	.....
8. हसति	.....	.....	.....
9. निन्दति	.....	.....	.....
10. पश्यति	.....	.....	.....
11. चोरयति	.....	.....	.....
12. पिबति	.....	.....	.....
13. खादति	.....	.....	.....
14. वदति	.....	.....	.....
15. क्षालयति	.....	.....	.....
16. पृच्छति	.....	.....	.....
17. मिलति	.....	.....	.....
18. स्मरति	.....	.....	.....
19. रोदिति	.....	.....	.....
20. नयति	.....	.....	.....

अभ्यासः – 147

भविष्यकाले प्रथमपुरुषे रूपाणि

अन्यवचनरूपाणि लिखन्तु–
[अन्य वचन के रूपों को लिखिए। Write the verbs in other numbers.]

उदा0–	भविष्यति	...भविष्यतः...	...भविष्यन्ति..
1.	पठिष्यति	.....	.....
2.	चलिष्यति	.....	..चलिष्यन्ति...
3.	धाविष्यति	.....	.....
4.	हसिष्यति	..हसिष्यतः...	.....
5.	पतिष्यति	.....	.....
6.	खादिष्यति	..खादिष्यतः..	.....
7.	गमिष्यति	.....	.....
8.	रोदिर्ष्यति	.....	..रोदिष्यन्ति..
9.	आरोक्ष्यति	..आरोक्ष्यतः...	.....
10.	नर्तिष्यति	.....	.....
11.	वदिष्यति	...वदिष्यतः...	.....
12.	भ्रमिष्यति	.....	.....
13.	गास्यति	.....	.....
14.	तरिष्यति	.....	.....
15.	चोरयिष्यति	.....	..चोरयिष्यन्ति.
16.	नेष्यति	....नेष्यतः....	.....
17.	ताडयिष्यति	.....	.....
18.	स्मरिष्यति	.....	..स्मरिष्यन्ति..
19.	ग्रहीष्यति	.....	.....
20.	मेलिष्यति	..मेलिष्यतः...	.....

अभ्यासः – 148

त्रिषु पुरुषेषु पठ्धातोः भविष्यकालरूपलेखनम्

अधोलिखितानि वाक्यानि पठ्क्रियायाः भविष्यकालस्य उचितेन रूपेण पूरयन्तु–
[अधोलिखित वाक्यों की पूर्त्ति पठ् क्रिया के भविष्यकाल के उचित रूप से कीजिए। Complete the sentences with suitable form of the root Path (पठ्) in future tense.]

उदा0– 1. अहं ...पठिष्यामि....

2. भवान् .....

3. ते छात्रे .....

4. सुशीलः .....

5. भवती .....

6. भवन्तौ .....

7. भवत्यः .....

8. भवन्तः .....

9. यूयं .....

10. वयं .....

11. भवत्यौ .....

12. त्वं .....

13. युवां .....

14. आवां .....

पठिष्यति	पठिष्यतः	पठिष्यन्ति
पठिष्यसि	पठिष्यथः	पठिष्यथ
पठिष्यामि	पठिष्यावः	पठिष्यामः

अभ्यासः – 149

वर्तमानकालतः भविष्यकालरूपेषु परिवर्त्तनम्

भविष्यकालरूपाणि लिखन्तु–

[भविष्यकाल के रूपों को लिखिए। Write down the verb forms in future tense.]

उदा०– 1. पिबति ....पास्यति.....

2. वदामि .....

3. चलसि .....

4. वदतः .....

5. लिखन्ति .....

6. आरोहन्ति .....

7. पृच्छसि .....

8. पाठयति .....

9. भ्रमथः .....

10. कुरुथः .....

11. त्यजसि .....

12. भवामि .....

13. पिबथ .....

14. विकसतः .....

15. प्रक्षालयति .....

16. दर्शयामि .....

17. प्रहरथ .....

18. नृत्यामः .....

19. स्मरति .....

20. उत्तिष्ठावः ...उत्थास्यावः...

21. उपदिशति ...उपदेक्ष्यति....

22. कुरुतः .....

23. पतन्ति .....

24. तोलयामः .....

25. धावतः .....

26. धरन्ति .....

27. पश्यावः .....

28. चोरयसि .....

29. निन्दसि .....

30. मिलतः .....

31. ज्वालयतः .....

32. नयथः .....

33. खादथः .....

34. हसामि .....

35. ताडयथ .....

36. यच्छन्ति (दा) ....दास्यन्ति.....

37. उपविशावः .....

38. प्रक्षालयति .....

39. नमथः .....

40. प्रेषयति .....

अभ्यासः – 150

भविष्यकालरूपलेखनम्

भवतः मित्रं दिनेशः अस्ति। सः श्वः किं करिष्यति इति मञ्जूषायाः क्रियापदं चित्वा लिखतु।
[आपका मित्र दिनेश है। वह कल क्या करेगा ? यह पेटिका में प्रदत्त शब्दों से चुनकर लिखिए। Your friend is Dinesh. What will he do tomorrow ? Complete the sentences choosing the right verb from the box.]

क्रेष्यति	लेखिष्यति	प्रक्ष्यति	गमिष्यति	श्रोष्यति
प्रवेक्ष्यति	दास्यति	द्रक्ष्यति	पास्यति	खादिष्यति

1. दिनेशः श्वः पुस्तकानि..क्रेष्यति....।
2. सः श्वः कदलीफलं .....।
3. सः श्वः गृहपाठं .....।
4. सः श्वः औषधं न .....।
5. सः श्वः प्रश्नं .....।
6. सः श्वः मातुलगृहं .....।
7. सः श्वः गीतानि .....।
8. सः श्वः धनं .....।
9. सः श्वः चलचित्रं .....।
10. सः श्वः व्याकरणकक्षां .....।

अभ्यासः – 151

भविष्यकालरूपलेखनम्

कोष्ठके दत्तेभ्यः क्रियापदेभ्यः उचितक्रियापदानि चित्वा रिक्तस्थानानि पूरयन्तु–
[कोष्ठक में दी गई क्रियाओं में से उचित क्रिया चुनकर रिक्तस्थानों की पूर्ति कीजिए। Fill in the blanks choosing suitable verbs from the box.]

गमिष्यतः	पास्यावः	गास्यामः	क्रीडिष्यन्ति	लेखिष्यावः
प्रक्ष्यथ	वदिष्यामः	खादिष्यतः	द्रक्ष्यथः	पठिष्यथ

1. ते बालिके फलं .....।
2. वयं गीतं .....।
3. युवां घटीं .....।
4. यूयं सूचनां .....।
5. तौ नगरं .....।
6. आवां जलं .....।
7. ते बालकाः .....।
8. आवां पत्रं .....।
9. वयं श्लोकं .....।
10. यूयं गुरुं .....।

अभ्यासः – 152

वर्तमानकालात् भविष्यकाले परिवर्तनम्

रिक्तस्थानानि उचितैः शब्दैः पूरयन्तु–

[उचित शब्दों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable words.]

यथा–	अहम् उद्यानं गच्छामि।	अहं श्वः ..उद्यानं.. गमिष्यामि।
1.	अहं देवालयं गच्छामि।	अहं श्वः ....।
2.	अहं वेदं पठामि।	अहम् अपि वेदं .....।
3.	अहम् ईश्वरं स्मरामि।	..... श्वः ....।
4.	अहम् उच्चैः हसामि।	अहं श्वः ....।
5.	अहं वेगेन धावामि।	..... अपि ....।
6.	अहं कन्दुकेन क्रीडामि।	अहं ....।
7.	अहं सत्यं वदामि।	..... अपि सत्यं .....।
8.	अहं फलं खादामि।	अहं श्वः ....।
9.	अहं देशसेवां करोमि।	..... अपि ....।
10.	अहं श्लोकं वदामि।	अहं श्वः ....।
11.	अहं दुग्धं पिबामि।	अहं ....।
12.	अहं दीपं ज्वालयामि।	..... श्वः ....।
13.	अहं वाहनं चालयामि।	अहं श्वः ....।
14.	अहं गृहपाठं लिखामि।	..... अपि ....।
15.	अहं शब्दकोषं पश्यामि।	अहं श्वः ....।
16.	अहं गीतं शृणोमि।	..... अपि ....।
17.	अहं खलं ताडयामि।	..... खलं .....।
18.	अहं वने सञ्चरामि।	अहं श्वः वने .....।
19.	अहं पुष्पं धरामि।	अहं श्वः .....।
20.	अहं रात्रौ निद्रामि।	अहं रात्रौ .....।

अभ्यासः – 153

वर्तमानकालात् भविष्यकाले परिवर्तनम्

वर्तमानकालिकरूपस्य भविष्यकालिकरूपे परिवर्त्तनं कृत्वा वाक्यानि रचयन्तु–

[वर्तमानकाल के रूप को भविष्यकाल के रूप में परिवर्तित करके वाक्यों की रचना कीजिए। Make sentences by changing the following verbs from present tense into future tense.]

	अद्य	श्वः
यथा– 1.	सः दुग्धं पिबति।	....सः.... ...दुग्धं..... ....पास्यति.....।
2.	आवां फलं खादावः।	.....।
3.	अहं श्लोकं वदामि।	.....।
4.	ते विषयं स्मरन्ति।	.....।
5.	वयं पद्यं लिखामः।	.....।
6.	त्वं कार्यं करोषि।	.....।
7.	युवां मिलथः।	.....।
8.	बालकाः क्रीडन्ति।	.....।
9.	सः गीतं गायति।	.....।
10.	तौ वने विहरतः।	.....।
11.	यूयं कुत्र गच्छथ ?	.....।
12.	सा कदा आगच्छति ?	.....।
13.	आवां लेखनीं यच्छावः (दद्वः)।	.....।
14.	युवां जलं यच्छथः (दत्थः)।	.....।
15.	ताः गृहं प्रक्षालयन्ति।	.....।
16.	अहं ग्रन्थं पठामि।	.....।
17.	एतौ कथां कथयतः।	.....।
18.	यूयं वाहनं चालयथ।	.....।
19.	त्वं देवं पूजयसि।	.....।
20.	वयं फलं नयामः।	.....।

अभ्यासः – 154

वर्तमानकालात् भविष्यकाले परिवर्तनम्

उचितक्रियारूपेण रिक्तस्थानानि पूरयन्तु–

[उचित क्रिया रूप से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with suitable form of the verb.]

1. एते कदा गृहं ..... । (गमिष्यतः / गमिष्यति / गमिष्यन्ति)
2. श्वः वयं विद्यालयं न ..... । (गमिष्यावः / गमिष्यन्ति / गमिष्यामः)
3. एताः बालिकाः अग्रिमे वर्षे विश्वविद्यालये ..... । (पठिष्यथ / पठिष्यन्ति / पठिष्यसि)
4. अहम् अपि अग्रिमवर्षे विश्वविद्यालये ..... । (पठिष्यामि / पठिष्यन्ति / पठिष्यसि)
5. श्वः प्रातः त्वं कदा ..... ? (उत्थास्यति / उत्थास्यामि / उत्थास्यसि)
6. परश्वः एताः बालिकाः दिल्लीं न ..... । (गमिष्यति / गमिष्यतः / गमिष्यन्ति)
7. ग्रीष्मकाले आम्राः ..... । (फलिष्यन्ति / फलिष्यति / फलिष्यतः)
8. वसन्ते पुरातनानि पत्राणि ..... । (पतिष्यतः / पतिष्यामः / पतिष्यन्ति)
9. वसन्ते नूतनानि पत्राणि ..... । (आगमिष्यतः / आगमिष्यामः / आगमिष्यन्ति)
10. वसन्ते कोकिलाः ..... । (कूजिष्यतः / कूजिष्यति / कूजिष्यन्ति)
11. वसन्ते मयूराः ..... । (नर्तिष्यन्ति / नर्तिष्यति / नर्तिष्यथ)
12. जनाः गीतं ..... । (गास्यति / गास्यामि / गास्यन्ति)
13. बालकाः ..... । (खादिष्यति / खादिष्यथ / खादिष्यन्ति)
14. भक्ताः कथां ..... । (श्रोष्यन्ति / श्रोष्यतः / श्रोस्यसि)
15. वयम् उत्तराणि ..... । (लेखिष्यावः / लेखिष्यामः / लेखिष्यन्ति)
16. यूयं प्रश्नान् ..... । (प्रक्ष्यसि / प्रक्ष्यथः / प्रक्ष्यथ)
17. युवां फलानि ..... । (भक्षयिष्यथः / भक्षयिष्यत / भक्षयिष्यावः)
18. त्वं नेयदीपं ..... । (नेष्यति / नेष्यामि / नेष्यसि)
19. यूयं श्लोकं ..... । (वदिष्यथ / वदिष्यन्ति / वदिष्यामः)
20. युवां कोलाहलं ..... । (करिष्यसि / करिष्यथः / करिष्यथ)

अभ्यासः – 155

कोष्ठे प्रदत्तस्य क्रियापदस्य भविष्यकालिकं रूपं लिखित्वा कथां पठन्तु–

[कोष्ठ में दिए गए क्रिया–पद का भविष्यकालिक रूप लिखकर कथा को पढ़िए। Fill in the blanks converting the present tense form of verbs given in the brackets into past tense and then read the story.]

कस्मिंश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीवनयापनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं घटं प्राप्तवान्। सः तं घटं नागदन्ते स्थापितवान्। तस्य अधः उपविश्य घटमेव पश्यति स्म।

एकदा रात्रौ सः चिन्तितवान् "यदि देशे दुर्भिक्षः ..... (भवति) तर्हि एतस्य शतरूप्यकाणि मूल्यं ..... (भवति)। तदा अहम् एतस्य विक्रयणं कृत्वा तेन धनेन अजद्वयं ..... (क्रीणामि)। कालान्तरे तेन अजसमूहः एव ..... (भवति)। अनन्तरम् अजसमूहस्य विक्रयणं कृत्वा महिषीः, ताः विक्रीय अश्वान् च ..... (क्रीणामि)। तान् अपि विक्रीय यथेष्टं धनं ..... (सम्पादयामि)। बृहत् गृहं ..... (निर्मापयामि)। तदा कश्चित् ब्राह्मणः आगत्य रूपवतीं स्वकन्यां मह्यं (दास्यति) अनन्तरं मम पुत्रः उत्पन्नः ..... (भवति)। देवशर्मा इति तस्य नामकरणं ..... (करोमि)। यदा सः जानुभ्यां चलितुं समर्थः ..... (भवति) तदा अहं पुस्तकं ..... (पठामि) तदा देवशर्मा मम समीपम् ..... (आगच्छति)। तदा 'बालं गृह्णातु' इति स्वपत्नीम् ..... (आज्ञापयामि)। यदा सा मम वचनं न ..... (शृणोति) तदा अहं कोपेन पादप्रहारं ..... (करोमि)" इति चिन्तामग्नः पादप्रहारं कृतवान् एव। प्रहारेण पूर्णः घटः पतितः। भग्नः च।

चतुर्थः स्तबकः

4.1 प्रथमः पाठः

[क्त्वा / ल्यप्]

4.1.1 क्त्वा–प्रयोगाः

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

बालकः स्नाति । बालकः अर्चति । बालकः स्नात्वा अर्चति ।

बालकः विद्यालयं गच्छति । बालकः पठति । बालकः विद्यालयं गत्वा पठति ।

बालकः क्रीडति । बालकः खादति । बालकः क्रीडित्वा खादति ।

अभ्यासः – 156

उदाहरणानुगुणं क्त्वान्तपदैः वाक्यानि योजयन्तु–

[उदाहरण के अनुसार क्त्वान्त पदों से वाक्यों को जोड़िये। Join the sentences as shown in the example. Choose the joining words from the box.]

उदा0– 1. सीता मोदकं **खादति**, सा जलं पिबति। सीता मोदकं खादित्वा जलं पिबति.....।

2. जननी **स्नाति**, पाकं करोति। .....।

3. जनकः कार्यालयं **गच्छति**, कार्यं करोति .....।

4. छात्रः पाठं **पठति**, निद्राति । .....।

5. शिशुः फलं **खादति**, क्रीडति। .....।

6. त्वं पत्रं **लिखसि**, प्रेषयसि। .....।

7. भवती देवं **नमति**, प्रदक्षिणं करोति। .....।

8. सा गीतं **शृणोति**, नृत्यति। .....।

9. अध्यापकः पाठं **पाठयति**, प्रश्नं पृच्छति। .....।

10. छात्रः वाक्यं **वदति**, अर्थं जानाति। .....।

1	2	3	4	5
खादित्वा	स्नात्वा	गत्वा	पठित्वा	खादित्वा
6	7	8	9	10
लिखित्वा	नत्वा	श्रुत्वा	पाठयित्वा	उदित्वा

क्त्वान्तरूपाणि

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

1. हसति (हस्)	–	हसित्वा
2. क्रीडति (क्रीड्)	–	क्रीडित्वा
3. भ्रमति (भ्रम्)	–	भ्रमित्वा
4. जपति (जप्)	–	जपित्वा
5. लिखति (लिख्)	–	लिखित्वा
6. खादति (खाद्)	–	खादित्वा
7. खनति (खन्)	–	खनित्वा
8. क्रन्दति (क्रन्द्)	–	क्रन्दित्वा
9. धावति (धाव्)	–	धावित्वा
10. निन्दति (निन्द्)	–	निन्दित्वा
11. नृत्यति (नृत्)	–	नर्तित्वा
12. पठति (पठ्)	–	पठित्वा
13. पतति (पत्)	–	पतित्वा
14. मिलति (मिल्)	–	मिलित्वा

धरति (धृ)	–	धृत्वा
करोति (कृ)	–	कृत्वा
स्मरति (स्मृ)	–	स्मृत्वा
हरति (हृ)	–	हृत्वा
शृणोति (श्रु)	–	श्रुत्वा
जानाति (ज्ञा)	–	ज्ञात्वा
स्नाति (स्ना)	–	स्नात्वा
क्रीणाति (क्री)	–	क्रीत्वा
नयति (नी)	–	नीत्वा
भवति (भू)	–	भूत्वा
पिबति (पा)	–	पीत्वा
तिष्ठति (स्था)	–	स्थित्वा
दहति (दह्)	–	दग्ध्वा
गच्छति (गम्)	–	गत्वा
नमति (नम्)	–	नत्वा
त्यजति (त्यज्)	–	त्यक्त्वा
पचति (पच्)	–	पक्त्वा
पश्यति (दृश्)	–	दृष्ट्वा
पृच्छति (प्रच्छ्)	–	पृष्ट्वा
कर्षति (कृष्)	–	कृष्ट्वा
इच्छति (इष्)	–	इष्ट्वा

अभ्यासः – 157

क्त्वान्त – प्रयोगाः

अधोलिखितवाक्यानि क्त्वान्तेन पदेन योजयन्तु–

[निम्नलिखित वाक्यों को क्त्वान्त पदों से जोड़िये । Join the following sentences using the word ending in क्त्वा .]

पूर्वम् पश्चात्

उदा0– 1. छात्रः पाठं **पठति**, टिप्पणीं लिखति । = छात्रः पाठं **पठित्वा** टिप्पणीं लिखति ।

2. कृषकः भूमिं **खनति**, सस्यं रोपयति । = ... ।

3. आचार्यः पाठं **पाठयति**, प्रश्नं पृच्छति । = ... ।

4. कृष्णः रथं **स्थापयति**, अर्जुनम् उपदिशति । = ... ।

5. आरक्षकः **धावति**, चोरं गृह्णाति । = ... ।

6. कविः काव्यं **लिखति**, धनं प्राप्नोति । = ... ।

7. वानरः फलं **खादति**, धावति । = ... ।

8. शिशुः **पतति**, रोदनं करोति । = ... ।

9. पितामहः कथां **कथयति**, प्रश्नं पृच्छति । = ... ।

10. बालिका **नृत्यति**, जनान् तोषयति । = ... ।

उदा0– 11. जननी स्नानं **करोति**, पाकं करोति । = जननी स्नानं **कृत्वा** पाकं करोति ।

12. छात्रः अध्यापकं **पश्यति**, नमस्करोति । = ... ।

13. युवकः चित्रालयं **गच्छति**, चित्रं पश्यति । = ... ।

14. बालिका गीतं **शृणोति**, नृत्यति । = ... ।

15. बालकः जननीं **स्मरति**, रोदनं करोति । = ... ।

16. त्वं दुग्धं **पिबसि**, क्रीडसि । = ... ।

17. शिष्यः प्रश्नं **पृच्छति**, उत्तरं जानाति । = ... ।

18. भक्तः देवं **नमति**, प्रार्थनां करोति । = ... ।

19. युवकः दुरभ्यासं **त्यजति**, सज्जनः भवति । = ... ।

20. बालकाः **क्रीडन्ति**, गृहं गच्छन्ति । = ... ।

अभ्यासः – 158

क्त्वान्त – प्रयोगाः

उदाहरणानुगुणं वाक्यानि योजयन्तु–

[उदाहरण के अनुसार वाक्यों को जोड़िये। Please join the sentences as shown in the example.]

उदा0– 1. सः विद्यालयं गच्छति, पाठं पठति। सः विद्यालयं गत्वा पाठं पठति।

2. बालिका फलं खादति, जलं न पिबति। .....।

3. रमेशः दुग्धं पिबति, शयनं करोति। .....।

4. अहं श्लोकं वदामि, अर्थं बोधयामि। .....।

5. सा पुस्तकं पठति, भोजनं करोति। .....।

6. अहं कार्यं करोमि, विद्यालयं गच्छामि। .....।

7. ते चित्रं पश्यन्ति, आनन्दम् अनुभवन्ति। .....।

8. भवन्तः गीतं शृण्वन्ति, चायं पिबन्ति। .....।

9. वयं धनं यच्छामः, (दद्मः) वस्तूनि क्रीणीमः। .....।

10. सः फलानि नयति, जनन्यै ददाति। .....।

11. ताः संस्कृतं जानन्ति, सम्भाषणं कुर्वन्ति। .....।

12. सः दुर्गुणं त्यजति, सज्जनः भवति। .....।

13. महिलाः गीतं गायन्ति, पूजां कुर्वन्ति। .....।

14. वैद्याः औषधं यच्छन्ति, धनं स्वीकुर्वन्ति। .....।

15. पितामहः रामायणं पाठयति, अर्थं वदति। .....।

16. छात्रः चिन्तयति, उत्तरं लिखति। .....।

17. जननी पुत्रं ताडयति, दुःखम् अनुभवति। .....।

18. क्रीडापटुः क्रीडति, पदकं प्राप्नोति। .....।

19. एताः पूजां कुर्वन्ति, प्रसादं स्वीकुर्वन्ति। .....।

20. अर्चकः देवम् अर्चति, प्रार्थनां करोति। .....।

4.1.2 ल्यप्

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

बालकः उत्तिष्ठति, देवं नमति। बालकः उत्थाय देवं नमति।

बालकः गृहं प्रविशति, हस्तौ प्रक्षालयति। बालकः गृहं प्रविश्य हस्तौ प्रक्षालयति।

अभ्यासः – 159

मञ्जूषातः पदं चित्वा उदाहरणानुगुणं वाक्यानि योजयन्तु–

[मञ्जूषा से पद चुनकर उदाहरण के अनुसार वाक्यों को जोड़िये। Join the sentences as shown in the example selecting the right word from the box.]

उदा0– 1. अध्यापकः ग्रन्थम् अध्यापयति, प्रश्नं पृच्छति। = अध्यापकः ग्रन्थम् अध्याप्य प्रश्नं पृच्छति।

2. ग्राहकः वस्तु स्वीकरोति, धनं ददाति। = ... ।

3. आचार्यः ग्रन्थं परिशीलयति, अध्यापनं करोति। = ... ।

4. जननी द्वारम् उद्घाटयति, अतिथिं सत्करोति। = ... ।

5. समाजसेवकः धनं **सङ्गृह्णाति**, समाजसेवां करोति। = ...।
6. अर्चकः प्रतिमां **संस्थापयति**, पूजां करोति। = ...।
7. भगिनी आकाशवाणीं **प्रचालयति**, गीतं शृणोति। = ...।
8. अनुजा द्वारं **प्रक्षालयति**, रङ्गवल्लीं लिखति। = ...।
9. जननी अतिथिं **सत्करोति**, भोजनं ददाति। = ...।
10. युवकः आसन्दे **उपविशति**, जलं पिबति। = ...।
11. बालकः वृक्षम् **आरोहति**, फलानि अवचिनोति। = ...।
12. सः माम् **अनुसरति**, वेगेन आगच्छति। = ...।

1	2	3	4	5	6
अध्याप्य	स्वीकृत्य	परिशील्य	उद्घाट्य	सङ्गृह्य	संस्थाप्य
7	8	9	10	11	12
प्रचाल्य	प्रक्षाल्य	सत्कृत्य	उपविश्य	आरुह्य	अनुसृत्य

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

गच्छति ⟶ गत्वा आगच्छति ⟶ आगत्य	तिष्ठति ⟶ स्थित्वा उत्तिष्ठति ⟶ उत्थाय	गच्छति ⟶ गत्वा अवगच्छति ⟶ अवगम्य
हरति ⟶ हृत्वा विहरति ⟶ विहृत्य	प्रेषयति ⟶ प्रेषयित्वा सम्प्रेषयति ⟶ सम्प्रेष्य	सरति ⟶ सृत्वा अनुसरति ⟶ अनुसृत्य
क्षालयति ⟶ क्षालयित्वा प्रक्षालयति ⟶ प्रक्षाल्य	हसति ⟶ हसित्वा उपहसति ⟶ उपहस्य	भवति ⟶ भूत्वा अनुभवति ⟶ अनुभूय

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

	क्त्वान्तपदानि ↓	उपसर्गाः ↓	क्त्वान्तपदानि ↓	ल्यबन्तपदानि ↓
1.	नीत्वा	आ +	नीत्वा	आनीय
2.	हृत्वा	आ +	हृत्वा	आहृत्य
3.	स्मृत्वा	वि +	स्मृत्वा	विस्मृत्य
4.	कृष्ट्वा	आ +	कृष्ट्वा	आकृष्य
5.	कृत्वा	उप +	कृत्वा	उपकृत्य
6.	ज्ञात्वा	वि +	ज्ञात्वा	विज्ञाय
7.	क्रीत्वा	वि +	क्रीत्वा	विक्रीय
8.	नत्वा	प्र +	नत्वा	प्रणम्य
9.	त्यक्त्वा	परि +	त्यक्त्वा	परित्यज्य
10.	लिखित्वा	वि +	लिखित्वा	विलिख्य
11.	स्थापयित्वा	सम् +	स्थापयित्वा	संस्थाप्य
12.	गृहीत्वा	सम् +	गृहीत्वा	सङ्गृह्य
13.	प्रेषयित्वा	सम् +	प्रेषयित्वा	सम्प्रेष्य
14.	स्थित्वा	उत् +	स्थित्वा	उत्थाय
15.	हसित्वा	वि +	हसित्वा	विहस्य

अभ्यासः – 160

ल्यबन्ते परिवर्त्तनम्

उदाहरणानुगुणं ल्यबन्तरूपाणि लिखन्तु–

[उदाहरणों के अनुसार ल्यबन्त रूपों को लिखिए। Please write down the *lyabanta* forms as shown in the examples.]

	उपसर्गः	क्त्वान्तपदम्	ल्यबन्तरूपम्
उदा0– 1.	आ +	गत्वा	...आगत्य...
3.	परि +	शीलयित्वा	.....
5.	प्र +	नत्वा	..प्रणम्य...
7.	सं +	गृहीत्वा	.....
9.	अनु +	भूत्वा	.....
11.	आ +	हूत्वा	.....
13.	सम् +	आप्त्वा	.....
15.	आ +	कृष्ट्वा	.....
17.	उत् +	स्थित्वा	..उत्थाय..
19.	उप +	हसित्वा	.....
21.	आ +	छादयित्वा	.....
23.	सं +	स्मृत्वा	.....
25.	निर् +	गत्वा	.....
27.	परि +	गणयित्वा	.....
29.	उप +	कृत्वा	.....
31.	सम् +	प्रेषयित्वा	.....
33.	उद् +	नीत्वा	.....
35.	निर् +	दिष्ट्वा	..निर्दिश्य..

	उपसर्गः	क्त्वान्तपदम्	ल्यबन्तरूपम्
उदा0– 2.	आ +	नीत्वा	..आनीय...
4.	सं +	हृत्वा	.....
6.	निरा +	कृत्वा	.....
8.	अभि +	नन्दित्वा	.....
10.	परि +	त्यक्त्वा	.....
12.	प्र +	क्षालयित्वा	.....
14.	प्र +	आप्त्वा	.....
16.	सं +	दिष्ट्वा	.....
18.	उप +	विष्ट्वा	.....
20.	नि +	वेदयित्वा	...निवेद्य...
22.	वि +	स्मृत्वा	.....
24.	उद् +	धृत्वा	.....
26.	प्रति +	गत्वा	.....
28.	सम् +	आप्त्वा	.....
30.	परि +	वेषयित्वा	.....
32.	वि +	लिखित्वा	.....
34.	आ +	रूढ्वा	.....
36.	वि +	चारयित्वा	.....

अभ्यासः – 161

क्वान्त/ल्यबन्त–प्रयोगाः

क्त्वा/ल्यप्-योगेन वाक्यानि योजयन्तु–

[क्त्वा/ल्यप् प्रत्यय के योग से वाक्यों को जोड़िये। Join the following sentences using *क्त्वा/ल्यप्* suffixes.]

उदा०– 1. अध्यापकः आसन्दे उपविशति, प्रश्नं पृच्छति।

..अध्यापकः.. ..आसन्दे... ..उपविश्य... ....प्रश्नं... ....पृच्छति.।

2. जनकः स्नानं करोति, पूजां करोति।

....

3. बिडालः गृहं प्रविशति, दुग्धं पिबति।

....

4. लक्ष्मणः सीता च रामम् अनुसरतः, वनं गच्छतः।

....।

5. महिला मन्दिरं गच्छति, देवं नमस्करोति।

....।

6. त्वं मित्रम् उपकरोषि, सन्तुष्टः भवसि।

....।

7. बालकौ फलं खादतः, शयनं कुरुतः।

....।

8. बालकाः आपणात् कन्दुकम् आनयन्ति, क्रीडन्ति।

....।

9. भक्तः नद्यां स्नाति, सूर्याय अर्घ्यं यच्छति।

....।

10. जननी पुत्रान् आह्वयति, भोजनं ददाति।

....।

शुद्धरूपाणि जानन्तु–

[शुद्ध रूपों को समझिए। Please learn the correct forms.]

×	✓
1. आगत्वा	आगत्य
2. सङ्गृहीत्वा	सङ्गृह्य
3. सङ्कलयित्वा	सङ्कलय्य
4. प्रकटयित्वा	प्रकटय्य
5. प्रापयित्वा	प्राप्य
6. सम्प्रेषयित्वा	सम्प्रेष्य
7. उपवेशयित्वा	उपवेश्य
8. आनीत्वा	आनीय
9. परिवेषयित्वा	परिवेष्य
10. सङ्गमयित्वा	सङ्गमय्य
11. आलोडयित्वा	आलोड्य
12. समापयित्वा	समाप्य
13. संस्मृत्वा	संस्मृत्य
14. सम्मिलित्वा	सम्मिल्य
15. संस्थापयित्वा	संस्थाप्य
16. प्रस्थित्वा	प्रस्थाय
17. विलिखित्वा	विलिख्य
18. निर्गत्वा	निर्गत्य
19. विज्ञात्वा	विज्ञाय
20. विहसित्वा	विहस्य
21. उपविष्ट्वा	उपविश्य

अभ्यासः – 162

शुद्धं रूपं चित्वा रिक्तस्थानानि पूरयन्तु–

[शुद्ध रूप का चयन कर रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks selecting the correct form.]

1. बालकः गृहपाठं ..... निद्राति। (समाप्य / समापयित्वा)
2. सा द्वारम् ..... अतिथिं सत्करोति। (उद्घाटयित्वा / उद्घाट्य)
3. जननी पुत्रेभ्यः ..... भोजनं करोति। (परिवेष्य / परिवेषयित्वा)
4. छात्रः विद्यालयात् ..... दुग्धं पिबति। (आगत्वा / आगत्य)
5. सा पारितोषिकं ..... आनन्दम् अनुभवति। (प्राप्य / प्राप्त्वा)
6. भगिनी द्वारं ..... रङ्गवल्लीं लिखति। (प्रक्षालयित्वा / प्रक्षाल्य)
7. अर्चकः विग्रहं ..... पूजां करोति। (प्रतिष्ठाप्य / प्रतिष्ठापयित्वा)
8. भवती पत्रं ..... प्रेषयति। (विलिखित्वा / विलिख्य)
9. रामः रावणं ..... अयोध्यां गच्छति। (संहृत्य / संहृत्वा)
10. सीता रामम् ..... वनं गच्छति। (अनुसृत्य / अनुसृत्वा)
11. तौ मरणवार्तां ..... दुःखम् अनुभवतः। (विज्ञात्वा / विज्ञाय)
12. महिला पेटिकाम् ..... आभरणं पश्यति। (उद्घाट्य / उद्घाटयित्वा)
13. चोरः राजभवनं ..... चौर्यं करोति। (प्रविष्ट्वा / प्रविश्य)
14. सेवकः वृक्षम् ..... फलानि अवचिनोति। (आरुह्य / आरूढ्वा)
15. गुरुः शिष्यम् ..... गच्छति। (अध्यापयित्वा / अध्याप्य)

चतुर्थः स्तबकः

4.2 द्वितीयः पाठः

तुमुन्–प्रयोगाः

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

वत्सः क्षीरं पातुम् इच्छति।

चोरः धावितुम् इच्छति।

गोपालकः दुग्धं दातुं गच्छति।

छात्रः पठितुं विद्यालयं गच्छति।

अहं नर्तितुं शक्नोमि।

अहम् एतानि खादितुं शक्नोमि।

अभ्यासः – 163

इच्छतेः प्रयोगे तुमुन्

मञ्जूषातः उचितं पदं योजयित्वा उदाहरणानुगुणं वाक्यानि पुनः लिखन्तु–

[मञ्जूषा से उचित पद का चयन कर उदाहरणों के अनुसार वाक्यों को पुनः लिखिए। Select the suitable word from the box and rewrite the following sentences as shown in the examples.]

उदा0–1. सः ..पठनम्.. इच्छति। उदा0– सः ..पठितुम्.. इच्छति।
2. सः गानम् इच्छति। सः गातुम् इच्छति।

1	2	3
पठितुम्	गातुम्	लेखितुम्
4	5	6
कथयितुम्	गन्तुम्	पातुम्
7	8	9
खादितुम्	दातुम्	हसितुम्
10	11	12
चलितुम्	क्रीडितुम्	धावितुम्
13	14	15
कर्तुम्	द्रष्टुम्	अर्चितुम्

3. सः लेखनम् इच्छति। सः ....।
4. सः कथनम् इच्छति। सः ....।
5. सः गमनम् इच्छति। सः ....।
6. सः पानम् इच्छति। सः ....।
7. सः खादनम् इच्छति। सः ....।
8. सः दानम् इच्छति। सः ....।
9. सः हसनम् इच्छति। सः ....।
10. सः चलनम् इच्छति। सः ....।
11. सः क्रीडनम् इच्छति। सः ....।
12. सः धावनम् इच्छति। सः ....।
13. सः करणम् इच्छति। सः ....।
14. सः दर्शनम् इच्छति। सः ....।
15. सः अर्चनम् इच्छति। सः ....।

अभ्यासः – 164

क्रियार्थायां क्रियायां तुमुन्

कोष्ठके प्रदत्तैः धातुभिः सह तुमुन् प्रत्ययं संयोज्य यथोदाहरणं रिक्तस्थानानि पूरयन्तु–
[कोष्ठ में दी गई धातुओं के साथ तुमुन् प्रत्यय जोड़कर उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Add तुमुन् to the roots given in the brackets and fill in the blanks as shown in the example.]

1.	वयं	.....नर्त्तितुम्.....	इच्छामः।	(नृत्)
2.	सः	.....	इच्छति।	(खाद्)
3.	ते गृहं	.....	इच्छन्ति।	(गम्)
4.	यूयं किं	.....	इच्छथ।	(कृ)
5.	रमा प्राङ्गणे	.....	इच्छति।	(क्रीड्)
6.	देवेशः चलचित्रं	.....	इच्छति।	(दृश्)
7.	सः आसने	.....	इच्छति।	(उपविश्)
8.	सः श्लोकं	.....	इच्छति।	(श्रावय्)
9.	सः गीतं	.....	इच्छति।	(गा)
10.	सः वस्त्राणि	.....	इच्छति।	(प्रक्षालय्)
11.	सः समाचारं	.....	इच्छति।	(श्रु)
12.	सः उत्तरं	.....	इच्छति।	(ज्ञा)

गन्तुम्	*श्रावयितुम्*	*प्रक्षालयितुम्*	*खादितुम्*
गातुम्	*श्रोतुम्*	*उपवेष्टुम्*	*द्रष्टुम्*
कर्त्तुम्	*नर्तितुम्*	*ज्ञातुम्*	*क्रीडितुम्*

अभ्यासः – 165

क्रियार्थायां क्रियायां तुमुन्

कोष्ठगतशब्दान् तुमुन्नन्तपदेषु परिवर्त्य रिक्तस्थानानि पूरयन्तु–
[कोष्ठ में दिये गये शब्दों को "तुमुनन्त" शब्दों में परिवर्तित करके रिक्त स्थानों की पूर्ति कीजिए। Change the words given in brackets into words ending in तुमुन् and fill in the blanks.]

उदा0– 1. अहं ...पठितुं... विद्यालयं गच्छामि। (पठनार्थम्)
2. सः ..... गच्छति। (शयनार्थम्)
3. ते ..... गच्छन्ति। (वन्दनार्थम्)
4. ताः ..... मन्दिरं गच्छन्ति। (अर्चनार्थम्)
5. बिडालः ..... भोजनालयं प्रविशति। (खादनार्थम्)
6. मूषकः ..... आगच्छति। (कर्तनार्थम्)
7. कृषकः ..... क्षेत्रं गच्छति। (कर्षणार्थम्)
8. ते ..... द्वारे तिष्ठन्ति। (रक्षणार्थम्)
9. वयं ..... प्रातः उत्तिष्ठामः। (स्मरणार्थम्)
10. एते विश्वनाथमन्दिरं ..... काशीं गच्छन्ति। (दर्शनार्थम्)
11. सा ..... पाकशालां गच्छति। (पचनार्थम्)
12. युवकः चायं ..... उपाहारगृहं गच्छति। (पानार्थम्)

पठितुम्,	*शयितुम्*	*वन्दितुम्,*	*अर्चितुम्,*
खादितुम्,	*कर्तयितुम्,*	*क्रष्टुम्,*	*रक्षितुम्,*
स्मर्तुम्,	*द्रष्टुम्*	*पक्तुम्,*	*पातुम्*

अभ्यासः – 166

क्रियार्थायां क्रियायां तुमुन्

तुमुन्नन्तप्रयोगेण यथोदाहरणं रिक्तस्थानानि पूरयन्तु–

[तुमुन्नन्त का प्रयोग करते हुए उदाहरण के अनुसार रिक्तस्थानों की पूर्ति कीजिए। Fill in the blanks using 'tumun' suffix as shown in the example.]

उदा०– बालकः विद्यालयं गच्छति। पठति।
सः किमर्थं विद्यालयं गच्छति ? बालकः ...पठितुं... विद्यालयं गच्छति।

1. सः आपणं गच्छति। फलानि आनयति।
सः किमर्थम् आपणं गच्छति ? सः फलानि ..... आपणं गच्छति।

2. सः स्नानगृहं गच्छति। स्नाति।
सः किमर्थं स्नानगृहं गच्छति ? सः ..... स्नानगृहं गच्छति।

3. रमा चित्रालयं गच्छति। चलचित्रं पश्यति।
सा किमर्थं चित्रालयं गच्छति ? सा चलचित्रं ..... चित्रालयं गच्छति।

4. अहं चित्रालयं गच्छामि। चलचित्रं पश्यामि।
त्वं किमर्थं चित्रालयं गच्छसि ? अहं चलचित्रं .....चित्रालयं गच्छामि।

5. ईश्वरः पृथिव्याम् अवतरति। भक्तान् रक्षति।
सः किमर्थं पृथिव्याम् अवतरति ? सः भक्तान् ..... पृथिव्याम् अवतरति।

6. गजः जलाशयं गच्छति। जलं पिबति।
सः किमर्थं जलाशयं गच्छति ? सः जलं ..... जलाशयं गच्छति।

7. वयं प्रयागं गच्छामः। स्नामः।
वयं किमर्थं प्रयागं गच्छामः ? वयं गङ्गायां ..... प्रयागं गच्छामः।

8. एते इदानीं शयनागारं गच्छन्ति। शयनं कुर्वन्ति।
एते इदानीं किमर्थं शयनागारं गच्छन्ति ? एते इदानीं..... शयनागारं गच्छन्ति।

9. जननी मन्दिरं गच्छति। देवम् अर्चति।
सा किमर्थं मन्दिरं गच्छति ? जननी देवम् ..... मन्दिरं गच्छति।

10. बालकः क्रीडाङ्गणं गच्छति। क्रीडति।
सः किमर्थं क्रीडाङ्गणं गच्छति ? सः ..... क्रीडाङ्गणं गच्छति।

अभ्यासः – 167

उदाहरणानुसारं रूपाणि लिखन्तु–

[उदाहरणों के अनुसार रूपों को लिखिए। Write the tumunant form as per the example.]

[वर्तमानरूपं पठित्वा भविष्यकालरूपं स्मरन्तु। ततः तुमुन्नन्तरूपलेखनं सुकरं भवति।
वर्तमान काल के रूप को पढ़कर भविष्यकाल के रूप का स्मरण कीजिए। इससे तुमुन्नन्त रूप का लेखन सरल हो जाता है। Convert the present tense form of the verb into future and that will make the formation of *tumunant* (तुमुन्नन्त) word easier.]

यथा–	लिखति	..लेखिष्यति....	.....लेखितुम्....
1.	पठति	.....	.....
2.	क्रीडति	.....	.....
3.	खादति	.....	.....
4.	उत्तिष्ठति	.....	.....
5.	उपविशति	...उपवेक्ष्यति...	.....उपवेष्टुम्..
6.	पश्यति	...द्रक्ष्यति.....	.....द्रष्टुम्....
7.	पिबति	.....	.....
8.	हसति	.....	.....
9.	अर्चति	.....	.....
10.	गच्छति	.....	.....
11.	गृह्णाति	.....	.....
12.	जानाति	.....	.....
13.	दर्शयति	..दर्शयिष्यति....	.....दर्शयितुम्..
14.	शृणोति	.....	.....
15.	क्रीणाति	.....	.....
16.	स्मरति	..स्मरिष्यति.....	....स्मर्तुम्.....
17.	पृच्छति	..प्रक्ष्यति.....	....प्रष्टुम्.....
18.	निन्दति	.....	.....



अभ्यासः – 168

उदाहरणानुगुणं तुमुन्नन्तपदानि प्रयुज्य वाक्यानि रचयन्तु–
[उदाहरण के अनुसार तुमुन्नन्त पदों का प्रयोग करके वाक्यों की रचना कीजिए। Make sentences by using *tumunanta Padas.*]

उदा0– 1. सः ...पठितुं..... ....ग्रन्थालयं.. गच्छति।
2. सः .... गच्छति।
3. सः .... गच्छति।
4. सः .... गच्छति।
5. सः .... गच्छति।
6. सः .... गच्छति।
7. सः .... गच्छति।
8. सः .... गच्छति।
9. सः .... गच्छति।
10. सः .... गच्छति।

अभ्यासः – 169

शक्नोतेः प्रयोगे तुमुन्

कोष्ठे दत्तेषु शब्देषु प्रयुक्तेन धातुना सह तुमुन्-प्रत्ययं योजयित्वा प्रश्नं उत्तरं च पूरयन्तु–
[कोष्ठक में दिये गये शब्दों में प्रयुक्त धातु के साथ तुमुन् प्रत्यय जोड़कर प्रश्न और उत्तर दोनों को पूरा कीजिए। Complete the questions and answers by adding तुमुन् to the roots of the words given in the brackets.]

उदा०– 1. प्र०– किं सः ...गातुं.... शक्नोति ? (गानम्)
उ०– ..आम्., .सः.. .गातुं..... ...शक्नोति.।

2. प्र०– किं त्वम् ..... शक्नोषि ? (उत्थानम्)
उ०– आम्, अहम्.. ....।

3. प्र०– किं शालिनी ..... शक्नोति ? (नर्तनम्)
उ०– न, ... न .....।

4. प्र०– किं वृद्धः ..... शक्नोति ? (धावनम्)
उ०– आम्, ...।

5. प्र०– किं भवती कथाम् ..... शक्नोति ? (वदनम्)
उ०– आम् अहम् ....।

6. प्र०– किं यूयं ..... शक्नुथ ? (पाठनम्)
उ०– आम्, वयं ....।

7. प्र०– किं बालकः श्लोकान् ..... शक्नोति ? (पठनम्)
उ०– आम्, ...।

8. प्र०– किं त्वम् अभ्यासान् ..... शक्नोषि ? (रचनम्)
उ०– आम्, ...।

9. प्र०– किम् अन्धः ..... शक्नोति ? (दर्शनम्)
उ०– न, ...।

10. प्र०– किं युवां पाठं ..... शक्नुथः ? (ज्ञानम्)
उ०– आम्, ...।

उत्थातुम्, ज्ञातुम्, रचयितुम्, वदितुम्, धावितुम्, पाठयितुम्, नर्त्तितुम्, द्रष्टुम्, पठितुम्

अभ्यासः – 170

शक्नोतेः प्रयोगे तुमुन्

कोष्ठे दत्तेन धातुना सह तुमुन्-प्रत्ययं योजयित्वा उचितं रूपं रिक्ते स्थाने लिखन्तु–
[कोष्ठ में दी गई धातु में 'तुमुन्' प्रत्यय जोड़कर रिक्त स्थान में लिखिए। Fill in the blanks by adding तुमुन् to the roots given in brackets.]

1. सः अत्र ..... शक्नोति। (स्था)
2. सः एतत् पुस्तकं ..... शक्नोति। (पठ्)
3. किं, सः अस्मिन् आसने ..... शक्नोति ? (उपविश्)
4. अहं गीताम् ..... शक्नोमि। (उपदिश्)
5. किम्, इदानीं सः गृहं ..... न शक्नोति ? (गम्)
6. न हि, इदानीं सः गृहं ..... न शक्नोति। (गम्)
7. किम्, अहम् अत्र ..... शक्नोमि ? (आगम्)
8. किम्, अहम् एकं चलचित्रं ..... शक्नोमि ? (दृश्)
9. किं, भवती एकं गीतं ..... शक्नोति ? (गा)
10. सः वृक्षम् ..... शक्नोति। (आरुह्)
11. ताः नृत्यं ..... शक्नुवन्ति। (कृ)
12. अहं काव्यं ..... न शक्नोमि। (लिख्)
13. त्वं ..... न शक्नोषि। (पच्)
14. ते छात्रे ..... शक्नुतः। (नृत्)
15. मूषकः बिलं ..... शक्नोति। (प्रविश्)

आगन्तुम्, गन्तुम्, उपवेष्टुम्, पाठयितुम्, स्थातुम्, पठितुम्, गन्तुम्, उपदेष्टुम्, द्रष्टुम्, गातुम्, प्रवेष्टुम्, नर्तितुम्, लेखितुम्, पक्तुम्, कर्तुम्, आरोढुम्

चतुर्थः स्तबकः

4.3. तृतीयः पाठः

[तृतीया]

4.3.1 अकारान्तपुंलिङ्गशब्दानां तृतीया–एकवचने प्रयोगाः

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

बालकः

हस्तः

बालकः हस्तेन लिखति।

चित्रकारः

कूर्चः

चित्रकारः कूर्चेन चित्रं निर्माति।

वृद्धा

दण्डः

वृद्धा दण्डेन कुक्कुरं ताडयति।

बालकः

चमसः

बालकः चमसेन खादति।

व्याधः



बाणः



व्याधः **बाणेन** प्रहरति

आरक्षकः

दण्डः

आरक्षकः **दण्डेन** चोरं ताडयति।

वृद्धः

उपनेत्रम्

वृद्धः **उपनेत्रेण** पश्यति।

कृषकः



हलम्



कृषकः **हलेन** कर्षति।

अभ्यासः – 171

अकारान्तशब्दानां तृतीया–एकवचने प्रयोगाः

उदाहरणानुसारं तृतीयान्तपदैः रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार तृतीयान्त पदों से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by the words ending in third case ending.]

उदा०– 1. वृद्धः (चषकः) ...चषकेण.. पिबति।

2. भीमः (वृक्षः) ..... ताडयति।

3. बालकः (मुखम्) ..... खादति।

4. रमेशः (वाहनम्) ..... आनयति।

5. जनकः (हस्तः) ..... ताडयति।

6. व्याधः (बाणः) ..... मारयति।

7. आरक्षकः (अश्वः) ..... गच्छति।

8. नृपः (गजः) ..... आगच्छति।

9. क्रीडकः (कन्दुकम्) ..... क्रीडति।

10. उद्यानकारः (जलम्) ..... सिञ्चति।

4.3.2. (क) आकारान्तस्त्रीलिङ्गशब्दानां तृतीया-एकवचने प्रयोगाः

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

बालकः

द्विचक्रिका

बालकः **द्विचक्रिकया** गच्छति।

आपणिकः

तुला

आपणिकः **तुलया** तोलयति।

महिला

छुरिका

महिला **छुरिकया** कर्तयति।

परिचारकः

कुञ्चिका

परिचारकः **कुञ्चिकया** तालकम् उद्घाटयति।

अभ्यासः – 172

उदाहरणानुसारं वाक्यानि रचयन्तु–

[उदाहरण के अनुसार वाक्यों की रचना कीजिए। Complete the sentences as shown in the example.]

उदा0–	1.	एषः	कुञ्चिका	एषः ..कुञ्चिकया.....तालकम् उद्घाटयति।
	2.	वृद्धा	माला	वृद्धा ..... जपति।
	3.	पर्यटकः	नौका	.... भ्रमति।
	4.	भक्तः	वर्तिका	.... अर्चति।
	5.	आरक्षकः	कशा	.... प्रहरति।
	6.	नृपः	शिविका	.... गच्छति।
	7.	सैन्यः	शृङ्खला	.... बध्नाति।
	8.	भीमः	गदा	.... ताडयति।
	9.	आपणिकः	पेटिका	.... नयति।
	10.	सर्पः	फणा	.... दशति।
	11.	नाविकः	नौका	.... तोलयति।
	12.	आरक्षकः	कशा	.... चौरं ताडयति।

4.3.2. (ख) ईकारान्तस्त्रीलिङ्गशब्दानां तृतीया-एकवचने प्रयोगाः

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

बालिका

संमार्जनी

बालिका **संमार्जन्या** मार्जयति।

अध्यापिका

लेखनी

अध्यापिका **लेखन्या** लिखति।

सौचिकः

सूची

सौचिकः **सूच्या** वस्त्रं सीव्यति।

महिला

द्रोणी

महिला **द्रोण्या** जलम् आनयति।

अभ्यासः – 173

ईकारान्तस्त्रीलिङ्गशब्दानां तृतीया–एकवचने प्रयोगाः

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the example.]

उदा0–	1. जननी	–	दर्वी	1.	...ज़नन्नी...	...दर्व्या...	आलोडयति।
	2. गृहिणी	–	वेल्लनी	2.	.....	.....	निर्माति।
	3. शिक्षकः	–	लेखनी	3.	.....	.....	लिखति।
	4. चित्रकारः	–	अङ्कनी	4.	.....	.....	अङ्कयति।
	5. वैज्ञानिकः	–	क्षेपणी	5.	.....	.....	गच्छति।
	6. बालिका	–	कर्तरी	6.	.....	.....	कर्तयति।
	7. गृहिणी	–	चालनी	7.	.....	.....	चालयति।
	8. वैद्यः	–	औषधसूची	8.	.....	.....	चिकित्सति।
	9. सः	–	कूपी	9.	.....	.....	जलं नयति।
	10. सरिता	–	सूची	10.	.....	.....	सीव्यति।

अभ्यासः – 174

तृतीया–एकवचने विविधाः प्रयोगाः

उदाहरणानुगुणं कोष्ठके दत्तेन शब्देन सह तृतीयाविभक्तिं संयोज्य रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार कोष्ठक में दिये गये शब्दों के साथ तृतीयाविभक्ति जोड़कर रिक्त स्थानों की पूर्ति कीजिए। Complete the sentences by adding third case ending to the words given in the brackets.]

बालकः

1.	..कन्दुकेन..	कन्दुकम्	क्रीडति ।
2.	.....	सुधाखण्डः	लिखति ।
3.	.....	द्विचक्रिका	गच्छति ।
4.	.....	कूर्चः	चित्रं रचयति ।
5.	.....	यानम्	गच्छति ।

गृहिणी

6.	.....	अङ्कनी	चित्रम् अङ्कयति ।
7.	.....	वेल्लनी	रोटिकाः निर्माति ।
8.	.....	नौका	नदीं तरति ।
9.	.....	घटः	जलम् आनयति ।
10.	.....	चालनी	तण्डुलं परिष्करोति ।

वृद्धाः

11.	.....	दण्डः	चलन्ति ।
12.	.....	उपनेत्रम्	पश्यन्ति ।
13.	.....	पादौ	गच्छन्ति ।
14.	.....	चमसः	खादन्ति ।
15.	.....	कर्तरी	कर्तयन्ति ।

अभ्यासः – 175

तृतीया–एकवचने मिश्रिताः प्रयोगाः

कोष्ठगतेन शब्देन सह तृतीयां संयोज्य वाक्यं पूरयन्तु–

[कोष्ठ में दिये गये शब्द के साथ तृतीया जोड़कर वाक्य पूरा कीजिए। Complete the sentence by adding third case ending to the words given in brackets.]

बालकः

1.	लेखनी	..लेखन्या...	लिखति।
2.	दण्डः	.....	कृष्णपटं दर्शयति।
3.	अङ्गुली	.....	निर्दिशति।
4.	हस्तः	.....	यानं स्थगयति।
5.	अङ्गुली	.....	गणयति।

कृषकः

6.	हलः	...हलेन...	कर्षति।
7.	कुम्भः	.....	सिञ्चति।
8.	कुठारः	.....	छिनत्ति।
9.	खनित्रम्	.....	खनति।
10.	लवित्रम्	.....	लुनाति।

अभ्यासः – 176

तृतीयारूपाणि

उदाहरणानुगुणं रूपाणि लिखन्तु–

[उदाहरणों के अनुसार रूपों को लिखिए। Write the forms in third case ending as shown in the examples.]

		एकवचनम्	द्विवचनम्	बहुवचनम्
उदा0–	1.	दण्डः – ..दण्डेन..	..दण्डाभ्याम्...	.....दण्डैः.....
	2.	सुधाखण्डः –	.....	.....
	3.	दीपः –	.....	.....
	4.	वृक्षः –	.....	.....
	5.	सर्पः –	.....	.....
	6.	मकरः –	.....	.....
उदा0–	7.	यानम् – .यानेन...	..यानाभ्याम्...	.....यानैः.....
	8.	पुस्तकम् –	.....	.....
	9.	सोपानम् –	.....	.....
	10.	पुष्पम् –	.....	.....
	11.	पदम् –	.....	.....
उदा0–	12.	द्विचक्रिका – द्विचक्रिकया.	द्विचक्रिकाभ्याम्.	..द्विचक्रिकाभिः....
	13.	लता –	.....	.....
	14.	दोला –	.....	.....
	15.	पुस्तिका –	.....	.....
	16.	सन्दंशिका –	.....	.....
उदा0–	17.	लेखनी – .लेखन्या..	लेखनीभ्याम्..	....लेखनीभिः.....
	18.	घटी –	.....	.....
	19.	सूची –	.....	.....
	20.	दर्वी –	.....	.....

तृतीयारूपाणि

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Read carefully.]

		एकवचनम्	द्विवचनम्	बहुवचनम्
एतत्	पुं०	एतेन	एताभ्याम्	एतैः
	नपुं०	एतेन	एताभ्याम्	एतैः
	स्त्री०	एतया	एताभ्याम्	एताभिः
तत्	पुं०	तेन	ताभ्याम्	तैः
	नपुं०	तेन	ताभ्याम्	तैः
	स्त्री०	तया	ताभ्याम्	ताभिः
भवत्	पुं०	भवता	भवद्भ्याम्	भवद्भिः
	नपुं०	भवता	भवद्भ्याम्	भवद्भिः
	स्त्री०	भवत्या	भवतीभ्याम्	भवतीभिः
सर्व	पुं०	सर्वेण	सर्वाभ्याम्	सर्वैः
	नपुं०	सर्वेण	सर्वाभ्याम्	सर्वैः
	स्त्री०	सर्वया	सर्वाभ्याम्	सर्वाभिः
अस्मद्	पुं०	मया	आवाभ्याम्	अस्माभिः
	नपुं०	मया	आवाभ्याम्	अस्माभिः
	स्त्री०	मया	आवाभ्याम्	अस्माभिः
युष्मद्	पुं०	त्वया	युवाभ्याम्	युष्माभिः
	नपुं०	त्वया	युवाभ्याम्	युष्माभिः
	स्त्री०	त्वया	युवाभ्याम्	युष्माभिः

अभ्यासः – 177

तृतीया–द्विवचने प्रयोगाः

चित्रानुगुणं रिक्तस्थानानि पूरयन्तु–

[चित्रों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as per the pictures.]

उदा0–

वयं

1. नेत्राभ्यां... पश्यामः ।
2. ..... शृणुमः ।
3. ..... चलामः ।
4. ..... नयामः ।

अभ्यासः – 177+

उदाहरणानुगुणं तृतीयाद्विवचनरूपैः रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार तृतीया द्विवचन के रूपों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with words ending in third case.]

उदा0– 1. कुलालः (दण्डौ) ....दण्डाभ्यां..... वस्तु उन्नयति ।
2. अर्चकः (दर्भौ) ..... जलं सिञ्चति ।
3. माता (चषकौ) ..... क्षीरं शीतलीकरोति ।
4. पाचकः (चुल्ल्यौ) ..... पाकं करोति ।
5. अर्जुनः (हस्तौ) ..... बाणप्रयोगं करोति ।
6. सा (अङ्गुल्यौ) ..... शब्दं करोति ।
7. कर्मकरी (द्रोण्यौ) ..... जलम् आनयति ।
8. कृषकः (वृषभौ) ..... क्षेत्रं कर्षति ।
9. मातुलः (मुष्ट्यौ) ..... प्रहरति ।
10. कारयानं (चक्रे) ..... न चलति ।
11. बालकः (नेत्रे) ..... पश्यति ।

त्रिषु वचनेषु तृतीयायाः प्रयोगाः [पादेन / पादाभ्याम्/ पादैः]

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Read carefully.]

- बकः एकेन पादेन तिष्ठति।
- वयं पादाभ्यां चलामः।
- हरिणाः पादैः चलन्ति।

अभ्यासः – 178

पादेन / पादाभ्याम् / पादैः

रिक्तस्थानानि पूरयन्तु–

[रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks.]

उदा0– 1. गजाः .....पादैः.....

2. अश्वाः .....

3. मनुष्याः ..पादाभ्याम्..

4. खञ्जाः .....

5. बकाः .....

6. वानराः .....

7. जनाः .....

8. वनमानवाः .....

9. शुकाः .....

10. चटकाः .....

चलन्ति।

अभ्यासः – 179

तृतीयायाः त्रिषु वचनेषु प्रयोगाः

उदाहरणानुसारं अथवा कोष्ठगतेन शब्देन सह तृतीयाविभक्तिं संयोज्य रिक्तस्थानानि पूरयन्तु-
[उदाहरण के अनुसार कोष्ठ में दिये गये शब्दों के साथ तृतीया विभक्ति जोड़कर रिक्त स्थानों की पूर्ति कीजिए। Complete the following sentences by adding third case ending to the words given in brackets.]

लिखति	शृणोति	पश्यति	गच्छति

कः केन किं करोति ?

यथा– 1. वृद्धः ..दण्डेन... (दण्डः) गच्छति ।
2. छात्रः ..... (लेखनी) लिखति ।
3. वयं ..... (कर्णौ) शृणुमः ।
4. वयं ..... (पादौ) चलामः ।
5. वयं ..... (हस्तः) लिखामः ।
6. वयं ..... (मुखम्) वदामः ।
7. वयं ..... (जिह्वा) माधुर्यम् अनुभवामः ।
8. भक्ताः ..... (हृदयम्) ईश्वरम् अर्चन्ति ।
9. सिंहाः ..... (नखाः) जीवान् पीडयन्ति ।
10. जनाः ..... (नेत्रे) पश्यन्ति ।
11. वानराः ..... (दन्ताः) खादन्ति ।
12. गृहिण्यः ..... (घटाः) जलम् आनयन्ति ।
13. बालिका ..... (चमसः) मिश्रयति ।
14. बालकः ..... (नासिका) जिघ्रति ।
15. महिला ..... (कङ्कतम्) प्रसाधयति ।

अभ्यासः – 180

तृतीयायाम् अन्ये प्रयोगाः

उदाहरणानुसारं कोष्ठगते शब्दे तृतीयां संयोज्य रिक्तस्थानानि पूरयन्तु–
[उदाहरण के अनुसार कोष्ठ में दिये गये शब्दों में तृतीया विभक्ति जोड़कर रिक्त स्थानों की पूर्ति कीजिए। Complete the following sentences by adding third case ending to the words given in brackets.]

उदा०–	1. वयम्	.....आनन्देन.....	निवसामः।	(आनन्दः)
	2. ते	.....	जीवन्ति।	(कष्टम्)
	3. सः	.....	वसति।	(सुखम्)
	4. हरीशः	.....	तिष्ठति।	(सन्तोषः)
	5. शिक्षकः	.....	ताडयति।	(कोपः)
	6. अलसः	.....	जीवति।	(आलस्यम्)
	7. जननी	.....	पाकं करोति।	(अनायासः)
	8. दुःखितः	.....	वदति।	(उद्वेगः)
	9. सन्तुष्टः	.....	जीवति।	(वैराग्यम्)
	10. जनाः	.....	निवसन्ति।	(शान्तभावः)
	11. ताः	.....	कालं यापयन्ति।	(वार्तालापः)
	12. एताः	.....	दिनं यापयन्ति।	(जल्पनम्)
	13. वृद्धः	.....	घण्टां यापयति।	(पठनम्)
	14. बालकः	.....	द्विचक्रिकां चालयति।	(क्रीडा)
	15. सचिवः	.....	सन्तोषं जनयति।	(आगमनम्)
	16. गृहजनः	.....	स्वागतीकरोति।	(आदरः)
	17. अलसः	.....	कार्यं करोति।	(उपेक्षा)
	18. त्वम्	.....	मा व्यवहर।	(ईर्ष्या)
	19. दरिद्रः	.....	धनिकं पश्यति।	(असूया)
	20. भवान्	.....	कीर्तिं प्राप्नोतु।	(त्यागः)

अभ्यासः – 181

भाववाचकानां प्रयोगे तृतीया

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the example.]

उदा0–	1. सः	.....समीचीनतया....	लिखति।	(समीचीनता)
	2. अध्यापकः	.....	पाठयति।	(सरलता)
	3. छात्रा	.....	लिखति।	(स्पष्टता)
	4. चित्रकारः	.....	चित्रं करोति।	(सुचारुता)
	5. कृषकः	.....	कर्षति।	(पूर्णता)
	6. व्याख्याकारः	.....	व्याख्यां करोति।	(स्पष्टता)
	7. कविः	.....	निवसति।	(एकाकिता)
	8. महिला	.....	व्यवहरति।	(भीरुता)
	9. राक्षसः	.....	गर्जति।	(भयङ्करता)
	10. व्याघ्रः	.....	पश्यति।	(क्रूरता)
	11. तरुणी	.....	लिखति।	(सुन्दरता)
	12. सः	.....	कटं प्रसारयति।	(विशालता)
	13. सज्जनः	.....	जीवति।	(ऋजुता)
	14. जननी	.....	पाकं कृतवती।	(मधुरता)
	15. वैद्यः	.....	शल्यचिकित्सां कृतवान्।	(समर्थता)
	16. ग्रन्थकारः	.....	ग्रन्थं रचयति।	(विस्तृतता)
	17. कथाकारः	.....	कथां कथयति।	(मनोरञ्जकता)
	18. ग्रामीणः	.....	नगरं दृष्टवान्।	(इदम्प्रथमता)
	19. ऐन्द्रजालिकः	.....	कौशलं दर्शयति।	(आकस्मिकता)

अभ्यासः – 182

तृतीयायां मिश्रिताः प्रयोगाः

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the examples.]

उदा०– 1. बालकः (द्विचक्रिका) ....द्विचक्रिकया..... गच्छति।
2. वैदेशिकाः (विमानम्) ..... भारतं द्रष्टुम् आगच्छन्ति।
3. नवपरिणीता (शिबिका) ..... श्वसुरगृहं गच्छति।
4. वयम् (अश्वशकटः) ..... गच्छामः।
5. यूयं (रथः) ..... कुत्र गच्छथ ?
6. जनाः (लोकयानम्) ..... यात्रां कुर्वन्ति।
7. एतौ (वृषभशकटः) ..... ग्रामं गच्छतः।

उदा०– 8. अहं (संस्कृतम्) ...संस्कृतेन..... वदामि।
9. गूर्जराः (गूर्जरभाषा) ..... वदन्ति।
10. भारतीयाः (राष्ट्रभाषा) ..... वदन्ति।
11. बालकाः (मातृभाषा) ..... व्यवहरन्ति।
12. इदानीं केचन एव (पालीभाषा) ..... वक्तुं शक्नुवन्ति।
13. इदानीं लक्षाधिकाः जनाः (संस्कृतभाषा) ..... व्यवहरन्ति।

उदा०– 14. एतां लेखनीम् अहं (विंशतिरूप्यकाणि) विंशतिरूप्यकैः... क्रीतवती।
15. सा (एकं रूप्यकम्) ..... चाकलेहं क्रेतुम् इच्छति।
16. वयं (दशरूप्यकाणि) ..... चलचित्रचिटिकां क्रीत्वा चलचित्रं पश्यामः।
17. एते धनिकाः (सहस्ररूप्यकाणि) ..... वायुयानचिटिकां क्रीत्वा भ्रमितुं गच्छन्ति।
18. आवां (द्वे रूप्यके) इच्छावः ..... फलं क्रेतुम् इच्छावः।
19. ताः (शतरूप्यकाणि) ..... वस्त्राणि क्रीतवत्यः।
20. एषः (लक्षरूप्यकाणि) ..... भवनं क्रीतवान्।

सह–योगे तृतीया

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

जनकः

पुत्रः

जनकः **पुत्रेण** सह अस्ति।

अनुजः

अग्रजा

अनुजः **अग्रजया** सह उपविशति।

वृद्धा

पौत्री

वृद्धा **पौत्र्या** सह उपविशति।

पुत्रः

जननी

पुत्रः **जनन्या** सह गच्छति।

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

त्वं मया सह चल।

अहं भवता सह आगच्छामि।

त्वं मया सह आगच्छ।

त्वं मया सह उपरि चल।

त्वं मया सह क्रीड।

अहं भवता सह खादामि।

अभ्यासः – 183

सह–योगे तृतीया

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the examples.]

अहं	उदा0– 1.	...पुत्रेण...	पुत्रः	सह खेलामि।
	2.	.....	जनाः	सह तरामि।
	3.	.....	जनकः	सह वार्तालापं करोमि।
	4.	.....	मित्रम्	सह गृहं गच्छामि।
	5.	.....	अनुजः	सह आगच्छामि।
आवां	उदा0– 1.	...त्वया...	त्वम्	सह गच्छावः।
	2.	.....	मित्रम्	सह भ्रमावः।
	3.	.....	भवान्	सह चलावः।
	4.	.....	लता	सह उपविशावः।
	5.	.....	सः	सह वदावः।
वयं	उदा0– 1.	...मित्रैः...	मित्राणि	सह पठामः।
	2.	.....	बालकाः	सह धावामः।
	3.	.....	छात्राः	सह निवसामः।
	4.	.....	बालिका	सह खादामः।
	5.	.....	पर्यटकाः	सह दर्शनं कुर्मः।

अभ्यासः – 184

सह–योगे तृतीया

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the example.]

उदा०– 1. रामः सीता रामः ...सीतया..... सह गच्छति।

2. कृष्णः राधा .... विहरति।

3. मोहनः राकेशः .... भ्रमति।

4. कृषकः हलम् .... क्षेत्रं गच्छति।

5. मित्रम् मित्रम् .... आलपति।

6. अध्यापकः शिष्यः .... उपविशति।

7. जननी पुत्री .... अन्नं पचति।

8. अनुराधा मातुलः .... आपणं गच्छति।

9. भगिनी अग्रजः .... विद्यालयं गच्छति।

10. सुधीरः पत्नी .... चलचित्रं द्रष्टुम् इच्छति।

11. वृद्धः वृद्धा .... वार्त्तां करोति।

12. बालिकाः अध्यापिकाः .... राष्ट्रगीतं गायन्ति।

13. सचिवः लिपिकाराः .... आलपति।

14. प्रबन्धकः कर्मकराः .... व्यवस्थां पश्यति।

15. अभिनायकाः अभिनेत्र्यः .... नृत्यन्ति।

अभ्यासः – 185

सर्वनामशब्दानां तृतीयारूपाणि

उदाहरणानुगुणं रिक्तस्थानानि तृतीयान्तपदैः पूरयन्तु–

[उदाहरण के अनुसार तृतीयान्त पदों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with words ending in third case as per the example.]

उदा0–	1.	.....मया.....	(अहम्)	
	2.	.....	(भवान्)	
	3.	.....	(भवती)	
	4.	.....	(सः)	
	5.	.....	(एषः)	
	6.	.....	(सा)	
	7.	.....	(त्वम्)	
	8.	.....	(एषा)	
	9.	.....	(वयम्)	
सः	10.	.....	(भवन्तः)	सह गच्छति।
	11.	.....	(यूयम्)	
	12.	.....	(भवत्यः)	
	13.	.....	(ते छात्राः)	
	14.	.....	(ताः बलिकाः)	
	15.	.....	(एतौ)	
	16.	.....	(आवाम्)	
	17.	.....	(युवाम्)	
	18.	.....	(भक्तौ)	
	19.	.....	(भवत्यौ)	
	20.	.....	(तौ)	

अभ्यासः – 186

सह–योगे तृतीयाप्रयोगाः

उदाहरणानुसारं रिक्तस्थानेषु तृतीया बहुवचनरूपाणि लिखन्तु–

[उदाहरण के अनुसार रिक्त स्थानों में तृतीया विभक्ति के बहुवचन के रूपों को लिखिए। Fill in the blanks with words in third case ending in plural number as per the example.]

उदा0– 1. ते ..अस्माभिः.. सह क्रीडन्ति। (वयम्)

2. वयं ..... सह पठामः। (ताः)

3. अहं ..... सह खेलामि। (यूयम्)

4. सः .... सह आगच्छति। (भवन्तः)

5. यूयं ..... सह क्रीडथ। (वानराः)

6. जननी ..... सह गच्छति। (बालिकाः)

7. गोपालः ..... सह प्रत्यागच्छति। (वत्साः)

8. त्वं ..... सह आगच्छ। (मित्राणि)

9. सा .... सह सम्भाषणं करोति। (ते बालिके)

10. जननी ..... सह पचति। (पुत्र्यः)

11. ..... सह का आसीत् ? (भवत्यः)

12. ..... सह अध्यापिका आसीत्। (वयम्)

13. ..... सह मृदुतया व्यवहरतु। (सर्वे)

14. ग्रामीणः ..... सह विपणिं गच्छति। (परिवारजनाः)

15. भवन्तः ..... सह मा भ्रमन्तु। (दुष्टाः)

16. सर्वे जनाः ..... सह उपवेष्टुम् इच्छन्ति। (सज्जनाः)

17. अध्यापकः ..... सह पुस्तकालयं गच्छति। (वयम्)

18. यूयम् ..... सह कुत्र अगच्छत ? (एताः)

19. पुत्रः ..... सह गन्तुम् इच्छति। (जननी)

20. वयम् .... सह उपवेष्टुम् इच्छामः। (एते बालिके)

अभ्यासः – 187

सह–योगे तृतीयाप्रयोगाः

उदाहरणानुगुणं तृतीयान्तपदैः रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार तृतीयान्त पदों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with words ending in third case as per the example.]

उदा0– 1. छात्राः ..अध्यापकैः.. सह प्रयोगशालां गच्छन्ति। (अध्यापकाः)

2. बालिकाः ..... सह देवालयम् आगच्छन्ति। (सख्यः)

3. वृद्धः ..... सह आपणं गच्छति। (बालकः)

4. यूयम् ..... सह कन्दुकेन क्रीडत। (वयम्)

5. वयं ..... सह चायं पिबामः। (यूयम्)

6. अहम् ..... सह न वदामि। (एते)

7. तरुणाः ..... सह भ्रमणं कुर्वन्ति। (वृद्धाः)

8. कुक्कुराः ..... सह धावन्ति। (वानराः)

9. वत्साः ..... सह जलं पिबन्ति। (अजाः)

10. हंसाः ..... सह तरन्ति। (बकाः)

4.3.3 विना–योगे तृतीया

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

रामेण .....सह..... सीता अस्ति।

रामेण विना सीता अस्ति।

पुत्रेण सह जनकः अस्ति।



पुत्रेण विना जनकः अस्ति।

अभ्यासः – 188

विना–योगे तृतीया प्रयोगाः

मञ्जूषातः उचितं पदं चित्वा तस्य उचितेन रूपेण रिक्तस्थानानि पूरयन्तु–
[मञ्जूषा में प्रदत्त पदों के उचितरूपों से रिक्तस्थानों की पूर्ति कीजिए। Fill in the blanks with suitable forms of words from the box.]

उदा0– 1. मीनाः ....जलेन..... विना न जीवन्ति।

2. बालः ..... विना रोदिति।

3. दुर्जनाः ..... विना न तिष्ठन्ति।

4. महिलाः ..... विना न उपविशन्ति।

5. अध्यापकाः ..... विना न वसन्ति।

6. बालकाः ..... विना मूर्खाः भवन्ति।

7. जनाः ..... विना दुर्बलाः भवन्ति।

8. वृद्धः ..... विना न चलति।

9. अन्धकारः ..... विना न अपगच्छति।

अपकारः,	*जलम्,*	*अन्नम्*	*वार्ता,*
पुस्तकानि,	*अध्ययनम्,*	*सूर्यः,*	*दुग्धम्,*
दण्डः			

अभ्यासः – 189

विना–योगे तृतीयाप्रयोगाः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the example.]

उदा0– 1. जननी ....पुत्राभ्यां..... विना आपणं गतवती। (पुत्रौ)

2. अध्यापकाः ..... विना प्रयोगशालां गच्छन्ति। (छात्राः)

3. मीनाः ..... विना न जीवन्ति। (जलम्)

4. सुखं ..... विना न मिलति। (दुःखम्)

5. लेखकः ..... विना न तिष्ठति। (पुस्तकानि)

6. कुमुदम् ..... विना न विकसति। (चन्द्रः)

7. खगः ..... विना न गच्छति। (पतत्रे)

8. खाद्यं ..... विना रुचिकरं न भवति। (लवणम्)

9. गृहं ..... विना निरर्थकं भवति। (गृहिणी)

10. शास्त्रम् ..... विना नश्यति। (अभ्यासम्)

अभ्यासः – 190

सह / विना – योगे तृतीयाप्रयोगाः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the example.]

उदा0– 1. ....रामः. ....सीतया.. रामः / सीता सह वनं गच्छति।

2. .... लक्ष्मणः / उर्मिला विना वनं गच्छति।

3. .... जननी / पुत्री विना न तिष्ठति।

4. .... जनकः / पुत्रः सह मन्दिरम् आगच्छति।

5. .... दशरथः / रामः विना न जीवति।

6. .... अनुजः / अग्रजः सह प्रातः भ्रमणं करोति।

7. .... स्वास्थ्यम् / व्यायामः विना न भवति।

8. .... कमलम् / सूर्यः विना न विकसति।

9. .... शास्त्राभ्यासः / पठनम् विना न भवति।

10. .... कमलम् / पङ्कः विना न भवति।

चतुर्थः स्तबकः

4.4. चतुर्थः पाठः

[चतुर्थी]

4.4.1. दानार्थे चतुर्थी

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

गृहिणी



भिक्षुकः

गृहिणी **भिक्षुकाय** भिक्षां यच्छति (ददाति)।

कर्णः

इन्द्रः

कर्णः **इन्द्राय** कवचं कुण्डलं च यच्छति।

एकलव्यः

द्रोणाचार्यः

एकलव्यः **द्रोणाचार्याय** अङ्गुष्ठं यच्छति।

शिष्यः

आचार्यः



शिष्यः **आचार्याय** गुरुदक्षिणां ददाति।

जननी

बालकः

जननी बालकाय दुग्धं यच्छति ।

अग्रजः

अनुजा

अग्रजः अनुजायै वस्त्रं ददाति ।

पतिः

पत्नी

पतिः पत्न्यै उपहारं ददाति ।

जनकः

पुत्री

जनकः पुत्र्यै धनं ददाति ।

अभ्यासः – 191

दानार्थे चतुर्थी

अधोलिखितानि वाक्यानि उदाहरणानुगुणं पूरयन्तु–

[उदाहरणों के अनुसार अधोलिखित वाक्यों की पूर्ति कीजिए। Complete the following sentences as shown in the examples.]

उदा0–	1. जननी, ..पुत्रः..... ।	1.	जननी ...पुत्राय... मोदकं.. यच्छति ददाति ।	
	2. अध्यापकः, छात्रः ।	2.	अध्यापकः ..... पुस्तकं यच्छति ।	
	3. भक्तः, सूर्यः ।	3.	.... अर्घ्यं यच्छति ।	
	4. अर्चकः, देवः ।	4.	.... पुष्पं यच्छति ।	
	5. पूजकः, भक्तः ।	5.	.... प्रसादं यच्छति ।	
उदा0–	6. अग्रजः, ..अनुजा.. ।	6.	...अग्रजः... ..अनुजायै अङ्कनीं यच्छति ।	
	7. जनकः, कन्या ।	7.	.... कर्कटीं यच्छति ।	
	8. बालकः, पाचिका ।	8.	.... वेल्लनीं यच्छति ।	
	9. शिक्षकः, छात्रा ।	9.	.... लेखनीं यच्छति ।	
	10. गृहिणी, बुभुक्षिता ।	10.	.... भोजनं यच्छति ।	
उदा0–	11. जननी, ...पुत्री... ।	11.	...जननी... ...पुत्र्यै.. मालां यच्छति ।	
	12. गृहस्थः, गृहिणी ।	12.	.... शाटिकां यच्छति ।	
	13. पाचकः, विद्यार्थिनी ।	13.	.... रोटिकां यच्छति ।	
	14. धनिकः, भिक्षुकी ।	14.	.... वस्त्रं यच्छति ।	
	15. वैद्यः, नन्दिनी ।	15.	.... औषधं यच्छति ।	

अभ्यासः – 192

चतुर्थीरूपाणि

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the examples.]

			एकवचनम्	द्विवचनम्	बहुवचनम्
उदा०–	1.	दण्डः –	दण्डाय	दण्डाभ्याम्	दण्डेभ्यः
पुं०–	2.	सुधाखण्डः –	.....	.....	.....
	3.	वृक्षः –	.....	.....	.....
	4.	सर्पः –	.....	.....	.....
	5.	दीपः –	.....	.....	.....
	6.	रामः –	.....	.....	.....
नपुं०–	7.	यानम् –	यानाय	यानाभ्याम्	यानेभ्यः
	8.	सोपानम् –	.....	.....	.....
	9.	पुस्तकम् –	.....	.....	.....
	10.	पत्रम् –	.....	.....	.....
	11.	पुष्पम् –	.....	.....	.....
	12.	यन्त्रम् –	.....	.....	.....
स्त्री०–	13.	द्विचक्रिका –	द्विचक्रिकायै	द्विचक्रिकाभ्याम्	द्विचक्रिकाभ्यः
	14.	लता –	.....	.....	.....
	15.	माला –	.....	.....	.....
	16.	पुस्तिका –	.....	.....	.....
	17.	पाठशाला –	.....	.....	.....
	18.	शाटिका –	.....	.....	.....
	19.	अङ्कनी –	अङ्कन्यै	.....	अङ्कनीभ्यः
	20.	लेखनी –	.....	.....	.....
	21.	घटी –	.....	.....	.....
	22.	सूची –	.....	.....	.....
	23.	गृहिणी –	.....	.....	.....
	24.	दर्वी –	.....	.....	.....

सर्वनामशब्दानां चतुर्थीरूपाणि

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

		एकवचनम्	द्विवचनम्	बहुवचनम्
एतत्	पुं०	एतस्मै	एताभ्याम्	एतेभ्यः
	नपुं०	एतस्मै	एताभ्याम्	एतेभ्यः
	स्त्री०	एतस्यै	एताभ्याम्	एताभ्यः ।
तत्	पुं०	तस्मै	ताभ्याम्	तेभ्यः ।
	नपुं०	तस्मै	ताभ्याम्	तेभ्यः ।
	स्त्री०	तस्यै	ताभ्याम्	ताभ्यः ।
भवत्	पुं०	भवते	भवद्भ्याम्	भवद्भ्यः ।
	नपुं०	भवते	भवद्भ्याम्	भवद्भ्यः ।
	स्त्री०	भवत्यै	भवतीभ्याम्	भवतीभ्यः ।
सर्व	पुं०	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः ।
	नपुं०	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः ।
	स्त्री०	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः ।
अस्मद्	पुं०	मह्यम्	आवाभ्याम्	अस्मभ्यम् ।
	नपुं०	मह्यम्	आवाभ्याम्	अस्मभ्यम् ।
	स्त्री०	मह्यम्	आवाभ्याम्	अस्मभ्यम् ।
युष्मद्	पुं०	तुभ्यम्	युवाभ्याम्	युष्मभ्यम् ।
	नपुं०	तुभ्यम्	युवाभ्याम्	युष्मभ्यम् ।
	स्त्री०	तुभ्यम्	युवाभ्याम्	युष्मभ्यम् ।

अभ्यासः – 193

क्रियार्थायां क्रियायां चतुर्थी

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the example.]

बालकाः **किमर्थं** विद्यालयं गच्छन्ति ? .....अध्ययनाय... (अध्ययनम्)

उदा0–1. छात्राः **किमर्थं** विद्यालयं गच्छन्ति ? छात्राः .अध्ययनाय..... विद्यालयं गच्छन्ति। (अध्ययनम्)

2. तरुणाः **किमर्थं** चित्रालयं गच्छन्ति ? .... (चलचित्रदर्शनम्)

3. छात्राः **किमर्थं** पठन्ति ? .... (ज्ञानार्जनम्)

4. जनाः **किमर्थं** वायुविहारं कुर्वन्ति ? .... (स्वास्थ्यरक्षणम्)

5. जनाः **किमर्थं** भोजनं कुर्वन्ति ? .... (जीवनम्)

6. बालः **किमर्थं** रोदनं करोति ? .... (दुग्धपानम्)

7. पर्यटकाः **किमर्थम्** आगच्छन्ति ? .... (भ्रमणम्)

8. बालकाः **किमर्थं** कोलाहलं कुर्वन्ति ? .... (गृहगमनम्)

9. जनाः **किमर्थं** तत्र समवेताः सन्ति ? ....(अवलोकनम्)

10. युवकः **किमर्थं** योगासनं करोति ? .... (आरोग्यवर्धनम्)

अभ्यासः – 194

प्रश्नः– किमर्थम् ..... ?
उत्तरम्– .....

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the example.]

यथा- 1. वयं **किमर्थं** विद्यालयं गच्छामः ?
वयम्... अध्ययनाय विद्यालयं.. गच्छामः.। (अध्ययनम्)

2. यूयं **किमर्थं** प्रयागं गच्छथ ?
....। (गङ्गास्नानम्)

3. जनाः **किमर्थं** मुम्बईनगरीं गच्छन्ति ?
....। (समुद्रदर्शनम्)

4. पाचकः **किमर्थं** पाकशालां गच्छति।
....। (भोजननिर्माणम्)

5. वृक्षाः **किमर्थं** फलन्ति ?
....। (परोपकारः)

6. वयं **किमर्थं** प्रार्थनां कुर्मः ?
....। (मानवकल्याणम्)

7. ते **किमर्थं** मन्दिरं गच्छन्ति ?
....। (अर्चनम्)

8. त्वं **किमर्थं** विदेशं गच्छसि ?
....। (अनुसन्धानम्)

9. भवत्यौ **किमर्थं** जलाशयं गच्छतः ?
....। (नौकाविहारः)

10. भवत्यः **किमर्थं** भोजनालयं गच्छन्ति ?
....। (भोजनम्)

अभ्यासः – 195

किमर्थम् / कस्मै

उत्तराणि दृष्ट्वा उदाहरणानुगुणं प्रश्नान् लिखन्तु–
[उदाहरणों के अनुसार उत्तरों को देखकर प्रश्नों को लिखिए। Read the examples carefully and then frame questions to the given answers.]

उदा0– उ0– हरीशः भोजनाय गच्छति।
प्र0– .हरीशः. किमर्थं .गच्छति.. ?

1. उ0– छात्रः अध्ययनाय वसति।
प्र0– .... ?

उदा0– 2. उ0– नृपः ग्रन्थकाराय पुरस्कारं ददाति।
प्र0– ..नृपः... ..कस्मै. पुरस्कारं.. .ददाति... ?

3. उ0– धनिकः भिक्षुकाय धनं ददाति ?
प्र0– .... ?

4. उ0– वृद्धः प्रातः भ्रमणाय गच्छति।
प्र0– .... ?

5. उ0– क्रीडकः क्रीडनाय गच्छति।
प्र0– .... ?

6. उ0– जनकः देवाय अर्घ्यम् अर्पयति।
प्र0– .... ?

7. उ0– यतिवरः ध्यानाय उपविशति।
प्र0– .... ?

8. उ0– बालकः पठनाय आगच्छति।
प्र0– .... ?

9. उ0– आञ्जनेयः रामाय चूडामणिं ददाति।
प्र0– .... ?

10. उ0– भक्तः देवाय निवेदयति।
प्र0– .... ?

अभ्यासः – 196

दानार्थे चतुर्थी प्रयोगाः

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the examples.]

नृपः — **यच्छति/ददाति**

1.	..भिक्षुकेभ्यः..	भिक्षुकाः	भिक्षां
2.	.....	निर्धनाः	धनं
3.	.....	अध्यापकाः	उपायनानि
4.	.....	बालकाः	मोदकानि
5.	.....	ब्राह्मणः	क्षेत्रं

जननी — **यच्छति/ददाति**

6.	....पुत्राय....	पुत्रः	खाद्यं
7.	.....	कन्या	शाटिकां
8.	.....	रजकी	वस्त्रं
9.	.....	बालिका	फलं
10.	.....	बालिकाः	पुस्तकानि

वृद्धा — **यच्छति/ददाति**

11.	...प्रपौत्राय...	प्रपौत्रः	उपदेशं
12.	.....	विनम्राः	आशीर्वादं
13.	.....	आश्रिताः	रूप्यकाणि
14.	.....	दुर्जनः	अभिशापं
15.	.....	प्रपौत्री	मोदकानि

अभ्यासः – 197

दानार्थे चतुर्थी–प्रयोगाः

उदाहरणानुगुणं चतुर्थ्यन्तपदैः रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार चतुर्थ्यन्त पदों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with words ending in fourth (dative) case as shown in the examples.]

उदा0–	1. भगिनी	..अनुजाय..	अनुजः	मोदकं यच्छति/ददाति।
	2. पुत्री	....जननयै...	जननी	रोटिकां यच्छति/ददाति।
	3. शिक्षकाः	.....	छात्राः	पुस्तकानि यच्छन्ति/ददति।
	4. त्वं	.....	अहम्	अङ्कनीं यच्छसि/ददासि।
	5. युवां	.....	भिक्षुकौ	नाणके यच्छथः/दत्थ।
	6. सः	.....	भगिनी	उपायनं यच्छति/ददाति।
	7. भवान्	.....	सौचिकः	वस्त्रं यच्छति/ददाति।
	8. भवती	.....	सा	किं यच्छति/ददाति ?
	9. अहं	.....	मित्रम्	घटीं यच्छामि/ददामि।
	10. नन्दिनी	.....	त्वम्	सुधाखण्डं यच्छति/ददाति।

4.4.2 रोचतेः प्रयोगे चतुर्थी

'अ' भागस्य शब्देभ्यः समुचितविभक्तिप्रयोगेण 'आ' भागे वाक्यानि पूरयन्तु–
['अ' भाग के शब्दों से समुचित विभक्ति का प्रयोग करते हुए 'आ' भाग में वाक्यों को पूरा कीजिए। Complete the following sentences in part 'अ' joining the proper ending with words given in part 'आ']

मह्यं मोदकं रोचते।

	(अ)	(आ)
उदा0– 1.	बालकः, मोदकम्।	1. ...बालकाय... मोदकं रोचते।
2.	श्रेष्ठः, आदरः।	2. .... रोचते।
3.	मित्रम्, स्नेहः।	3. .... रोचते।
4.	देवः, भक्तिः।	4. .... रोचते।
5.	मीनः, जलम्।	5. .... रोचते।
6.	सर्पः, पवनः।	6. .... रोचते।
7.	बालिका, पुष्पम्।	7. .... रोचते।
8.	यतिवरः, आश्रमः।	8. .... रोचते।
9.	अहम्, कदलीफलम्।	9. .... रोचते।
10.	वयम्, संस्कृतम्।	10. .... रोचते।

अभ्यासः – 198

रोचतेः प्रयोगे चतुर्थी

कस्मै रोचते, कस्मै न रोचते इति कोष्ठके निर्दिष्टम् अस्ति। तत्र चतुर्थीविभक्तिं संयोज्य वाक्यानि रचयन्तु–

[किसको क्या अच्छा लगता है और क्या नहीं ? यह कोष्ठ मे प्रदर्शित है। उस शब्द में चतुर्थी विभक्ति जोड़कर वाक्यों की रचना कीजिए। What is liked and what is not liked bywhom is shown in the brackets. Complete the sentences by adding fourth case-ending to them.]

उदा०–	(बालकः)	...बालकाय...	मधुरं रोचते।
	(एषः)	....एतस्मै.....	अम्लं न रोचते।
1.	(सः)	.....	कलहः न रोचते।
2.	(सीता)	.....	पायसं रोचते।
3.	(अहम्)	.....	संस्कृतं रोचते।
4.	(सा)	.....	गणितं न रोचते।
5.	(वयम्)	.....	मधुरं रोचते।
6.	(माला)	.....	चित्रं रोचते।
7.	(पण्डिताः)	.....	वादः रोचते।
8.	(मूर्खाः)	.....	शास्त्रं न रोचते।
9.	(अध्यापकः)	.....	अध्यापनं रोचते।
10.	(पुत्री)	.....	गीतं रोचते।
11.	(पुत्रः)	.....	क्रीडा रोचते।
12.	(जनकः)	.....	चित्रं रोचते।
13.	(जननी)	.....	चित्रं न रोचते।
14.	(एषा)	.....	ओदनं रोचते।
15.	(सा)	.....	रोटिका न रोचते।
16.	(पितामही)	.....	पुराणं रोचते।
17.	(पितामहः)	.....	चलचित्रगानं न रोचते।
18.	(छात्राः)	.....	क्रीडा रोचते।
19.	(मित्रम्)	.....	कार्यं रोचते।
20.	(अलसः)	.....	कार्यं न रोचते।

अभ्यासः – 199

4.4.3 तादर्थ्ये चतुर्थी

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks as shown in the examples.]

जननी → **आनयति**

1.	.....मह्यं....	अहम्	मिष्टान्नम्
2.	.....	त्वम्	फलम्
3.	.....	सा	शाटिकाम्
4.	.....	सः	लेखनीम्
5.	.....	एषः	अङ्कनीम्

शिक्षकः → **आनयति**

6.	....छात्रेभ्यः..	छात्राः	पुस्तकानि
7.	.....	छात्रा	अङ्कनीम्
8.	.....	चित्रकारः	पटम्
9.	.....	गवेषकाः	पठनसामग्रीम्
10.	.....	पुत्रः	मोदकम्

एषा → **आनयति**

11.	...शिक्षकाय..	शिक्षकः	सुधाखण्डम्
12.	.....	यूयम्	तक्रम्
13.	.....	आवाम्	उपाहारम्
14.	.....	एते	फलम्
15.	.....	वयम्	जलम्

त्वम् → क्रीणासि

16.	....एताभ्यां...	एतौ	वस्त्राणि
17.	.....	सः	फलं
18.	.....	ते	पुस्तकानि
19.	.....	एषा	मालां
20.	.....	तौ	लेखन्यौ

अहम् → क्रीणामि

21.	.....तुभ्यं....	त्वम्	कागदं
22.	.....	युवाम्	कर्कटीः
23.	.....	ताः	करवस्त्राणि
24.	.....	एताः	शाटिकाः
25.	.....	भवती	पुष्पं

जनकः → नयति

26.	.....	लता	मोदकं
27.	.....	सुदेशः	फलानि
28.	.....	ताः	शाटिकाः
29.	.....	जननी	आभूषणानि
30.	.....	अनुजौ	वस्त्राणि

अभ्यासः – 200

4.4.4 क्रुध्–द्रुह्–असूया–ईर्ष्या–प्रयोगे चतुर्थी

उदाहरणानुगुणं रिक्तस्थानेषु चतुर्थ्यन्तरूपाणि लिखन्तु–

[उदाहरणों के अनुसार रिक्तस्थानों में चतुर्थी विभक्ति के रूपों को लिखिए। Write down the forms of fourth case-ending in the given blanks.]

I ...कः.. ....कस्मै..... ..क्रुध्यति ... ?

उदा0–	1. रावणः	...रामाय....	रामः	
	2. कंसः	.....	कृष्णः	
	3. दुर्योधनः	.....	युधिष्ठिरः	क्रुध्यति
	4. कर्णः	.....	अर्जुनः	
	5. दुर्जनः	.....	सज्जनः	

II ...कः.. ....कस्मै..... ..ईर्ष्यति ... ?

उदा0–	6. देवाः	..राक्षसेभ्यः...	राक्षसाः	
	7. राक्षसाः	.....	देवाः	
	8. कौरवाः	.....	पाण्डवाः	ईर्ष्यन्ति
	9. खलाः	.....	सज्जनाः	
	10. निर्धनाः	.....	धनिकाः	

III ...कः.. ....कस्मै..... ..द्रुह्यति.... ?

उदा0– 11. ताडका ...रामाय....

12. पूतना .....

13. तारकासुरः .....

14. महिषासुरः .....

15. शुक्राचार्यः .....

रामः

कृष्णः

कुमारः

दुर्गा

देवाः

द्रुह्यति

IV .... ?

उदा0– 16. चोरः ..सज्जनेभ्यः..

17. शूर्पणखा .....

18. नकुलः .....

19. महिला .....

20. भिक्षुकः .....

सज्जनाः

रामलक्ष्मणौ

सर्पाः

महिला

धनिकाः

असूयति

पञ्चमः स्तबकः

5.1 प्रथमः पाठः

[पञ्चमी]

5.1.1 पञ्चमीप्रयोगाः

ध्यानेन पठन्तु-

[ध्यान से पढ़िए। Please read carefully.]

भटः

अश्वः

भटः अश्वात् पतति ।

कृषकः

ग्रामः

कृषकः ग्रामात् आगच्छति ।

महिला

पाकशाला

महिला पाकशालायाः आगच्छति ।

मुनिवरः

नदी

मुनिवरः नद्याः आगच्छति ।

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

वृक्षः

आम्रम्

वृक्षात् आम्रं पतति।

बालकः

विद्यालयः

बालकः विद्यालयात् आगच्छति।

उदा0–	1.	वृक्षः पत्रम्	1.	वृक्षात्	पत्रं पतति।
	2.	हस्तः सुधाखण्डः	2.	.....	....पतति..।
	3.	अश्वः बालकः	3.	.....	....पतति..।
	4.	आकाशः जलम्	4.	.....	....पतति..।

उदा0–	5.	अध्यापिका पुस्तकालयः	5.	अध्यापिका पुस्तकालयात्	आगच्छति।
	6.	मित्रं ग्रामः	6.	.....	..... आगच्छति..।
	7.	छात्रा प्रवासः	7.	.....	..... आगच्छति..।

9. गवेषकः/विदेशः	9.	.....	आगच्छति।
10. गृहिणी/गृहम्	10.	.....	आगच्छति।
11. अर्चकः/मन्दिरम्	11.	.....	आगच्छति।
12. भगिनी/उद्यानम्	12.	.....	आगच्छति।
13. नारदः/कैलासः	13.	.....	आगच्छति।
14. मूषकः/बिलम्	14.	.....	आगच्छति।
15. वैद्यः/चिकित्सालयः	15.	.....	आगच्छति।

अभ्यासः – 201

..... आगच्छति

कः कस्मात् स्थानात् आगच्छति इति अग्रे कोष्ठके निर्दिष्टम् अस्ति। तत् पञ्चम्यन्ते परिवर्त्य रिक्तस्थानानि पूरयन्तु–

[कौन कहाँ से आ रहा है यह कोष्ठ में निर्दिष्ट है, इसे पञ्चम्यन्त में परिवर्तित कर रिक्त स्थानों की पूर्ति कीजिए। 'Who is coming from where' is indicated below. Please fill in the blanks by adding fifth case ending to the words.]

यथा –	जनकः	कार्यालयात्	आगच्छति।	(कार्यालयः)
1.	मित्रं	..गृहात्....	आगच्छति।	(गृहम्)
2.	बालकः	.....	आगच्छति।	(विद्यालयः)
3.	एषः	.....	आगच्छति।	(नगरम्)
4.	सा	.....	आगच्छति।	(ग्रामः)
5.	रमा	.....	आगच्छति।	(मन्दिरम्)
6.	लता	.....	आगच्छति।	(श्वशुरगृहम्)
7.	अध्यापिका	.....	आगच्छति।	(बैंगलूरनगरम्)
8.	छात्रा	.....	आगच्छति।	(हिमाचलः)
9.	अर्चकः	.....	आगच्छति।	(मनसादेवीमन्दिरम्)
10.	आरक्षकः	.....	आगच्छति।	(आरक्षककार्यालयः)
11.	छात्रनायकः	.....	आगच्छति।	(विश्वविद्यालयः)
12.	वित्तकोषाध्यक्षः	.....	आगच्छति।	(जापानदेशः)
13.	मन्त्रिमहोदयः	.....	आगच्छति।	(विदेशः)
14.	धावकः	.....	आगच्छति।	(आस्ट्रेलियादेशः)
15.	अनुजः	.....	आगच्छति।	(चैन्नैनगरम्)
16.	जननी	.....	आगच्छति।	(मातुलगृहम्)

अभ्यासः – 202

पञ्चम्यां रूपाणि

पञ्चम्यन्तपदैः रिक्तस्थानानि पूरयन्तु–
[पञ्चम्यन्त पदों से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks with words in fifth case-ending.]

		एकवचनम्	द्विवचनम्	बहुवचनम्
अ0पुं0–	1. वृक्षः →	वृक्षात्	वृक्षाभ्याम्	वृक्षेभ्यः
	2. दण्डः →	.....	.....	.....
	3. दीपः →	.....	.....	.....
	4. सर्पः →	.....	.....	.....
	5. नृपः →	.....	.....	.....
	6. सुधाखण्डः →	.....	.....	.....
अ0नपुं0–	7. फलम् →	फलात्	फलाभ्याम्	फलेभ्यः
	8. पुस्तकम् →	.....	.....	.....
	9. पत्रम् →	.....	.....	.....
	10. पुष्पम् →	.....	.....	.....
	11. सोपानम् →	.....	.....	.....
	12. नाणकम् →	.....	.....	.....
आ0स्त्री0–	13. बालिका →	बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः
	14. लता →	.....	.....	.....
	15. दोला →	.....	.....	.....
	16. माला →	.....	.....	.....
	17. सन्दंशिका →	.....	.....	.....
	18. कन्या →	.....	.....	.....
ई0स्त्री0–	19. सूची →	सूच्याः	सूचीभ्याम्	सूचीभ्यः
	20. घटी →	.....	.....	.....
	21. गृहिणी →	.....	.....	.....
	22. नर्तकी →	.....	.....	.....
	23. चालनी →	.....	.....	.....

सर्वनामशब्दानां पञ्चम्यां रूपाणि

ध्यानेन पठन्तु–
[ध्यान से पढ़िए। Please read carefully.]

		एकवचनम्	द्विवचनम्	बहुवचनम्
एतत्	पुं०	एतस्मात्	एताभ्याम्	एतेभ्यः
	नपुं०	एतस्मात्	एताभ्याम्	एतेभ्यः
	स्त्री०	एतस्याः	एताभ्याम्	एताभ्यः
तत्	पुं०	तस्मात्	ताभ्याम्	तेभ्यः
	नपुं०	तस्मात्	ताभ्याम्	तेभ्यः
	स्त्री०	तस्याः	ताभ्याम्	ताभ्यः
भवत्	पुं०	भवतः	भवद्भ्याम्	भवद्भ्यः
	नपुं०	भवतः	भवद्भ्याम्	भवद्भ्यः
	स्त्री०	भवत्याः	भवतीभ्याम्	भवतीभ्यः
सर्व	पुं०	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
	नपुं०	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
	स्त्री०	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
अस्मद्	पुं०	मत्	आवाभ्याम्	अस्मत्
	नपुं०	मत्	आवाभ्याम्	अस्मत्
	स्त्री०	मत्	आवाभ्याम्	अस्मत्
युष्मद्	पुं०	त्वत्	युवाभ्याम्	युष्मत्
	नपुं०	त्वत्	युवाभ्याम्	युष्मत्
	स्त्री०	त्वत्	युवाभ्याम्	युष्मत्

अभ्यासः – 203

पञ्चम्यां रूपाणि

अधोनिर्दिष्टानां पञ्चम्यन्तरूपाणि लिखन्तु–

[अधोलिखित शब्दों के पञ्चम्यन्त रूपों को लिखिए। Please write the fifth case ending forms of the following words.]

उदा0–	वृक्षः	–	...वृक्षात्....		सर्वः	–	....सर्वस्मात्.
1.	एषः	–	.....	21.	भवन्तौ	–	.....
2.	नन्दिनी	–	.....	22.	नदी	–	.....
3.	वयम्	–	.....	23.	फलम्	–	.....
4.	सा	–	.....	24.	आवाम्	–	.....
5.	अध्यापकः	–	.....	25.	भवत्यः	–	.....
6.	भवती	–	.....	26.	यानानि	–	.....
7.	जननी	–	.....	27.	ताः	–	.....
8.	तौ	–	.....	28.	गृहिण्यः	–	.....
9.	सर्वा	–	.....	29.	देवी	–	.....
10.	एते (पुं0)	–	.....	30.	भवन्तः	–	.....
11.	अहम्	–	.....	31.	आसन्दौ	–	.....
12.	भवत्यौ	–	.....	32.	भवने	–	.....
13.	वैद्यः	–	.....	33.	शकटौ	–	.....
14.	भवान्	–	.....	34.	लेखन्यः	–	.....
15.	त्वम्	–	.....	35.	एतौ	–	.....
16.	सः	–	.....	36.	दीपाः	–	.....
17.	शाटिका	–	.....	37.	व्यजनम्	–	.....
18.	यूयम्	–	.....	38.	सस्यानि	–	.....
19.	काशी	–	.....	39.	तीरम्	–	.....
20.	युवाम्	–	.....	40.	कूपी	–	.....

अभ्यासः – 204

पञ्चम्यन्तानां वाक्ये प्रयोगाः

मञ्जूषायां प्रदत्तयोः शब्दयोः उचितेन शब्देन सह पञ्चमीं योजयित्वा वाक्यानि लिखन्तु –
[मंजूषा में प्रदत्त शब्दों में से उचित शब्द के साथ पञ्चमी विभक्ति जोड़कर वाक्य पूर्ण कीजिए।
Complete the following sentences by adding fifth case ending to the selected word given in the box.]

उदा0 –	1. ...वृक्षः.. पत्रम्।	.वृक्षात्... पत्रं पतति।
	2. अश्वः भटः।	.... पतति।
	3. लता पुष्पम्।	....।
	4. हिमालयः गङ्गा।	.... प्रवहति।
	5. पर्वतः नदी।	....।
	6. महानदी शाखानदी	....।
उदा0 –	7. गृहिणी नदी।	गृहिणी ...नद्याः.. जलम् आनयति।
	8. बालिका कूपः।	बालिका ..... जलम् आनयति।
	9. बालकः आपणः।	.... तण्डुलम् आनयति।
	10. वानरः शाखा।	वानरः ..... पतति।
	11. बालकः सोपानम्।	....।
	12. मण्डूकः कूलम्।	.... जले .....।
	13. महिला कूपः।	.... जलम् आकर्षति।
	14. पुरुषः जलाशयः।	.... पङ्कम् उद्धरति।
	15. अग्निशमकः भवनम्।	.... जनान् बहिः निष्कासयति।
	16. चोरः कारागारम्।	.... निर्गच्छति।
	17. जलं मेघः।	....।
	18. धूमः अनलः।	....।

अभ्यासः – 205

पञ्चम्याः केचन अन्ये प्रयोगाः

प्रदत्तक्रियापदं संयोज्य उदाहरणानुगुणं वाक्यानि रचयन्तु–
[उदाहरणों के अनुसार दी गई क्रिया को जोड़ते हुए वाक्यों की रचना कीजिए। Please make sentences as shown in the examples by using the given verb.]

पठति

उदा0 – 1. छात्रः अध्यापकः छात्रः अध्यापकात् पठति।
2. रामः वसिष्ठः ....।
3. राक्षसाः शुक्राचार्यः .... पठन्ति।
4. छात्राः अध्यापिकाः ....।
5. पुत्री जनकः .... पठति।

बिभेति

उदा0 – 6. हरिणः व्याघ्रः..... हरिणः व्याघ्रात्.. बिभेति।
7. मीनः मकरः ....।
8. मूषकः बिडालः ....।
9. सर्पः नकुलः ....।
10. बालकः भल्लूकः ....।

रक्षति

उदा0 – 11. जननी ....सर्पः.... जननी सर्पात्.. पुत्रीं रक्षति।
12. देवः राक्षसाः .... मनुष्यान् .....।
13. अध्यापकः कुक्कुरः .... छात्रं .....।
14. नृपः लुण्ठाकाः .... प्रजाः .....।
15. बालिका जलं .... पुस्तकं .....।

अभ्यासः – 206

पञ्चम्यन्तानां मिश्रिताः प्रयोगाः

यथोदाहरणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

I. कुतः आगच्छति ?

छात्रः

1. (गृहम्) ....गृहात्....
2. (कार्यालयः) .....
3. (विद्यालयः) .....
4. (देवालयः) .....
5. (आपणः) .....

आगच्छति

II. कस्मात् बिभेति ?

मूषकः

6. (बिडालः) ..बिडालात्..
7. (काकः) .....
8. (कुक्कुरः) .....

बिभेति

सज्जनाः

9. (दुर्जनाः) .....
10. (असत्यम्) .....
11. (अधर्मः) .....

बिभ्यति

शिशुः

12. (काकः) .....
13. (अहम्) .....
14. (यूयम्) .....

बिभेति

III. कस्मात् रक्षति ?

युतकम्

15. (शीतम्) .....
16. (आतपः) .....

रक्षति

छत्रम्

17. (आतपः) .....
18. (वर्षणम्) .....

रक्षति

सम्यक् स्मरन्तु–

[स्मरण कीजिए। Learn carefully.]

भी भये

बिभेति	बिभितः/बिभीतः	बिभ्यति
बिभेषि	बिभिथः/बिभीथः	बिभिथ/बिभीथ
बिभेमि	बिभिवः/बिभीवः	बिभिमः/बिभीमः

अभ्यासः – 207

पञ्चम्यन्तानां प्रयोगाः

पञ्चम्यन्तपदैः रिक्तस्थानानि पूरयन्तु–

[पञ्चम्यन्त पदों से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks with words in fifth case ending.]

उदा0 –	1. पत्रं	वृक्षात्.....	पतति ।	(वृक्षः)
	2. बालकः	.....	आगच्छति ।	(गृहम्)
	3. छात्रः	.....	आगच्छति ।	(गुरुकुलम्)
	4. तौ	.....	पततः ।	(अश्वः)
	5. युतकं	.....	रक्षति ।	(शीतम्)
	6. अहम्	.....	आगच्छामि ।	(आपणः)
	7. भवती	.....	बिभेति ?	(किम्)
	8. यूयं	.....	आगच्छथ ।	(ग्रामः)
	9. आवां	.....	आगच्छावः ।	(मन्दिरम्)
	10. भवन्तौ	.....	पठतः ।	(शिक्षकः)
	11. भवत्यः	.....	पठन्ति ।	(शिक्षिका)
	12. त्वं	.....	शृणोषि ?	(किम्)
	13. सः	.....	रक्षति ।	(व्याघ्रः)
	14. एते	.....	पश्यन्ति ।	(भवनम्)
	15. एषा	.....	जलम् आनयति ।	(कूपः)
	16. दर्शकाः	.....	निर्गच्छन्ति ।	(चलचित्रमन्दिरम्)
	17. जनकः	.....	रक्षति ।	(जलम्)
	18. गृहिणी	.....	बिभेति ।	(सर्पः)
	19. पितृव्यः	.....	रक्षति ।	(अनलः)
	20. पितामहः	.....	आगच्छति ।	(मन्दिरम्)

अभ्यासः – 208

पञ्चम्यन्तानां प्रयोगाः

बहुवचनान्तपञ्चम्यन्तपदैः उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[पञ्चमी बहुवचन का प्रयोग करते हुए उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by changing words into fifth case ending plural number as per the example.]

उदा0– ते आपणेभ्यः वस्तूनि आनयन्ति। (आपणाः)

1. छात्राः ..... पाठं पठन्ति। (अध्यापिकाः)
2. वयं ..... विचारान् ज्ञास्यामः। (शिक्षकाः)
3. भिक्षुकः ..... अन्नं स्वीकरोति। (गृहिण्यः)
4. राजकीयनायकाः ..... उत्कोचं स्वीकुर्वन्ति। (सर्वे)
5. ताः ..... वस्त्राणि आनयन्ति। (नगर्यः)
6. वयं ..... पुष्पाणि आनेष्यामः। (वाटिकाः)
7. ते ..... धनं न स्वीकुर्वन्ति। (वयम्)
8. ..... फलानि पतन्ति। (वृक्षाः)
9. भगिनी ..... टिप्पणीं स्वीकरोति। (ते)
10. सः ..... चाकलेहं स्वीकरोति। (ताः)
11. वाहनानि ..... आगच्छन्ति। (नगराणि)
12. राज्याभिषेकसमये ..... जलम् आनयन्ति। (नद्यः)
13. भवती ..... धान्यम् आनयतु। (सस्यानि)
14. भवान् ..... जलम् आनयतु। (तीर्थक्षेत्राणि)
15. कार्यक्रमार्थं ..... जनाः आगताः। (विभिन्नदेशाः)
16. अनेके इतिहासकाराः ..... भारतम् आगताः। (विभिन्नदेशाः)
17. पुष्पाणि ..... पतन्ति। (लताः)
18. सन्त्रस्तानां कृते ..... वस्तूनि सङ्गृहीतानि। (विभिन्नगृहाणि)
19. घण्टानादानन्तरं छात्राः ..... गृहं गच्छन्ति। (शालाः)
20. सः ..... ऋणं स्वीकरोति। (सर्वे)

अभ्यासः – 209

सर्वनामशब्दानां पञ्चम्यां प्रयोगाः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the example.]

उदा0 – 1.	रमा	....तस्मात्...	फलं स्वीकरोति।	(तत्)
2.	वयं	.....	फलानि स्वीकुर्मः।	(ताः)
3.	मालिनी	.....	धनं स्वीकरोति।	(वयम्)
4.	सः	.....	ऋणं स्वीकरोति।	(सर्वे)
5.	छात्रः	.....	पुष्पं स्वीकरोति।	(अहम्)
6.	रमेशः	.....	धान्यं स्वीकरोति।	(एषः)
7.	भगिनी	.....	शाटिकां स्वीकरोति।	(सा)
8.	अग्रजः	.....	सूचीं स्वीकरोति।	(तौ)
9.	सा	.....	संस्कृतं ज्ञास्यति।	(अहम्)
10.	छात्राः	.....	शिष्टाचारं ज्ञास्यन्ति।	(वयम्)
11.	पुरुषाः	.....	वाहनचालनं ज्ञास्यन्ति।	(ते-स्त्री0)
12.	जनाः	.....	वस्तूनि सङ्गृह्णन्ति।	(ते-पु0)
13.	अहं	.....	लेखनीं स्वीकरोमि।	(त्वम्)
14.	वयं	.....	कवितां स्वीकुर्मः।	(भवत्यः)
15.	वैद्याः	.....	धनं स्वीकुर्वन्ति।	(भवन्तः)
16.	भ्रष्टाः	.....	उत्कोचं स्वीकुर्वन्ति।	(ते-स्त्री0)
17.	अहं	.....	विषयसङ्ग्रणं करोमि।	(ताः)
18.	पण्डिताः	.....	सूचनाः स्वीकुर्वन्ति।	(वयम्)
19.	निर्धनाः	.....	मिष्टान्नं स्वीकुर्वन्ति।	(भवत्यौ)
20.	भिक्षुकाः	.....	रोटिकाः स्वीकुर्वन्ति।	(आवाम्)

अभ्यासः – 210

बहिः, आरभ्य, पूर्वम्, परम् इति एतेषां शब्दानां प्रयोगे पञ्चम्याः प्रयोगाः

उदाहरणानुगुणं वाक्यानि रचयन्तु–

[उदाहरणों के अनुसार वाक्यों की रचना कीजिए। Please make sentences as shown in the examples.]

I. बहिः–

1. ....ग्रामात्.... बहिः विद्यालयः अस्ति। (ग्रामः)
2. ..... बहिः मन्दिरम् अस्ति। (नगरम्)
3. .... वृक्षः .....। (क्षेत्रम्)
4. .... अजा चरति। (गृहम्)
5. .... वृषभः निद्राति। (मन्दिरम्)

II. आरभ्य–

6. ....सोमवासरात्.. आरभ्य कक्षा भविष्यति। (सोमवासरः)
7. .... नगरसीमा अस्ति। (नदी)
8. .... गृहं यावत् उद्यानं निर्मातु। (मार्गः)
9. .... कन्याकुमारीं यावत् भारतदेशः। (हिमालयः)
10. .... शयनं यावत् कार्यं करोतु। (उत्थानम्)

III. पूर्वम्–

11. ....नगरात्... पूर्वं ग्रामः अस्ति। (नगरम्)
12. .... शनिवासरः। (रविवासरः)
13. .... मां पश्य। (गमनम्)
14. .... शान्तिमन्त्रं वदामः। (भोजनम्)
15. .... देवं स्मरामः। (शयनम्)

IV. परम्–

16. ....मासात्.... परं परीक्षा अस्ति। (मासः)
17. .... सोमवासरः भवति। (रविवासरः)
18. .... जलं न पिबत। (भोजनम्)
19. .... किञ्चित् क्रीडत। (पठनम्)
20. .... मां मिलतु। (आगमनम्)

अभ्यासः – 211

पञ्चम्यन्तानां प्रयोगाः

उदाहरणानुगुणं पञ्चम्यन्तपदैः रिक्तस्थानानि पूरयन्तु–
[उदाहरण के अनुसार पञ्चम्यन्त शब्दों से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks with words in fifth case ending as shown in the example.]

उदा०– 1. देवदत्तः अध्यापकात् बिभेति। (अध्यापकः)
2. सेवकः ..... बहिः तिष्ठति। (गृहम्)
3. बालिका ..... पूर्वं देवं नमस्करोति। (शयनम्)
4. सः ..... आरभ्य विद्यालयं गमिष्यति। (शुक्रवासरः)
5. गृहिणी ..... लज्जाम् अनुभवति। (श्वशुरः)
6. इदानीं ..... पत्राणि पतन्ति। (लता)
7. ग्रामीणाः ..... पथिकं रक्षन्ति। (लुण्ठाकाः)
8. छात्रः ..... पुस्तकं पठति। (शिक्षिका)
9. सः ..... परं विदेशं गमिष्यति। (वर्षम्)
10. नदी ..... प्रवहति। (पर्वतः)
11. मण्डूकाः ..... जले पतन्ति। (कूलम्)
12. मालाकारः ..... पुष्पं चिनोति। (लता)
13. धीवरः ..... मत्स्यान् गृह्णाति। (तडागः)
14. शिशुः ..... पतति। (दोला)
15. बालकः ..... पतति। (द्विचक्रिका)
16. नारिकेलतैलं ..... निस्सरति। (कूपी)
17. वीरः ..... बाणं प्रक्षिपति। (कार्मुकः)
18. योगी ..... विरमति। (शयनम्)
19. अङ्गुलीयकम् ..... पतति। (अङ्गुली)
20. अजगरः ..... निर्गच्छति। (बिलम्)

5.1.2 तः

I.

विद्यालयात्	विद्यालयतः

विद्यालयात् = विद्यालयतः। एतयोः अर्थभेदः नास्ति।

II.

	पञ्चम्याम्		तः-प्रत्यये
पुं०	विद्यालयात्	=	विद्यालयतः
स्त्री०	मालायाः	=	मालातः
नपुं०	पुस्तकात्	=	पुस्तकतः

III.

(क)

विद्यालयात्	विद्यालयाभ्याम्	विद्यालयेभ्यः
↓	↓	↓
विद्यालयतः	विद्यालयतः	विद्यालयतः

(ख)

पाठशालायाः	पाठशालाभ्याम्	पाठशालाभ्यः
↓	↓	↓
पाठशालातः	पाठशालातः	पाठशालातः

(ग)

गृहात्	गृहभ्याम्	गहेभ्यः
↓	↓	↓
गृहतः	गृहतः	गृहतः

IV.

	एकवचनम्	द्विवचनम्	बहुवचनम्
पुं०	आत्	आभ्याम्	एभ्यः
स्त्री०	याः	आभ्याम्	आभ्यः
नपुं०	आत्	आभ्याम्	एभ्यः

= तः

अभ्यासः – 212

पञ्चम्यन्तानां तः–प्रत्ययान्तेषु परिवर्त्तनम्

उदाहरणानुगुणं परिवर्तयन्तु–

[उदाहरणों के अनुसार परिवर्तन कीजिए। Please change according to the exmaples.]

उदा0– 1. सः विद्यालयात् आगच्छति। सः विद्यालयतः आगच्छति।
2. वयं ग्रामात् आगच्छामः। वयं ....।
3. एतौ आपणात् आगच्छतः। एतौ ....।
4. नृपः प्रासादात् आगच्छति। नृपः ....।
5. यूयं पर्वतात् आगच्छथ। यूयं ....।

उदा0– 1. बालिकाः वाटिकायाः आगच्छन्ति। बालिकाः वाटिकातः आगच्छन्ति।
2. छात्रा शिक्षिकायाः टिप्पणीं स्वीकरोति। छात्रा ....।
3. विद्यार्थिनी पाठशालायाः आगच्छति। ....।
4. नलिकायाः जलं स्रवति। ....।
5. पश्य, गुहायाः व्याघ्राः निर्गच्छन्ति। ....।

उदा0– 1. धनिकाः नगर्याः आगच्छन्ति। धनिकाः नगरीतः आगच्छन्ति।
2. राजधानीयानं राजधान्याः आगच्छति। ....।
3. बालिका पुष्पाधान्याः पुष्पं निस्सारयति। ....।
4. जननी मालाकार्याः पुष्पं क्रीणाति। ....।
5. सेविका राज्ञ्याः उपायनं गृह्णाति। ....।

उदा0– 1. देवदत्तः नगरात् आगमिष्यति। देवदत्तः नगरतः आगमिष्यति।
2. अर्चकः मन्दिरात् आगच्छति। ....।
3. धनिकः भवनात् पश्यति। ....।
4. चालकः यानात् पतति। ....।
5. कृषिकः क्षेत्रात् आगच्छति। ....।

पञ्चमः स्तबकः

5.2 द्वितीयः पाठः

[षष्ठी]

ध्यानेन पठन्तु-

[ध्यान से पढ़िए। Please read carefully.]

5.2.1 षष्ठीप्रयोगाः

सीता

रामः

सीता रामस्य पत्नी।

गणेशः

शिवः

गणेशः शिवस्य पुत्रः।

कृष्णः

रुक्मिणी

कृष्णः रुक्मिण्याः पतिः।

जवाहरलालः

इन्दिरा

जवाहरलालः इन्दिरायाः जनकः।

अभ्यासः – 213

उदाहरणानुगुणं वाक्यानि लिखन्तु–

[उदाहरणों के अनुसार वाक्यों को लिखिए। Please make sentences as shown in the examples.]

उदा0 – 1.	लक्ष्मणः **रामः** अनुजः।	1. लक्ष्मणः ..रामस्य.... अनुजः।
2.	कृष्णः **वसुदेवः** पुत्रः।	2. कृष्णः ..वसुदेवस्य..... पुत्रः।
3.	देवकी **कृष्णः** जननी।	3. ....।
4.	रामः **भरतः** अग्रजः।	4. ....।
5.	धृतराष्ट्रः **दुर्योधनः** जनकः।	5. ....।
उदा0 – 6.	रामः **अयोध्या** नृपः।	6. ..रामः..... ..अयोध्यायाः..... ....नृपः...।
7.	लक्ष्मणः **सुमित्रा** पुत्रः।	7. ....।
8.	रावणः **शूर्पणखा** अग्रजः।	8. ....।
9.	सुमित्रा **कौसल्या** भगिनी।	9. ....।
10.	जवाहरः **इन्दिरा** जनकः।	10. जवाहरः ..... जनकः।
11.	शिवः **पार्वती** पतिः।	11. शिवः ...पार्वत्याः.. पतिः।
12.	एषा **सौदामिनी** लेखनी।	12. ....।
13.	एतत् **राज्ञी** भवनम्।	13. ....।
14.	कंसः **देवकी** सहोदरः।	14. ....।
उदा0 – 15.	हस्तः **शरीरम्** अङ्गम्।	15. हस्तः ...शरीरस्य.. अङ्गम्।
16.	एतत् **गृहं** द्वारम्।	16. ....।
17.	सः **नगरं** मुख्यः।	17. ....।
18.	तत् **दाडिमफलं** बीजम्।	18. ....।
19.	एतानि **यानं** चक्राणि।	19. ....।

अभ्यासः – 214

षष्ठ्यन्तरूपाणि

उदाहरणानुगुणं रूपाणि लिखन्तु–

[उदाहरणों के अनुसार रूपों को लिखिए। Please write forms (Rupas) of sixth case ending as per the examples.]

		एकवचनम्	द्विवचनम्	बहुवचनम्
अ० पुं० उदा०–	1. वृक्षः →	वृक्षस्य	वृक्षयोः	वृक्षाणाम्
	2. गायकः →	.....	.....	गायकानाम्...
	3. रक्षकः →	.....	.....	रक्षकाणाम्...
	4. सैनिकः →	.....	.....	सैनिकानाम्..
	5. दण्डः →	.....	.....	दण्डानाम्....
अ० नपुं० उदा०–	6. पुस्तकम् →	पुस्तकस्य	पुस्तकयोः	पुस्तकानाम्
	7. पत्रम् →	.....	.....	पत्राणाम्....
	8. क्रीडनकम् →	.....	.....	क्रीडनकानाम्.
	9. सूत्रम् →	.....	.....	सूत्राणाम्....
	10. पुष्पम् →	.....	.....	पुष्पाणाम्....
आ० स्त्री० उदा०–	11. शाखा →	शाखायाः	शाखयोः	शाखानाम्
	12. लता →	.....	.....	.....
	13. गायिका →	.....	.....	.....
	14. माला →	.....	.....	.....
	15. अध्यापिका →	.....	.....	.....
ई० स्त्री० उदा०–	16. नर्तकी →	नर्तक्याः	नर्तक्योः	नर्तकीनाम्
	17. सूची →	.....	.....	.....
	18. राज्ञी →	.....	.....	राज्ञीनाम्....
	19. जननी →	.....	.....	जननीनाम्...
	20. भगिनी →	.....	.....	.....

सर्वनामशब्दानां षष्ठ्यन्तरूपाणि

ध्यानेन पठन्तु–

[ध्यान से पढ़िए। Please read carefully.]

सर्वनाम		एकवचनम्	द्विवचनम्	बहुवचनम्
एतत्	पुं०	एतस्य	एतयोः	एतेषाम्
	नपुं०	एतस्य	एतयोः	एतेषाम्
	स्त्री०	एतस्याः	एतयोः	एतासाम्
तत्	पुं०	तस्य	तयोः	तेषाम्
	नपुं०	तस्य	तयोः	तेषाम्
	स्त्री०	तस्याः	तयोः	तासाम्
भवत्	पुं०	भवतः	भवतोः	भवताम्
	नपुं०	भवतः	भवतोः	भवताम्
	स्त्री०	भवत्याः	भवत्योः	भवतीनाम्
सर्व	पुं०	सर्वस्य	सर्वयोः	सर्वेषाम्
	नपुं०	सर्वस्य	सर्वयोः	सर्वेषाम्
	स्त्री०	सर्वस्याः	सर्वयोः	सर्वासाम्
युष्मद्	पुं०	तव	युवयोः	युष्माकम्
	नपुं०	तव	युवयोः	युष्माकम्
	स्त्री०	तव	युवयोः	युष्माकम्
अस्मद्	पुं०	मम	आवयोः	अस्माकम्
	नपुं०	मम	आवयोः	अस्माकम्
	स्त्री०	मम	आवयोः	अस्माकम्

अभ्यासः – 215

षष्ठ्यन्तानां प्रयोगाः

उदाहरणानुगुणं षष्ठ्यन्तरूपाणि लिखन्तु–

[उदाहरण के अनुसार षष्ठ्यन्त रूपों को लिखिए। Please write the forms in sixth case ending as shown in the example.]

उदा0– 1. विश्वामित्रः ..विश्वामित्रस्य...

2. दशरथः .....

3. लक्ष्मणः .....

4. भरतः .....

5. कौसल्या .....

6. कैकेयी .....

7. सीता .....

8. अयोध्या .....

9. ताडका .....

10. सुमित्रा .....

शिष्यः
पुत्रः
अग्रजः
अग्रजः
पुत्रः
पुत्रः
पतिः
नृपः
संहारकः
पुत्रः

श्रीरामचन्द्रः

अभ्यासः – 216

सम्बन्धवाचकानां प्रयोगाः

उदाहरणानुगुणं वाक्यानि रचयन्तु–

[उदाहरण के अनुसार वाक्यों की रचना कीजिए। Please make sentences as shown in the example.]

उदा0–1.	स्नुषा = पुत्रस्य पत्नी	दशरथः – स्नुषा सीता	दशरथस्य स्नुषा.. .सीता. ।	
2.	श्वशुरः = पत्युः पिता	सीता – श्वशुरः दशरथः	.... ।	
3.	श्वशुरः = पत्न्याः पिता	रामः – श्वशुरः जनकः	.... ।	
4.	जामाता = पुत्र्याः पतिः	जनकः – जामाता रामः	.... ।	
5.	श्वश्रूः = पत्न्याः माता	सीता – श्वश्रूः कौसल्या	.... ।	
	= पत्युः माता	शिवः – श्वश्रूः मेना	.... ।	
6.	पितामहः= पितुः पिता	लवः – पितामहः दशरथः	.... ।	
7.	मातामहः= मातुः पिता	लवः – मातामहः जनकः	.... ।	
8.	पौत्रः = पुत्रस्य पुत्रः	दशरथः – पौत्रः लवः	.... ।	
9.	दौहित्रः = पुत्र्याः पुत्रः	जनकः – दौहित्रः लवः	.... ।	
10.	पितामही= पितुः माता	प्रद्युम्नः – पितामही देवकी	.... ।	
11.	मातामही= मातुः माता	भरतः – मातामही मेनका	.... ।	
12.	देवरः = पत्युः सहोदरः	सीता – देवरः लक्ष्मणः	.... ।	
13.	भ्रातृजाया= सहोदरस्य पत्नी	लक्ष्मणः–भ्रातृजाया सीता	.... ।	
14.	याता = देवरस्य पत्नी	रुक्मिणी – याता रेवती	.... ।	
15.	आवुत्तः = भगिन्याः पतिः	कंसः – आवुत्तः वसुदेवः	.... ।	
16.	भागिनेयः= भगिन्याः पुत्रः	कंसः – भागिनेयः कृष्णः	.... ।	
17.	श्यालः = पत्न्याः सहोदरः	धृतराष्ट्रः –श्यालः शकुनिः	.... ।	
18.	पितृव्यः = पितुः सहोदरः	भीमः – पितृव्यः धृतराष्ट्रः	.... ।	
19.	मातुलः = मातुः सहोदरः	दुर्योधनः–मातुलः शकुनिः	.... ।	
20.	विमाता = मातुः सपत्नी	ध्रुवः – विमाता सुरुचिः	.... ।	
21.	ननान्दा = पत्युः भगिनी	रुक्मिणी–ननान्दा सुभद्रा	.... ।	

अभ्यासः – 217

सम्बन्धवाचकानां प्रयोगाः

क. ख. स्तम्भयोः मध्ये सम्बन्धं सूचयन्तः वाक्यानि रचयन्तु –

[क. एवं ख. स्तम्भों के बीच सम्बन्ध को दर्शाते हुए वाक्य बनाइये। Construct sentences showing the relationship between the words of Part क. and Part ख.]

	क	ख	सम्बन्धबोधकं वाक्यम्
उदा0 – 1.	दशरथः	कौसल्या	उदा0 – 1. दशरथस्य पत्नी कौसल्या।
2.	सुमित्रा	दशरथः	2. ....।
3.	सीता	दशरथः	3. ....।
4.	रामः	सीता	4. ....।
5.	सीता	रामः	5. ....।
6.	कंसः	देवकी	6. ....।
7.	लक्ष्मणः	दशरथः	7. ....।
8.	रामः	लक्ष्मणः	8. ....।
9.	कौसल्या	दशरथः	9. ....।
10.	कैकेयी	दशरथः	10. ....।

सम्बन्धबोधकपदानि –

भार्या / पत्नी, पुत्रः, जनकः, भगिनी, अनुजः, श्वशुरः, पतिः

अभ्यासः – 218

सम्बन्धवाचकानां प्रयोगाः

उदाहरणानुगुणं वाक्यानि रचयन्तु–

[उदाहरण के अनुसार वाक्यों की रचना कीजिए। Please make sentences as shown in the example.]

उदा०–	1. गङ्गेशः – स्नुषा – रमा	गङ्गेशस्य	स्नुषा	रमा ।
	2. राकेशः – आवुत्तः – सुशीलः	.....	.....	..... ।
	3. सीता – आवुत्तः – सुरेशः	.....	.....	..... ।
	4. गीता – श्वशुरः – कृष्णशर्मा	.....	.....	..... ।
	5. धर्मपालः – स्नुषा – गायत्री	.....	.....	..... ।
	6. नम्रता – श्वश्रूः – सावित्रीदेवी	.....	.....	..... ।
	7. गुरुप्रसादः – जामाता – हरिकुमारः	.....	.....	..... ।
	8. सञ्जयः – पितामहः – सिद्धनाथः	.....	.....	..... ।
	9. चन्द्रकुमारः – पितामही – यशोदादेवी	.....	.....	..... ।
	10. कृष्णमोहनः – दौहित्रः – प्रवीणः	.....	.....	..... ।
	11. अविनाशः – मातामहः – सुरेन्द्रपालः	.....	.....	..... ।
	12. विभा – ननान्दा – विनुता	.....	.....	..... ।
	13. कविता – मातुलानी – गौरी	.....	.....	..... ।
	14. लता – देवरः – प्रकाशः	.....	.....	..... ।
	15. शशाङ्कः – मातुलः – हरिप्रसादः	.....	.....	..... ।
	16. नन्दकिशोरः – पितृव्या – सुमित्रादेवी	.....	.....	..... ।
	17. स्वरूपः – भागिनेयः – मिहिरः	.....	.....	..... ।
	18. लीना – भ्रातृजाया – राजश्रीः	.....	.....	..... ।
	19. प्रवीणः – श्यालः – मनीषः	.....	.....	..... ।
	20. आनन्दः – विमाता – कविता	.....	.....	..... ।

अभ्यासः – 219

षष्ठीद्विवचनबहुवचनप्रयोगाः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

I.

उदा0–	1.	सुग्रीवविभीषणौ	सुग्रीवविभीषणयोः	मित्रं
	2.	लवकुशौ	.....	जनकः
	3.	भरतलक्ष्मणौ	.....	अग्रजः
	4.	भरतशत्रुघ्नौ	.....	अग्रजः
	5.	कौसल्यासुमित्रे	.....	पुत्रः
	6.	कौसल्याकैकेय्यौ	.....	पुत्रः

श्रीरामचन्द्रः

II.

उदा0–	7.	कौरवपाण्डवौ	कौरवपाण्डवयोः	बान्धवः
	8.	नन्दवसुदेवौ	.....	पुत्रः
	9.	यशोदादेवक्यौ	.....	पुत्रः
	10.	सुदामसुबल्यौ	.....	मित्रं
	11.	रुक्मिणीसत्यभामे	.....	पतिः

श्रीकृष्णः

III.

उदा0– 12. भीमार्जुननकुलसहदेवाः — भीमार्जुननकुलसहदेवानां

13. गोपालकाः — .....

14. पाण्डवाः — .....

15. दुष्टाः — .....

16. सज्जनाः — .....

मित्रं, प्रियः, उद्धारकः, नाशकः, रक्षकः — श्रीकृष्णः

IV.

उदा0– 17. लक्ष्मणभरतशत्रुघ्नाः — लक्ष्मणभरतशत्रुघ्नानां

18. कौसल्याकैकेयीसुमित्राः — .....

19. अयोध्याप्रजाः — .....

20. राक्षसाः — .....

21. भक्ताः — .....

22. देवाः — .....

अग्रजः, पुत्रः, नृपः, संहारकः, उद्धारकः, रक्षकः — श्रीरामचन्द्रः

अभ्यासः – 220

षष्ठीबहुवचनस्य प्रयोगाः

कोष्ठगतशब्दानां षष्ठ्यन्तरूपैः उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[कोष्ठ में दिये गये शब्दों के षष्ठी विभक्ति के रूपों से उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by changing the words given in brackets into sixth case ending as shown in the example.]

उदा0–	1. स्वागतकारिणी	.जनानां.....	स्वागतं करोति।	(जनाः)
	2. पण्डितः	.....	रचनां करोति।	(ग्रन्थाः)
	3. वनपालकः	.....	रक्षणं करोति।	(वृक्षाः–वृक्षाणाम्)
	4. मालाकारः	.....	ग्रथनं करोति।	(पुष्पमालाः)
	5. जनाः	.....	पठनं कुर्वन्ति	(पत्रिकाः–पत्रिकाणाम्)
	6. अधिकारी	.....	परिशीलनं करोति।	(सञ्चिकाः)
	7. ते	.....	सम्मानं कुर्वन्ति।	(नर्तक्यः-नर्तकीनाम्)
	8. अर्चकाः	.....	पूजां कुर्वन्ति।	(देवाः)
	9. भारतीयाः	.....	पूजां कुर्वन्ति।	(नद्यः)
	10. वीरप्पन्	.....	दन्तान् चोरयति।	(गजाः)
	11. दुर्जनाः	.....	वञ्चनं कुर्वन्ति।	(सज्जनाः)
	12. सा	.....	मेलनार्थम् अगच्छत्।	(सख्यः)
	13. कृष्णः	.....	परिपालकः।	(शिष्टाः)
	14. संस्कृतभाषा	.....	जननी।	(भारतीयभाषा–भारतीयभाषाणाम्)
	15. गणेशः	.....	अधिपतिः।	(गणाः)
	16. शुक्राचार्यः	.....	गुरुः।	(राक्षसाः)
	17. बृहस्पतिः	.....	गुरुः।	(देवाः)
	18. वृक्षस्य	.....	कर्तनं न करोतु।	(शाखाः)
	19. भवान्	.....	वचनम् अनुसरतु।	(ज्येष्ठाः)
	20. भवती	.....	प्रक्षालनं करोतु।	(पात्राणि–पात्राणाम्)

अभ्यासः – 221

षष्ठीप्रयोगाः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the example.]

उदा0–	1. दिल्ली-नगरम्	...भारतस्य...	राजधानी।	(भारतम्)
	2. रावणः	.....	अग्रजः।	(शूर्पणखा)
	3. रामः	.....	जनकः।	(लवकुशौ)
	4. दशरथः	.....	जनकः।	(रामलक्ष्मणभरतशत्रुघ्नाः)
	5. शकुन्तला	.....	पुत्री।	(मेनकाविश्वामित्रौ)
	6. सः	.....	मुख्यमन्त्री।	(प्रदेशः)
	7. एतानि	.....	गृहाणि सन्ति।	(कृषकाः)
	8. एतानि	.....	पात्राणि सन्ति।	(पाकशाला)
	9. एषः	.....	रसः अस्ति।	(आम्रफलानि)
	10. माण्डवी	.....	भगिनी।	(उर्मिलासीते)
	11. गणेशः	.....	पुत्रः।	(पार्वती–परमेश्वरौ)
	12. चण्डीगढ़नगरम्	.....	राजधानी।	(हरियाणा–पञ्जाबप्रदेशौ)
	13. मेघनादः	.....	पुत्रः।	(रावणः)
	14. कृष्णः	.....	प्रियः।	(पाण्डवाः)
	15. गङ्गा	.....	पूज्या नदी।	(भारतीयाः)
	16. मार्कण्डेयः	.....	भक्तः।	(शिवः)
	17. अहं	.....	नागरिकः।	(भारतम्)
	18. सः	.....	आराधकः।	(ललितकला)
	19. एषा	.....	लेखनी।	(भगिनी)
	20. तत् मम	.....	गृहम्।	(मित्रम्)

अभ्यासः – 222

एतस्य / एतयोः / एतेषाम्
एतस्याः / एतयोः / एतासाम्

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

उदा०– 1. एषः बालकः। ....एतस्य.... नाम मोहनः।
2. एषः गायकः। ..... नाम कुमारगन्धर्वः।
3. एषा बालिका। ....एतस्याः... नाम मोहिता।
4. एषा गायिका। ..... नाम लता।
5. एतत् नगरम्। ....एतस्य.... नाम हरिद्वारम्।
6. एतत् भवनम्। ..... नाम संस्कृतधाम।

उदा०– 7. एतौ छात्रौ। ....एतयोः... कार्यम् अध्ययनम्।
8. एतौ कृषकौ। ..... कार्यं कर्षणम्।
9. एते छात्रे। ....एतयोः... कार्यम् अध्ययनम्।
10. एते शिक्षिके। ..... कार्यं पाठनम्।
11. एते पुस्तके। ..... मूल्यम् अधिकम्।
12. एते क्रीडनके। ..... मूल्यं न्यूनम्।

उदा०– 13. एते अध्यापकाः। ....एतेषाम्.. आचरणम् उत्तमम्।
14. एते दुर्जनाः। ..... आचरणं न शोभनम्।
15. एताः परिचारिकाः। ....एतासां... कार्यं सेवा।
16. एताः मधुमक्षिकाः। ..... कार्यं मधुसंग्रहः।
17. एतानि फलानि मधुराणि। ..... रसः मधुरः।
18. एतानि पुष्पाणि सुन्दराणि। ..... वर्णः रक्तः।
19. एताः सञ्चिकाः। ..... अन्तः कागदानि सन्ति।
20. एते नीतिग्रन्थाः। भवान् ..... अध्ययनं करोतु।

अभ्यासः – 223

एतस्य / एतयोः / एतेषाम्

रिक्तस्थानानि उचितरूपेण पूरयन्तु–

[उचित पद से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks with appropriate form.]

उदा0 – 1. एषः छात्रः अस्ति। ..... नाम गणेशः अस्ति। ..... जनकः नागेन्द्रः। ..... जननी गौरी। ..... एकः अनुजः अस्ति। ..... एका भगिनी अपि अस्ति। ..... व्यवहारः अतिसमीचीनः अस्ति।

2. एतौ छात्रौ स्तः। .....अध्ययनं सम्यक् प्रचलति। ..... अध्यापकाः अतीव प्रसन्नाः भवन्ति। ..... परिश्रमेण ..... प्रशंसा भवति। एतौ सोदरौ स्तः। ..... जनकः मनमोहनः। ..... जननी अन्नपूर्णा अस्ति। ..... एका अनुजा अपि अस्ति। ..... जनकः जननी भगिनी च ..... व्यवहारेण अतीव प्रसन्नाः भवन्ति। ..... परीक्षापरिणामः अपि, उत्तमः आगच्छति। परीक्षायाम् ..... स्थानम् अग्रिमं भवति।

3. एते अध्यापकाः सन्ति। .....अध्यापनम् अतीव प्रशंसनीयम् अस्ति। ..... छात्राः प्रसन्नाः भवन्ति। ..... छात्राः विज्ञानविषयविशेषज्ञाः भवन्ति। ..... प्राचार्यः ..... प्रशंसां बहु करोति।

अभ्यासः – 224

एतस्याः / एतयोः / एतासाम्

रिक्तस्थानानि उचितरूपेण पूरयन्तु–

[उचित पद से रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks with appropriate form.]

उदा0 – एषा एका छात्रा अस्ति। ..... नाम शालिनी अस्ति। ..... जनकः शैलेन्द्रः ..... जननी मीनाक्षी अस्ति। रमेशः ..... अनुजः अस्ति। एते बालिके अपि छात्रे स्तः। ..... नाम सुनयना सुभद्रा च अस्ति। .....आचरणम् उत्तमम् अस्ति। ..... प्रशंसां मम अध्यापकः अपि करोति। एताः बालिकाः अतीव निर्धनाः सन्ति। ..... जननी एताः बहुकाठिन्येन पाठयति। ..... जनकः नास्ति। ..... सहयोगेन ..... जननी किञ्चित् कार्यं करोति। ..... स्वस्य च जीवनं यापयति। ..... अध्ययनम् ..... परिश्रमेण अर्जितेन धनेन च प्रचलति।

अभ्यासः – 225

तस्य / तयोः / तेषाम्

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

उदा0 – 1. सः घनश्यामः। .....तस्य.... जनकः वरदाचार्यः।
2. सः श्यामः । ..... अग्रजः शङ्करः।
3. सः शिक्षकः। ..... पुस्तकम् एतत्।
4. सः अधिकारी। ..... कार्यालयः मुख्यमार्गे अस्ति।
5. सः रविः। ..... युतकं सुन्दरम् अस्ति।
6. सः सिंहः। ..... गर्जनं भयङ्करम्।

उदा0 – 7. तौ कोकिलौ। .....तयोः... कण्ठः मधुरः।
8. तौ नायकौ। ..... भाषणं श्वः भविष्यति।
9. तौ अध्यापकौ। ..... कार्यम् अध्यापनम्।
10. तौ मूर्खौ। ..... विषये मा चिन्तयतु।
11. तौ चतुरौ। ..... पुत्रौ अपि चतुरौ।
12. तौ अलसौ। ..... कार्यं समाप्तं न भवति।

उदा0 – 13. ते युवकाः। .....तेषां..... बलम् अधिकम्।
14. ते सेवकाः। ..... कार्यं परिशीलयतु।
15. ते वञ्चकाः। ..... विषये सावधानाः भवन्तु।
16. ते चित्रकाराः। ..... चित्रप्रदर्शनं तत्र अस्ति।
17. ते बालकाः। ..... आसक्तिः क्रीडायां भवति।
18. ते वृक्षाः। ..... फलानि मधुराणि सन्ति।

अभ्यासः – 226

तस्याः / तयोः / तासाम्

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

उदा0 – 1. सा युवतिः। .....तस्याः... नाम गौरी।
2. सा गीता। ..... शाटिका सुन्दरी।
3. सा नदी। ..... वेगः अधिकः।
4. सा लता। ..... पत्राणि कोमलानि।
5. सा बुद्धिमती। ..... साहाय्यं स्वीकरोतु।
6. सा माता। ..... सहनशक्तिः अधिका।

उदा0 – 7. ते बालिके। .....तयोः.... पुस्तकं मम समीपे अस्ति।
8. ते नद्यौ। ..... जलं मधुरम् अस्ति।
9. ते महिले। ..... गायनं सम्यक् भवति।
10. ते शिक्षिके। ..... कार्यम् अध्यापनम्।
11. ते गृहिण्यौ। ..... व्यवहारः उत्तमः।
12. ते छात्रे। ..... अध्यापकः शिवनारायणः।

उदा0 – 13. ताः सेविकाः। .....तासां.... कार्यम् अवलोकयतु।
14. ताः वृद्धाः। ..... बलं न्यूनम्।
15. ताः शाटिकाः। ..... वर्णः श्वेतः।
16. ताः नार्यः। ..... चातुर्यं बहु अस्ति।
17. ताः नर्तक्यः। ..... रङ्गप्रवेशः श्वः भविष्यति।
18. ताः वैद्याः। ..... कार्यं रुग्णानां शुश्रूषा।

अभ्यासः – 227

तव / युवयोः / युष्माकम्

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blnaks as shown in the examples.]

उदा0 – 1. त्वं छात्रः। .....तव..... कार्यम् अध्ययनम्।
2. त्वं कृषकः। ..... कार्यं कर्षणम्।
3. त्वं छात्रा। ..... आचरणम् उत्तमम्।
4. त्वं पाचिका। ..... कार्यं पाचनम्।
5. त्वं मित्रम्। ..... स्वभावः मधुरः।

उदा0 – 6. युवां भृत्यौ। ....युवयोः... सेवा उत्तमा।
7. युवां क्रीडकौ। ..... क्रीडा आकर्षिका।
8. युवां नर्तक्यौ। ..... नृत्यं रमणीयम्।
9. युवां कन्ये। ..... रात्रौ भ्रमणम् अनुचितम्।
10. युवां मित्रे। ..... दर्शनं सुखदम्।

उदा0 – 11. यूयं कनिष्ठाः। ....युष्माकं... व्यवहारः नम्रः।
12. यूयं बालिकाः। ..... परीक्षापरिणामः समीचीनः।
13. यूयम् अभिनेत्र्यः। ..... अभिनयः हृदयङ्गमः।
14. यूयं बालकाः। ..... स्वभावः चञ्चलः।
15. यूयं मित्राणि। ..... आगमनं सन्तोषजनकम्।

अभ्यासः – 228

मम / आवयोः / अस्माकम्

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

उदा0 – 1. अहं छात्रः। .....मम..... नाम रमेशः।
2. अहं वैद्यः। ..... कार्यं रुग्णसेवा।
3. अहं छात्रा। ..... नाम विनोदिनी।
4. अहम् अध्यापिका। ..... कार्यं शिक्षणम्।
5. अहं रमेशस्य मित्रम्। ..... नाम पञ्चाननः।

उदा0 – 6. आवां बालकौ। ...आवयोः... मित्रं नरेन्द्रः।
7. आवां बालिके। ..... शिक्षिका सुरेखा।
8. आवां रजकौ। ..... कार्यं वस्त्रप्रक्षालनम्।
9. आवां गृहिण्यौ। ..... गृहं नगरे अस्ति।
10. आवां मित्रे। ..... विद्यालयः उत्तमः।

उदा0 – 11. वयम् अध्यापकाः। ...अस्माकं.... धर्मः अध्यापनम्।
12. वयं धर्माचार्याः। ..... लक्ष्यं धर्मशिक्षणम्।
13. वयं छात्राः। ..... कार्यम् अध्ययनम्
14. वयं मालाकार्यः। ..... कार्यं मालाविक्रयणम्।
15. वयं मित्राणि। ..... मैत्री प्रगाढा।

अभ्यासः – 229

सर्वनामशब्दानां षष्ठ्यां प्रयोगाः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

[उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the example.]

उदा0– 1. आवां छात्रौ। ....आवयोः... कार्यम् अध्ययनम्।

2. एषः बालकः। ..... नाम सुदेवः।

3. ते अध्यापकाः। .....तेषां.... ज्ञानम् अत्यधिकम्।

4. ते बालिके। ..... परीक्षाफलं समीचीनम्।

5. ताः महिलाः। ..... सम्मानं कुर्वन्तु।

6. एतौ वृद्धौ। ..... सेवां करोतु।

7. त्वं युवकः। ..... धर्मः राष्ट्रसेवा।

8. वयं सैनिकाः। ..... धर्मः राष्ट्ररक्षा।

9. युवाम् अन्तरिक्षयात्रिकौ। ..... कार्यम् अन्तरिक्षयात्रा।

10. यूयं वैमानिकाः। ..... कार्यं विमानचालनम्।

11. सः आरक्षकः। ..... धर्मः अनुशासनरक्षा।

12. एषा लता। ..... पुष्पाणि सुन्दराणि।

13. तौ ज्येष्ठौ। ..... आदेशं पालयतु।

14. सा बुद्धिमती। ..... साहाय्यं स्वीकरोतु।

15. तत् पुष्पम्। ..... सुगन्धः आह्लादकरः।

16. तानि वाहनानि। ..... वेगः महान्।

17. अहम् अभिमन्युः। ..... माता उत्तरा।

18. एतत फलम्। ..... आकारं पश्यतु।

19. एतानि गृहाणि। ..... औन्नत्यं बहु अस्ति।

20. वयं भारतीयाः। .....देशः भारतदेशः।

पुरतः/पृष्ठतः/वामतः/दक्षिणतः/उपरि इति शब्दानां परिचयः।

विद्यालयस्य पुरतः छात्राः सन्ति ।
विद्यालयस्य पृष्ठतः पर्वतः अस्ति ।
विद्यालयस्य वामतः उद्यानम् अस्ति ।
विद्यालयस्य दक्षिणतः वृक्षाः सन्ति ।
विद्यालयस्य उपरि जलागारः अस्ति ।

अभ्यासः – 230

पुरतः /पृष्ठतः/ उपरि/अधः/वामतः/दक्षिणतः/अन्तः
इति शब्दानां प्रयोगे षष्ठी

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[उदाहरणों के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks as shown in the examples.]

I. उदा०–	1.	(गृहम्)	.....गृहस्य...	...पुरतः	उद्यानम् अस्ति।
	2.	(उद्यानम्)	.....	.....	मार्गः अस्ति।
	3.	(शिवः)	.....	.....	नन्दिविग्रहः अस्ति।
	4.	(भवनम्)	.....	.....	मुख्यद्वारम् अस्ति।
	5.	(कार्यालयः)	.....	.....	यानानि तिष्ठन्ति।
II. उदा०–	6.	(मन्दिरम्)	...मन्दिरस्य..	..पृष्ठतः	वृषभः निद्राति।
	7.	(गृहम्)	.....	.....	कूपः अस्ति।
	8.	(उत्पीठिका)	.....	.....	आसन्दः अस्ति।
	9.	(भवनम्)	.....	.....	सस्यानि सन्ति।
	10.	(विद्यालयः)	.....	.....	क्रीडाङ्गणम् अस्ति।
III. उदा०–	11.	(भवनम्)	....भवनस्य...	...उपरि.	जलागारम् अस्ति।
	12.	(जलागारः)	.....	.....	काकः अस्ति।
	13.	(उत्पीठिका)	.....	.....	पुस्तकम् अस्ति।
	14.	(सञ्चिका)	.....	.....	नाम लिखितम् अस्ति।
	15.	(दीपः)	.....	.....	कीटः भ्रमति।

IV. उदा०– 16. (उत्पीठिका) उत्पीठिकायाः अधः अवकरिका अस्ति।
17. (वृक्षः) .... बालाः क्रीडन्ति।
18. (वित्तकोशः) .... कार्यालयः अस्ति।
19. (पत्रभारः) .... अद्यतनपत्रिका अस्ति।
20. (सोपानम्) .... बिडालः अस्ति।

V. उदा०– 21. (उत्पीठिका) उत्पीठिकायाः वामतः अवकरिका अस्ति।
22. (आम्रवृक्षः) .... कदलीवृक्षः अस्ति।
23. (नलिका) .... द्रोणी अस्ति।
24. (लेखनी) .... मापिका अस्ति।
25. (मन्दिरम्) .... उद्यानम् अस्ति।

VI. उदा०– 26. (कार्यालयः) कार्यालयस्य दक्षिणतः उपाहारगृहम् अस्ति।
27. (मार्गः) .... आम्रवृक्षाः सन्ति।
28. (पाठशाला) .... ग्रन्थालयः अस्ति।
29. (भवनम्) .... आपणः अस्ति।
30. (व्यजनम्) .... पिञ्जरम् अस्ति।

VII. उदा०– 31. (स्यूतः) स्यूतस्य अन्तः धनम् अस्ति।
32. (पाकशाला) .... चुल्लिः अस्ति।
33. (भवनम्) .... यन्त्राणि सन्ति।
34. (प्रकोष्ठः) .... कपाटिका अस्ति।
35. (पेटिका) .... वस्त्राणि सन्ति।

अभ्यासः – 231

पुरतः / पृष्ठतः / उपरि / अधः / वामतः / दक्षिणतः / अन्तः
इति शब्दानां प्रयोगे षष्ठी

कोष्ठगतपदानां षष्ठ्यन्तरूपैः उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–
[कोष्ठक में दिये गये शब्दों की षष्ठी विभक्ति के रूपों से उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by changing the words given in brackets into sixth case ending.]

उदा0 – 1. ....पर्वतस्य... वामतः नदी प्रवहति। (पर्वतः)
2. ..... पृष्ठतः क्रीडाक्षेत्रम् अस्ति। (विद्यालयः)
3. ..... अधः विडालः स्वपिति। (फलकम्)
4. ..... उपरि कोकिलः कूजति। (आम्रवृक्षः)
5. ..... पुरतः न्यायालयः अस्ति। (सचिवालयः)
6. ..... दक्षिणतः ध्यानकेन्द्रम् अस्ति। (व्यायामशाला)
7. ..... पृष्ठतः गुप्तमार्गः अस्ति। (प्रधानमार्गः)
8. ..... अन्तः मण्डूकः रटति। (कूपः)
9. ..... वामतः वसतिगृहम् अस्ति। (वित्तकोषः)
10. ..... उपरि हस्तिपकः अस्ति। (गजः)
11. ..... अन्तः पुष्पाणि सन्ति। (उद्यानम्)
12. ..... पुरतः तुलसीवृक्षः अस्ति। (गृहम्)
13. ..... पृष्ठतः वित्तकोषः अस्ति। (पाठशाला)
14. ..... वामतः देवगृहम् अस्ति। (पाकशाला)
15. ..... अधः नासिका अस्ति। (नेत्रे)
[मध्यस्थ शब्द के यथोचित रूपों से वाक्यों की रचना कर रिक्त स्थानों की पूर्ति कीजिए। Please fill in the blanks by using the appropriate form of the word given in the centre.]

I.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

II.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

III.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

IV.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

V.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

VI.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

VII.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

VIII.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

IX.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

X.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

XI.



1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

XII.


वयम्
..... धनं स्वीकरोतु
..... न वदति वा
..... देशस्य नाम भारतम्
..... सह भवती अपि आगच्छतु
..... आसन्दे उपविशामः
..... भेदभावः किमर्थम्
..... तानि पुस्तकानि ..... ददातु

1. ..... ।
2. ..... ।
3. ..... ।
4. ..... ।
5. ..... ।
6. ..... ।
7. ..... ।

[6.2.4 शब्दरूपाभ्यासः]

अभ्यासः – 282

सप्तसु विभक्तिषु प्रयोगाः

वाक्येषु लिखितेभ्यः शब्देभ्यः यथोचितविभक्तिं योजयन्तः वाक्यानि लिखन्तु–
[अधोलिखित वाक्यों में प्रयुक्त शब्दों से यथोचित विभक्तियों को जोड़कर वाक्यों को लिखिए।
Please write down sentences by adding proper *Vibhaktis* to the words.]

उदा0– 1. ...राम. विद्यालय. गच्छति।	..रामः..	.विद्यालयं....	गच्छति...।
2. तत् (पुं0) भोजन कुर्वन्ति।	.....	.....	.....।
3. अस्मद् फल खादामि।	.....	.....	.....।
4. मूर्ख सज्जन निन्दन्ति।	.....	.....	.....।
5. छात्र कन्दुक क्रीडतः।	.....	.....	.....।
6. युष्मद् रोटिका खादसि।	.....	.....	.....।
7. युष्मद् संस्कृत जानीथ।	.....	.....	.....।
8. तत् (पुं0) विद्यालय अगच्छन्।	.....	.....	.....।
9. अस्मद् फल आनयामः।	.....	.....	.....।
10. वैद्य औषध यच्छन्ति।	.....	.....	.....।
11. रुग्ण कष्ट अनुभवन्ति।	.....	.....	.....।
12. दुष्ट खग मारयति।	.....	.....	.....।
13. एतत् (स्त्री0) रङ्गवल्ली लिखति।	.....	.....	.....।
14. जननी पुत्र स्मरति।	.....	.....	.....।
15. गृहिणी पाक कुर्वन्ति।	.....	.....	.....।
16. तत् (पुं0) आसन्द नयन्ति।	.....	.....	.....।
17. महिला शाटिका क्रीणन्ति।	.....	.....	.....।
18. चोर चौर्य करोति।	.....	.....	.....।
19. एतद् (स्त्री0) फलरस पिबन्ति।	.....	.....	.....।
20. तत् (स्त्री0) पत्र लिखन्ति।	.....	.....	.....।
21. अस्मद् नगरी गच्छामः।	.....	.....	.....।
22. नारी गीत गायन्ति।	.....	.....	.....।
23. पण्डित ग्रन्थ पठन्ति।	.....	.....	.....।
24. तत् (पुं0) काव्य लिखन्ति।	.....	.....	.....।

अभ्यासः – 283

सप्तसु विभक्तिषु प्रयोगाः

✍ **शब्दानाम् उचितानि विभक्तिरूपाणि लिखित्वा कथां पुनः लिखन्तु–**
[शब्दों के उचित विभक्ति–रूपों को लिखकर कथा को पुनः लिखिए। Rewrite the story by using proper *Vibhakti* forms of the words.]

उदा०– 1. राम अयोध्या महाराज आसीत्।
2. तत् पत्नी सीता।
3. राम पितृ नाम दशरथ।
4. जननी नाम कौसल्या।
5. राम 3 सहोदर आसन्।
6. प्रथम नाम लक्ष्मण।
7. द्वितीय नाम भरत।
8. तृतीयस्य नाम शत्रुघ्न।
9. राम कैकेयी इच्छानुसारं वन गतवान्।
10. वन तत् सुग्रीव आञ्जनेय च प्राप्तवान्।
11. रावण वन सीता अपहृतवान्।
12. राम अतीव दुःखित अभवत्।
13. आञ्जनेय साहाय्येन राम सीता पुनः प्राप्तवान्।
14. वनवास समाप्य अयोध्या प्रति आगतवान्।

उदा०– 1. ..रामः.. ..अयोध्यायाः .....महाराजः... .....आसीत्।
2. ....।
3. ....।
4. ....।
5. ....।
6. ....।
7. ....।
8. ....।
9. ....।
10. ....।
11. ....।
12. ....।
13. ....।
14. ....।

अभ्यासः – 284

सप्तसु विभक्तिषु प्रयोगाः

शब्दानाम् उचितानि विभक्तिरूपाणि लिखित्वा कथां पुनः लिखन्तु–
[शब्दों के उचित विभक्ति–रूपों को लिखकर कथा को पुनः लिखिए। Rewrite the story by using proper *Vibhakti* forms of the words.]

उदा०– 1. **एक वृद्ध** आसीत्।
2. **तत्** चत्वारः **पुत्र** आसन्।
3. ते **अतीव अलस** आसन्।
4. **अलस पुत्र** दृष्ट्वा वृद्धः कदाचित् **एक उपाय** चिन्तितवान्।
5. **तत् पुत्र** आहूय उक्तवान् **क्षेत्र धन** अस्ति।
6. कुत्र अस्ति इति **अस्मद्** विस्मृतवान्।
7. **भवत्** अन्विष्य स्वीकुर्वन्तु।
8. **सुख** जीवन्तु इति।
9. **पुत्र सन्तोष क्षेत्र खनन** कृतवन्तः।
10. कुत्रापि धनं न लब्धम्।
11. **खातभूमि धान्य वपन** कृत्वा **कृषि** कृतवन्तः।
12. **जनक आशय** ज्ञात्वा **तत् सन्तुष्ट** अभवन्।
13. अनन्तरम् **आलस्य** परित्यज्य **सुख** जीवितवन्तः।

उदा०– 1. ..एकः... .....वृद्धः..... .....आसीत्. ।
2. .... ।
3. .... ।
4. .... ।
5. .... ।
6. .... ।
7. .... ।
8. .... ।
9. .... ।
10. .... ।
11. .... ।
12. .... ।
13. .... ।

अभ्यासः – 285

सम्भाषणे समुचितं द्वितीयं वाक्यं मञ्जूषातः लिखन्तु–

1. नन्दिनि, किं भवत्याः दर्शनम् एव नास्ति।

   .....।

2. ग्रामे कः विशेषः आसीत् ?

   .....।

3. भवत्याः जनकस्य षष्टिवर्षाणि वा ?

   .....।

4. किं किम् आसीत्।

   .....।

5. केषां सम्माननं कृतवन्तः ?

   .....।

6. युक्तं कृतम्। निःस्वार्थभावेन समाजसेवायां निमग्नानां सम्माननकर्तारः विरलाः एव। कदा आगतवती ग्रामतः ?

   .....।

7. तथापि दर्शनं न अभवत्।

   .....।

8. इदानीं भवत्याः पुत्रः कथम् अस्ति? वैद्यं दर्शितवती वा ?

   .....।

9. घर्मस्य आधिक्येन तथा जातं स्यात्।

   .....।

10. आगच्छतु, गृहं गच्छाव।

    .....।

11. तर्हि श्वः आगच्छतु।

    .....।

आम्।
आम्, ग्रामं गतवती आसम्।
सायं च केषाञ्चन सम्माननम् आसीत्।
ये समाजसेवां निस्स्वार्थभावनया कुर्वन्तः सन्ति, तेषां केषाञ्चन सम्माननम् आसीत्।
मम जनकस्य षष्ट्यब्धिसमारम्भः आसीत्।
गतसप्ताहे एव आगवती।
मम पुत्रस्य अनारोग्यम् आसीत्।
आम्।
वातावरणस्य प्रभावः इत्येव उक्तं वैद्येन।
नैव इदानीं गृहं गन्तव्यम्।
तदर्थम् प्रातः पूजाहोमादिकं च आसीत्।
अस्तु श्वः सायम् अवश्यम् आगमिष्यामि।

अभ्यासः – 286

संख्याभ्यासः

संख्याम् अक्षरैः लिखन्तः कथां पूरयन्तु–
[संख्या को अक्षरों में लिखते हुए कथा की / घटना की पूर्ति कीजिए। Complete the story / event by writing words in place of numbers.]

I. ..... (१) पण्डितः आसीत्। तस्य ..... (३) पुत्राः आसन्। तेषु ..... (१) पुत्रः मन्दमतिः। एकदा पण्डितः तम् आहूय अवदत् – "आपणं गत्वा ..... (५) नारिकेलफलानि, ... (१२) कदलीफलानि च आनयतु"। तदर्थम् ..... (१) स्यूतम् ..... (१) कूर्पीं च नयतु इति। मन्दमतिः आपणं गत्वा उक्तवान् ..... (५) स्यूतान् ..... (१२) कूर्पीः ..... (१) नारिकेलफलं ..... (१) कदलीफलं च ददातु इति। आपणिकः तथैव दत्तवान्।

II विश्वनाथस्य गृहे बहवः जनाः सन्ति। तस्य ..... (१) सहोदरः वित्तकोषे कार्यं करोति। ..... (१) सहोदरी उट्टङ्किका। ..... (२) सहोदरौ यन्त्रागारे कार्यं कुरुतः। ..... (२) सहोदर्यौ पत्रालये कार्यं कुरुतः। ..... (१) सहोदरः विद्यालयं गच्छति। तस्य ..... (२) पुत्रौ महाविद्यालयं गच्छतः। ..... (२) पुत्र्यौ पञ्चमकक्ष्यायां पठतः। तस्य गृहे ..... (१) कर्मकरी कार्यं करोति।

[6.3 तृतीयः पाठः]

श्लोकाभ्यासः

वर्तमाने

6.3.1 क्रियापदश्लोकाः

अधोलिखितपद्यानि पठन्तु। वर्तमानकालिकक्रियापदानि रेखाङ्कितानि कुर्वन्तु–
[निम्नलिखित श्लोकों को पढिये। वर्तमान काल की क्रियाओं को रेखाङ्कित कीजिए। Read the following verses. Underline the verbs in present tense.]

हृष्यत्येको मणिं लब्ध्वा कुप्यत्येको ह्यलाभतः।
पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति।

अर्थः– अमूल्यं मणिं प्राप्य एकः सन्तुष्टः भवति। 'तम् अहं न लब्धवान्' इति अपरः कोपं प्राप्नोति। किन्तु वैराग्ययुक्तः तं मणिं दृष्ट्वा अपि न सन्तोषं प्राप्नोति न वा कोपम्।

मतयो यत्र गच्छन्ति तत्र गच्छन्ति वानराः।
शास्त्राणि यत्र गच्छन्ति तत्र गच्छन्ति वै नराः।।

अर्थः– मनः यत्र गच्छति तत्र ये गच्छन्ति ते वानराः। शास्त्राणि विवेकः वा यत्र गच्छन्ति तत्र ये गच्छन्ति ते एव नराः = मनुष्याः। वानर-नरयोः एषः एव भेदः।

अभ्यासः – 287.

उपर्युक्तश्लोकयोः अर्थं पठित्वा अधः दत्तानां प्रश्नानाम् उत्तरं लिखन्तु–
[ऊपर कहे गए श्लोकों के अर्थ को समझकर नीचे दिए गए प्रश्नों के उत्तर लिखिए। Answer the following questions based on the above given verses.]

1. किं प्राप्य एकः हृष्यति ?
....।
2. किमर्थम् अपरः कुप्यति ?
....।
3. विरक्तः किं करोति ?
....।
4. वानराः के ?
....।
5. नराः के ?
....।

काव्यं करोमि न हि चारुतरं करोमि
यत्नात् करोमि यदि चारुतरं करोमि।
भूपालमौलिमणिमण्डितपादपीठ !
हे साहसाङ्क ! कवयामि वयामि यामि।

अर्थः– कश्चन कुविन्दः भोजमहाराजं वदति–"अहं विशेषप्रयत्नं विना सामान्यकाव्यं रचयितुं शक्नोमि। यदि विशेषप्रयत्नं करोमि तर्हि उत्तमकाव्यं रचयितुं शक्नोमि। हे महाराज ! अहं काव्यं करोमि, वयामि = वस्त्रनिर्माणं करोमि। यामि = गच्छामि" इति।

वने चरामो वसु चाहरामो
नदीस्तरामो न भयं स्मरामः।
इतीरयन्तोऽपि वने किराताः
मुक्तिं गताः रामपदानुषङ्गात्।

(वसु = ऐश्वर्यम्, आहरामः = अपहरामः, ईरयन्तः = वदन्तः, अनुषङ्गः = सम्बन्धः)

अर्थः– 'वयं वने सञ्चरामः, ऐश्वर्यं बलात् आहरामः, नदीः तरामः, भयं न स्मरामः' इति वनवासिनः किराताः वदन्ति। तेषां वाक्येषु 'रामः' इति शब्दः अनायासम् आगतः। तस्य कारणतः एव ते मुक्तिं प्राप्तवन्तः। एवम् अस्ति रामनाममहिमा।

अभ्यासः – 288

उपर्युक्तयोः श्लोकयोः अर्थं पठित्वा अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु–
[ऊपर कहे गए श्लोकों के अर्थ को समझकर अधोलिखित प्रश्नों के उत्तर दीजिए। Please read the above verses and answer the following questions.]

1. कुविन्दः काव्यं कर्तुं शक्नोति किम् ?
....।
2. उत्तमकाव्यं रचयितुं सः कदा शक्नोति ?
....।
3. किरातैः उच्चारितानि चत्वारि क्रियापदानि कानि ?
....।
4. किराताः कस्मात् कारणात् मुक्तिं गताः ?
....।

आज्ञाद्यर्थेषु

✍ **अधोलिखितानि पद्यानि पठित्वा आज्ञार्थकक्रियापदानि रेखाङ्कितानि कुर्वन्तु–**
[निम्नलिखित पदों को पढ़कर आज्ञार्थक क्रियाओं को रेखाङ्कित कीजिए। Read the following verses and underline the verbs in imperative.]

त्यज दुर्जनसंसर्गं भज साधुसमागमम्।
कुरु पुण्यमहोरात्रं स्मर नाम हरेः सदा।।

(संसर्गः = सम्पर्कः, समागमः = सहवासः, संयोगः)

अर्थः– दुष्टजनानां सहवासं मा कुरु। सज्जनानां सहवासं कुरु। अहोरात्रं पुण्यकार्याणि कुरु। सर्वदा देवस्य नामस्मरणं कुरु।

धर्मं चरत माऽधर्मं सत्यं वदत माऽनृतम्।
दीर्घं पश्यत मा ह्रस्वं परं पश्यत माऽपरम्।।

अर्थः– यूयं धर्मम् आचरत। अधर्मं न आचरत। यूयं सत्यं वदत। असत्यं न वदत। यूयं दीर्घलक्ष्यं पश्यत। अल्पलक्ष्यं मा पश्यत। यूयं श्रेष्ठं तत्त्वं पश्यत। क्षुद्रं तत्त्वं न पश्यत।

अभ्यासः – 289

✍ **उपर्युक्तश्लोकयोः अर्थं पठित्वा अधः दत्तेषु वाक्येषु रिक्तस्थानानि पूरयन्तु–**
[ऊपर कहे गए श्लोकों के अर्थ को समझकर नीचे दिए गए वाक्यों के रिक्त स्थानों की पूर्ति कीजिए। please complete the following sentences on the basis of above given verses.]

1. .... मा कुरु। ..... सहवासं कुरु।
2. अहोरात्रं ..... कुरु।
3. सर्वदा .... कुरु।
4. यूयं ..... आचरत। ..... न .....।
5. यूयं ..... वदत। ..... न .....।
6. यूयं ..... पश्यत। ..... मा .....।
7. यूयं .... पश्यत। .... न .....।

सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु
मा कश्चित् दुःखभाग् भवेत् ।।

(निरामयाः = रोगरहिताः, स्वस्थाः, भद्रम् = मङ्गलम्, दुःखभाक् = दुःखयुक्तः)

अर्थः – लोके सर्वे जनाः सुखयुक्ताः भवन्तु। सर्वे आरोग्ययुक्ताः भवन्तु। सर्वे मङ्गलानि पश्यन्तु। कोऽपि दुःखं न प्राप्नोतु।

अपुत्राः पुत्रिणः सन्तु
पुत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु
सज्जनाः सन्तु निर्भयाः ।।

(पुत्रिणः = पुत्रयुक्ताः, अधनाः = निर्धनाः, सधनाः = धनिकाः)

अर्थः– लोके पुत्ररहिताः पुत्रं प्राप्नुवन्तु। ये पुत्रवन्तः सन्ति ते पौत्रान् प्राप्नुवन्तु। निर्धनाः धनिकाः भवन्तु। सज्जनाः भयरहिताः भवन्तु।

अभ्यासः – 290

उपरितनश्लोकयोः अर्थं पठित्वा अधः भागद्वये दत्तानि पदानि योग्यक्रमेण योजयन्तु। ततः सिद्धानि वाक्यानि पुनः लिखन्तु–

[दो भागों में दिए गए अधोनिर्दिष्ट पदों को उपरि लिखित श्लोकों के अर्थ के आधार पर उचित क्रम से मिलाइए एवं समायोजित वाक्यों को पुनः लिखिए। Match the words given in column अ and आ on the basis of the meanings of the above given verses and re-write them.]

	अ	+	आ
I. 1.	सर्वे भवन्तु		भवन्तु
2.	दुःखयुक्ताः		पश्यन्तु
3.	स्वस्थाः		सुखिनः
4.	मङ्गलम्		मा भवन्तु

1. ....सर्वे..... .....भवन्तु... ..सुखिनः.. ।
2. .... ।
3. ....सर्वे... .... ।
4. .... ।

	अ	+	आ
II.	अपुत्राः		भीतिरहिताः
	पुत्रिणः		धनिकाः
	अधनाः		पुत्रिणः
	सज्जनाः		पौत्रिणः

1. .... सन्तु ।
2. .... सन्तु ।
3. .... सन्तु ।
4. .... सन्तु ।

भविष्यकाले

✍ **अधोलिखितं पद्यं पठित्वा भविष्यकालिकक्रियापदानि रेखाङ्कितानि कुर्वन्तु–**

[निम्नलिखित पद्यों को पढ़कर भविष्यकाल की क्रियाओं को रेखाङ्कित कीजिए। Read the following verses and underline the words in future tense.]

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त, हन्त ! नलिनीं गज उज्जहार।।

(भास्वान् = सूर्यः, श्रीः = शोभा, इत्थम् = एवं प्रकारेण, द्विरेफः = भ्रमरः, उज्जहार = उत्खातवान्, नाशितवान्, अपहृतवान्)

कश्चन भ्रमरः मधु पिबन् कमले उपविष्टः आसीत्। यदा सूर्यास्तः जातः तदा कमलं मुकुलितं जातम्। कमलस्य अन्तः भ्रमरः बद्धः जातः। तादृशः भ्रमरः "रात्रिः अपगता भविष्यति। प्रभातं च भविष्यति। ततः सूर्योदयः भविष्यति। कमलं च विकसिष्यति। ततः अहम् ....." इति यावत् चिन्तयन् आसीत् तदा कश्चन गजः आगत्य तत् भ्रमरयुक्तं कमलम् एव अनाशयत्। एवं स्वप्नं पश्यन् एव भ्रमरः पञ्चत्वं गतः। मनुष्यस्य अपि जीवने एवं भवति खलु कदाचित् ?

क्त्वा–

अकृत्वा परसन्तापम् अगत्वा खलनम्रताम्।
अनुत्सृज्य सतां वर्त्म यत् स्वल्पम् अपि तद् बहु।।

(परः = अन्यः, खलः = दुर्जनः, अनुत्सृज्य = अत्यक्त्वा, सतां = सज्जानानां, वर्त्म = मार्गः)

अर्थः– परपीडनम् अकृत्वा दुष्टानां आश्रयम् अप्राप्य, सज्जनानां वर्त्म अत्यक्त्वा जीवनं यापयन्तु। एवं कृते यत् स्वल्पम् अपि फलं प्राप्यते तद् एव बहु मन्तव्यम्। यतः तदेव चिरस्थायि शुभपरिणामकरं च भवति।

तुमुन्

उपकर्तुं प्रियं वक्तुं
कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं
केनेन्दुः शिशिरीकृतः ।।

(इन्दुः = चन्द्रः; शिशिरीकृतः = शीतलीकृतः)

अर्थः– सज्जनाः विशेषकारणं विना अपि उपकारं कुर्वन्ति। प्रियवचनानि वदन्ति, निर्व्याजस्नेहं च कुर्वन्ति। एषः तेषां स्वभावः अस्ति। इन्दुः न हि केनापि शीतलीकृतः। स तु स्वभावतः एव शीतलः भवति।

अभ्यासः – 291

उपयुर्क्तश्लोकानाम् अर्थं पठित्वा अधः दत्तानां प्रश्नानाम् उत्तराणि लिखन्तु–
[उपर्युक्त श्लोकों के अर्थ समझकर अधोनिर्दिष्ट प्रश्नों के उत्तर लिखिए। Please read the above given verses and answer the following questions.]

1. भ्रमरः कुत्र आसीत् ?

   .... ।

2. गजः किम् अखादत् ?

   .... ।

3. केषां मार्गं न त्यजेम ?

   .... ।

4. सज्जनाः कीदृशं स्नेहं कुर्वन्ति ?

   .... ।

5. सज्जनाः कीदृशानि वचनानि वदन्ति ?

   .... ।

[6.3.2 विभक्तिश्लोकाः]

6.3.2.1 द्वितीया

अधोलिखितानि पद्यानि पठित्वा द्वितीयान्तानि पदानि रेखाङ्कितानि कुर्वन्तु–

[निम्नलिखित पद्यों को पढ़कर द्वितीया विभक्ति वाले पदों को रेखाङ्कित कीजिए। Read the following verses and underline the words in second case - ending.]

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।

(वन्दे = नमामि, नमस्करोमि)

अर्थः– कृष्णः वसुदेवस्य पुत्रः। देवक्याः आनन्दस्य वर्धकः। कंसचाणूरनामकयोः राक्षसयोः संहारकः। सः जगद्गुरुः अपि। तं कृष्णम् अहं नमामि।

रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् ।
शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति ।।

(वैनतेयः = गरुडः; वृकोदरः = भीमः; स्कन्दः = षण्मुखः)

अर्थः– यः शयनसमये रामं, षण्मुखम्, आञ्जनेयं, गरुडं, भीमं च स्मरति तस्य दुःस्वप्नाः नश्यन्ति।

अच्युतं केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं
जानकीनायकं रामचन्द्रं भजे ।।

(भजे = भजामि)

श्रीकृष्णस्य नामानि बहूनि – अच्युतः, केशवः, रामः, नारायणः, कृष्णः, दामोदरः, वासुदेवः, हरिः, श्रीधरः, माधवः, गोपीवल्लभः, जानकीपतिः, रामचन्द्रः, इत्यादीनि। तादृशं कृष्णम् अहं भजामि।

अभ्यासः – 292

'द्वितीया' सम्बद्धान् श्लोकान् पठित्वा अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु–

['द्वितीया' विभक्ति से सम्बद्ध श्लोकों को पढ़कर अधोलिखित प्रश्नों के उत्तर दीजिए। Please answer the following questions by going through the verses related to second case - ending.]

1. कृष्णः कस्य पुत्रः ?

   .... ।

2. कृष्णः कयोः मर्दनः ?

   .... ।

3. कृष्णः कस्याः आनन्दवर्धकः ?

   .... ।

4. रामस्कन्दादीनां स्मरणतः के नश्यन्ति ?

   .... ।

5. त्वं कं भजसि ?

   .... ।

6.3.2.2 तृतीया

अधोलिखितानि पद्यानि पठित्वा तृतीयान्तपदानि रेखाङ्कितानि कुर्वन्तु–

[निम्नलिखित पद्यों को पढकर तृतीयान्त पदों को रेखाङ्कित कीजिए। [Read the following verses and underline the words ending in third case - ending.]

गन्धेन हीनं सुमनं न शोभते,
दन्तैर्विहीनं वदनं न भाति।
सत्येन हीनं वचनं न दीप्यते
पुण्येन हीनः पुरुषो जघन्यः।।

(न शोभते = न भाति = न दीप्यते = न शोभां ददाति, जघन्यः – निन्दायोग्यः, सुमनं = पुष्पम्)

अर्थः– गन्धः नास्ति चेत् पुष्पस्य शोभा नास्ति। दन्ताः न सन्ति चेत् मुखस्य शोभा नास्ति। सत्ययुक्तता नास्ति चेत् वचनस्य शोभा नास्ति। यः पुण्यसम्पादनं न करोति तस्यापि शोभा नास्ति।

दम्भेन धर्मं कपटेन मैत्रीं
सुखेन विद्यां परुषेण नारीम्।

परोपतापेन समृद्धभावं
वाञ्छन्ति ये व्यक्तमपण्डितास्ते।

(दम्भेन = बाह्याडम्बरेण, परुषेण – कठोरतागुणेन, उपतापः = पीडनम्, व्यक्तम् = स्पष्टतया)

अर्थः– दम्भेन बाह्याडम्बरेण ये धर्मं पुण्यम् उपार्जितुम् इच्छन्ति, कपटेन = छलेन ये मैत्रीं निर्वाहयितुम् इच्छन्ति, क्लेशं = परिश्रमं विना सुखेन एव ये विद्याम् उपार्जितुम् इच्छन्ति, परुषेण = कठोरत्वेन ये नारीं वशीकर्त्तुम् इच्छन्ति, परपीडनेन = दुर्बलानां दरिद्राणां वा शोषणेन ये समृद्धिं वाञ्छन्ति ते निश्चयेन अपण्डिताः मूर्खाः एव सन्ति।

विना–

विना शीलेन वनिता
वाग्मिता विद्यया विना।
विनयेन विना वित्तं
मास्तु कस्यापि देहिनः।।

(वित्तं = धनम्, देहिनः = मानवस्य)

अर्थः– शीलेन विना स्त्री न शोभते। विद्यया विना वक्तृत्वं न शोभते। विनयेन विना सम्पत्तिः न शोभते। अतः शीलविहीना स्त्री, विद्याविहीना वक्तृता, विनयविहीनं धनं च कस्यापि जनस्य न भवतु।

सह– पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह।
पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह।।

अर्थः– यात्रादिप्रसङ्गे बहुभिः जनैः सह गन्तव्यम्। बहुभिः सह वासः करणीयः। बहुभिः सह सम्भाषणं परामर्शादिकं करणीयम्। एवं बहुभिः सह मिलित्वा कार्यकरणेन दुःखं न भवति। (अस्मिन् श्लोके पञ्च इति सङ्ख्या बहुलतां सूचयति।)

अभ्यासः – 293

'तृतीया' सम्बद्धश्लोकान् पठित्वा अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु–

[तृतीया विभक्ति से सम्बद्ध श्लोकों को पढ़कर अधोलिखित प्रश्नों के उत्तर दीजिए। Please answer the following questions by going through the verses related to third case - ending.]

1. कीदृशं पुष्पं न शोभते ?

   ....।

2. कीदृशं वदनं न भाति ?

   ....।

3. कीदृशः पुरुषः निन्द्यः ?

   ....।

4. ये कपटेन मैत्रीं वाञ्छन्ति ते के ?

   ....।

5. वक्तृत्वं कया विना न शोभते ?

   ....।

6. सम्पत्तिः केन विना न शोभते ?

   ....।

7. किं बहून् न वदेम ?

   ....।

6.3.2.3 चतुर्थी

अधोलिखित-पद्यानि पठित्वा चतुर्थ्यन्तपदानि रेखाङ्कितानि कुर्वन्तु–

[निम्नलिखित पद्यों को पढकर चतुर्थ्यन्त पदों को रेखाङ्कित कीजिए। [Read the following verses and underline the words in fourth case - ending.]

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः।।

(वेधसे = सृष्टिकारकाय)

अर्थः– रामाय नमः। रामभद्राय नमः। रामचन्द्राय नमः। संसारस्य कारकाय रामाय नमः। रघूणां नाथाय नमः। प्रभुरूपाय नमः। सीतायाः पतये नमः।

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय।।

(परेषाम् = अन्यजनानाम्, खलस्य = दुर्जनस्य विपरीतम् = विरुद्धम्)

अर्थः– दुर्जनस्य विद्या विवादाय भवति, धनं मदाय भवति, शक्तिः परेषां परिपीडनाय भवति। किन्तु सज्जनस्य विद्या ज्ञानाय, धनं दानाय, शक्तिः परेषां रक्षणाय च भवति। सज्जनदुर्जनयोः एषः भेदः।

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय
तस्मै 'न'-काराय नमः शिवाय।।

शिवः सर्पं हाररूपेण धृतवान्। सः त्रिनेत्रः। सः भस्मलेपनं करोति। सः महेश्वरः नित्यः शुद्धः च। सः दिगम्बरः अपि। 'ओं नमः शिवाय' इति वाक्ये यः 'न' कारः अस्ति, तेन एव निर्दिष्टं शिवस्य स्वरूपं सङ्केतितं भवति। तादृशाय शिवाय नमः।

अभ्यासः – 294

'चतुर्थी' सम्बद्धश्लोकानाम् अर्थं पठित्वा अधस्तनप्रश्नानाम् उत्तरं लिखन्तु–

[चतुर्थी विभक्ति से सम्बद्ध श्लोकों का अर्थ समझकर अधोलिखित प्रश्नों का उत्तर दीजिए। please answer the following questions by going through the verses related to fourth case - ending.]

1. रामः कस्याः पतिः ? केषां नाथः ?
   ....। ....।
2. दुर्जनस्य विद्या किन्निमित्तं भवति ?
   ....।
3. सज्जनस्य शक्तिः किन्निमित्तं भवति ?
   ....।
4. शिवः सर्पं केन रूपेण धृतवान् अस्ति ?
   ....।
5. शिवस्य कति लोचनानि ?
   ....।

6.3.2.4 पञ्चमी

अधोलिखितानि पद्यानि पठित्वा पञ्चम्यन्तपदानि रेखाङ्कितानि कुर्वन्तु–

[निम्नलिखित पद्यों को पढ़कर पञ्चम्यन्त पदों को रेखाङ्कित कीजिए। [Please read the following verses and underline the words in fifth case - ending.]

मानाद्वा यदि वा क्रोधात्
लोभाद्वा यदि वा भयात्।
यो न्यायमन्यथा ब्रूते
स याति नरकं नरः।।

(ब्रूते = वदति, याति = गच्छति)

यः मानवः अभिमानकारणतः, क्रोधकारणतः, लोभकारणतः, भयकारणतः वा न्यायम् अन्यायरूपेण वदति, सः नरकं गच्छति।

धर्मादर्थात् भयात् कामात् कारुण्यादिति भारत।
दानं पञ्चविधं ज्ञेयम् इति विज्ञा ब्रुवन्ति हि।।

जनाः प्रायः धर्मकारणतः, स्वलाभकारणतः, भयकारणतः, विशेषेच्छाकारणतः, दयाकारणतः च दानं कुर्वन्ति इति पण्डिताः वदन्ति।

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्।।

जनाः विद्याभ्यासतः विनयं प्राप्नुवन्ति। विनयात् योग्यतां प्राप्नुवन्ति। योग्यतातः धनं प्राप्नुवन्ति। धनात् धर्माचरणसामर्थ्यं प्राप्नुवन्ति। ततः सुखं प्राप्नुवन्ति।

अभ्यासः – 295

'पञ्चमी' सम्बद्धश्लोकानाम् अर्थं पठित्वा अधस्तनवाक्येषु रिक्तस्थानानि पूरयन्तु–
[पञ्चमी विभक्ति से सम्बद्ध श्लोकों का अर्थ समझकर अधोलिखित वाक्यों के रिक्त स्थानों की पूर्ति कीजिए। Please read the meanings of the verses related to fifth case - ending and fill in the blanks in the following sentences.]

1. मानात्, ..., लोभात्, ... च केचन न्यायम् अन्यायरूपेण वदन्ति।
2. धर्मात्, ..., भयात्, ..., ... इति दानं पञ्चविधम्।
3. विद्यातः ....., विनयतः ....., पात्रत्वात् ..... च जनाः प्राप्नुवन्ति।
4. धनात् ..... धर्मात् ..... च जनाः प्राप्नुवन्ति।

6.3.2.5 षष्ठी

अधोलिखितानि पद्यानि पठित्वा षष्ठ्यन्तपदानि रेखाङ्कितानि कुर्वन्तु–
[निम्नलिखित पद्यों को पढ़कर षष्ठी विभक्ति वाले पदों को रेखाङ्कित कीजिए। Read the following verses and underline the words in sixth case - ending.]

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः।
फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः।।

जनाः पुण्यस्य फलम् इच्छन्ति। किन्तु पुण्यकार्याणि न कुर्वन्ति। पापस्य फलं तु न इच्छन्ति। किन्तु व्यवहारेण पापम् एव आचरन्ति।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।।

(आदानम् = विद्याग्रहणम्, क्षिप्रम् – शीघ्रम्)

विद्यायाः ग्रहणम् धनस्य दानम्, करणीयं कर्म च यदि शीघ्रं न कुर्मः तर्हि कालः तत् नाशयति।

पापानां शोधकं नित्यं परानन्दस्य बोधकम्।
रोचकं चित्तवृत्तीनां भजध्वं नाम मङ्गलम्।।

(भजध्वम् = भजतु)

भगवन्नाम पापानां निवारकम् अस्ति। तत् परमानन्दं बोधयति। मनसि रुचिम् उत्पादयति। अतः तत् मङ्गलकरं भगवन्नाम सदा उच्चारयन्तु।

अभ्यासः – 296

'षष्ठी' सम्बद्धश्लोकानाम् अर्थं पठित्वा अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु–
[षष्ठी विभक्ति से सम्बद्ध श्लोकों के अर्थ समझकर अधोलिखित प्रश्नों के उत्तर दीजिए। Please read the meanings of the following verses and answer the following questions.]

1. मानवाः कस्य फलम् इच्छन्ति ?
   ....।
2. मानवाः प्रयत्नेन किम् आचरन्ति ?
   ....।
3. करणीयं कार्यं शीघ्रं न कुर्मः चेत् किं भवति ?
   ....।

4. भगवन्नाम केषां निवारकम् अस्ति ?

.... ।

5. भगवन्नाम किम् उत्पादयति ?

.... ।

6.3.2.6 सप्तमी

अधोलिखितानि पद्यानि पठित्वा सप्तम्यन्तपदानि रेखाङ्कितानि कुर्वन्तु–

[निम्नलिखित पद्यों को पढ़कर सप्तम्यन्तपदों को रेखाङ्कित कीजिए। Read the following verses and underline the words in seventh case - ending.]

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे[1]।
सज्जनाः न हि सर्वत्र चन्दनं न वने वने।।

सर्वेषु पर्वतेषु माणिक्यानि न भवन्ति। विशिष्टेषु केषुचित् पर्वतेषु तानि भवन्ति। सर्वेषां गजानां कुम्भस्थले मौक्तिकं न भवति। केषाञ्चित् एव गजानां कुम्भस्थले तत् भवति। सज्जनाः सर्वत्र न भवन्ति, केषुचित् एव प्रदेशेषु भवन्ति। चन्दनवृक्षः अपि सर्वेषु वनेषु न भवति। केषुचित् एव अरण्येषु भवति।

न देवो विद्यते काष्ठे न पाषाणे न मृण्मये।
भावे हि विद्यते देवः तस्मात् भावो हि कारणम्।।

देवः काष्ठमूर्तौ, पाषाणमूर्तौ, मृन्मयमूर्तौ वा वस्तुतः न भवति। यस्य यत्र देवबुद्धिः तत्र सः देवं पश्यति। वयं पाषाणमूर्तौ देवं पश्यामः चेत् तां मूर्तिं देवमूर्तिं भावयामः। एवमेव अन्यमूर्तिविषये अपि। अतः अस्माकं भावना एव मुख्या एतद्विषये।

परनिन्दासु पाण्डित्यं स्वेषु कार्येष्वनुद्यमः।
प्रद्वेषश्च गुणज्ञेषु पन्थानो ह्यापदां त्रयः।।

यः अन्यजनानां निन्दने पाण्डित्यं दर्शयति, यः स्वकर्तव्यानां विषये अनादरं प्रकटयति, गुणयुक्तजनान् प्रति द्वेषं यः करोति सः जीवने विपत्तिं सम्मुखीकरोति। एते त्रयः अपि अंशाः विपत्कारकाः।

---

1. 'गजमस्तके मौक्तिकं भवति' एतत् कथनं किंवदन्तीरूपम् अस्ति, न तु वास्तविकम्।

अभ्यासः – 297

अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु–

[अधोलिखित प्रश्नों के उत्तर दीजिए। Please answer the following questions .]

1. माणिक्यानि कुत्र न भवन्ति ?

....।

2. चन्दनं कुत्र भवति ?

....।

3. देवः केषु अस्ति ?

....।

4. परनिन्दासु पाण्डित्यं यः प्रदर्शयति तस्य किं भवति ?

....।

6.4 पत्रलेखनम्

जीवने पत्राणां महत्वं कः न जानाति ? प्रतिदिनं वयं पत्रस्य आवश्यकताम् अनुभवामः। पारिवारिक-वृत्तस्य आदानप्रदानाय, निमन्त्रण-दानाय विविधेषु अवसरेषु शुभकामनादि-सन्देशानां प्रेषणाय च प्रायेण वयं पत्र-व्यवहारं कुर्मः।

न केवलम् एतदेव, अपि तु विविधेषु व्यवसायेषु कार्यालयेषु च विविधानि प्रयोजनानि उद्दिश्य वयं विविधप्रकारकाणि पत्राणि लिखामः। इत्थं च पत्रस्य द्विविधं स्वरूपं भवति।

(i) वैयक्तिकम्।
(ii) व्यावसायिकं कार्यालयीयं वा।

वैयक्तिक-पत्रस्य स्वरूपम्

(1) .....

(2) .....
.....
.....

(3) .....

(4) .....

(5) .....।

(6) .....
.....
.....।

(7) .....

(8) .....
.....
.....

❖ **संख्याभिः निर्दिश्यमानाः वर्ण्यविषयाः-**

1. माङ्गलिक-पदम्।
2. स्थानं दिनाङ्कः च।
3. सम्बोधनम्।
4. नमस्कारः अभिवन्दनम् आशीर्वचनं वा।
5. कुशलसूचना।
6. सन्देशः।
7. उपसंहृतिः।
8. प्रेषकस्य परिचयः हस्ताक्षरं च।

6.4.1 वैयक्तिक–पत्रस्य उदाहरणम्

(1) ॐ

(2) दिनाङ्कः .....
नवदेहली

(3) आदरणीयेषु मातापितृचरणेषु

(4) सादरं वन्दनानि

(5) अत्र कुशलं तत्र अस्तु। (6) भवतां पत्रं ह्यः एव आगतम्। पत्रं पठित्वा गृहस्य सर्वमपि वृत्तं ज्ञातवान्। अस्माकम् अध्ययनम् सम्यक् प्रचलति। अर्द्धवार्षिकीं परीक्षां दत्वा अहं शीघ्रमेव गृहम् आगमिष्यामि।

(7) शेषं सर्वं कुशलम्। भवतां पत्रोत्तर–प्रतीक्षायां भविष्यामि।

(8) भावत्कः पुत्रः
देवानन्दः

इदानीं वयं वैयक्तिक–पत्रलेखनाय प्रतिभागं किञ्चिद् विचारयामः।

(1) माङ्गलिकं पदम्–

✉ वैयक्तिक–पत्रस्य प्रारम्भे प्रायः मङ्गलसूचकं पदं लिखामः।

यथा– (i) श्रीः

(ii) ओम्

(iii) ॐ नमः शिवाय

(iv) ॐ नमः गणेशाय

(v) श्री गुरवे नमः

एताः पत्रस्य शीर्षिकाः सन्ति।

2. स्थानं दिनाङ्कः च।

✉ शीर्षिकां लिखित्वा यः पत्रं लिखति, सः स्वकीयं पत्र-सङ्केतं लिखति।

✍ अधोलिखितपत्रसङ्केतं पठन्तु, तदनुसारं प्रश्नानाम् उत्तराणि लिखन्तु-

ॐ

दिनाङ्कः- 10-10-2001
115, कृष्ण नगरम्
जयपुरम्

.....

.....

..... ।

.....

..... ।

..... ।

.....

.....

.....

अभ्यासः - 298

प्र०- 1. यः पत्रं लिखति सः कुत्र वसति ?

यथा- उ० *यः....पत्रं...लिखति...सः...जयपुरे....वसति*..... ।

प्र०- 2. कृष्णनगरं कुत्र अस्ति ?

उ० ..... ।

प्र०- 3. यः पत्रं लिखति तस्य गृह-संख्या का अस्ति ?

उ० ..... ।

प्र०- 4. यः पत्रं लिखति सः पत्रसङ्केतं कुत्र लिखति, दक्षिणे कोणे / वामे कोणे वा ?

उ० ..... ।

3–4. सम्बोधनम्, अभिवादनम्, आशीर्वचनं, वा– *(यं प्रति लिखामः तं प्रति)*

📖 **अधोलिखितां तालिकां पठन्तु–**

यं प्रति	सम्बोधनम्	नमस्कारः / अभिवादनम् / आशीर्वचनं वा
मित्रं प्रति	प्रिय वयस्य !	सस्नेहं नमस्ते
गुरुजनान् प्रति	परमपूज्यगुरुवर्याः !	सादरं प्रणामाः
शिष्यं प्रति	प्रिय शिष्य !	शुभाशिषः
जनकं प्रति	परमपूज्यपितृमहाभागाः !	सादरं प्रणमामि
अम्बां प्रति	परमपूज्ये अम्ब !	सादरं चरणवन्दनानि
भगिनीं प्रति	प्रिये भगिनि !	सस्नेहप्रणामाः
अनुजं प्रति	प्रिय अनुज !	आशीर्वादाः
सखीं प्रति	प्रिये सखि !	नमस्ते
.....	.....	.....

अभ्यासः – 299

✍ **अधोलिखितां सारणीं पूरयन्तु–**

यं प्रति	सम्बोधनम्	नमस्कारः / अभिवादनम् / आशीर्वचनं वा
अम्बां प्रति	.....	.....
जनकं प्रति	.....	.....
गुरुं प्रति	.....	.....
अग्रजं प्रति	.....	.....
अनुजं प्रति	.....	.....
भगिनीं प्रति	.....	.....
मित्रं प्रति	.....	.....
सखीं प्रति	.....	.....
पितामहं प्रति	.....	.....
पितामहीं प्रति	.....	.....

5. कुशलम्

(i) **पत्रस्य प्रारम्भे कुशलनिवेदनम् एवं कुर्मः–**

यथा– अहम् अत्र कुशली।

- भवान् / भवती अपि सकुशलः / सकुशला इति विश्वसिमि / चिन्तयामि।
- अत्र कुशलं / शं तत्र अपि अस्तु।
- ईश्वरस्य कृपया अत्र सर्वे कुशलिनः।
- तत्र सर्वं कुशलं खलु ?

(ii) **पत्रस्य उत्तरे यत् लिखामः तस्य उदाहरणं पठन्तु–**

- भवतः पत्रं प्राप्तम्।
- भवान् संस्कृतं पठति इति ज्ञात्वा अतीव प्रसन्नः अस्मि।
- पत्रस्य उत्तरे विलम्बः जातः। क्षमायाचनां करोमि।
- पत्रं पठित्वा चिन्ता जाता। किमपि निदानाय लिखामि।
- वर्धापनपत्रं प्राप्तवान् / प्राप्तवती। धन्यवादः।

अभ्यासः – 300

रिक्तस्थानानि पूरयन्तु–

पत्रस्य आरम्भे	पत्रस्य उत्तरे
(i) अत्र कुशलं / शं .....।	(i) ..... पत्रं प्राप्तम्।
(ii) अहम् अत्र .....।	(ii) वर्धापनपत्रं .....। .....।
(iii) ईश्वरस्य कृपया .....।	(iii) पत्रस्य उत्तरे .....। .....।
(iv) तत्र सर्वं ..... ?	(iv) पत्रं पठित्वा .....। .....।
(v) भवान् अपि ..... इति चिन्तयामि।	(v) भवतः परीक्षापरिणामं पठित्वा .....।

6. सन्देशः

सन्देशे विविधप्रकारकाणां समाचाराणाम् आदानं प्रदानं च भवति। तद् भवान् स्वयमपि लेखितुं शक्नोति।

7. उपसंहृतिः

✍ पत्रस्य समापने प्रायः लिखामः–

(i) सर्वेभ्यः मम प्रणामाः।

(ii) अनुजाय / अनुजायै आशीर्वादाः।

(iii) कृपया शीघ्रम् एव पत्रोत्तरं प्रेषयन्तु।

(iv) शेषं पुनः लेखिष्यामि।

(v) काले काले पत्रेण स्ववृत्तान्तं सूचयन्तु।

अभ्यासः – 301

1. भवतां मित्रं रुग्णम् अस्ति। पत्रस्य अन्ते भवन्तः किं लेखिष्यन्ति इति शुद्धम् उत्तरं चिह्नितं कुर्वन्तु–

- ◆ शेषं पुनः लेखिष्यामि। ☐
- ◆ कदाचित् पत्रेण स्ववृत्तान्तं सूचयतु। ☐
- ◆ शीघ्रमेव स्वस्वास्थ्यविषये सूचयतु। ☐

2. भवतः विद्यालये वार्षिकी परीक्षा आसीत्। जनकं प्रति भवान् / भवती पत्रं लिखति। परिणामं च सूचयति। अन्ते किं लेखिष्यति / शुद्धम् उत्तरं चिह्नितं करोतु–

- ◆ मम विषये चिन्तां न कुर्वन्तु। ☐
- ◆ पत्रोत्तरं शीघ्रं यच्छन्तु। ☐
- ◆ अहम् अत्र कुशली / कुशलिनी। भवत्कृते स्वास्थ्यम् इच्छामि। ☐

3. भवतः मित्रस्य विवाहः निश्चितः जातः। तं वर्धापयितुं भवान् / भवती छात्रावासतः पत्रं लिखति। पत्रस्य अन्ते कथं समापनं करिष्यति इति शुद्धोत्तरं चिह्नितं करोतु–

- ◆ तस्य दिनस्य उत्सुकतया प्रतीक्षां करोमि। ☐
- ◆ पत्रं पठित्वा अहम् अतीव प्रसन्नः / प्रसन्ना अभवम्। ☐
- ◆ भगवतः कृपया अत्र सर्वं कुशलम्। ☐

8 . प्रेषकस्य परिचयः–

यः पत्रं लिखति, सः स्वपरिचयम् अपि लिखति ततः हस्ताक्षरं करोति।

परिचयं कथं लिखामः ? इति प्रश्ने अधोलिखिततालिकां पठन्तु–

	यं प्रति		प्रेषकस्य परिचयः
(i)	जनकं प्रति / अम्बां प्रति		*भवदीयः पुत्रः* /
		ह0	.....
			भवदीया पुत्री
		ह0	.....
(ii)	मित्रं प्रति		*भवदीयः प्रियसखा* /
		ह0	.....
			भवदीया प्रियसखी
		ह0	.....
(iii)	गुरुं प्रति		*भवताम् आज्ञाकारी शिष्यः* /
		ह0	.....
			भवताम् आज्ञाकारिणी शिष्या
		ह0	.....
(iv)	अनुजं प्रति		*भवतः शुभाकाङ्क्षी* /
		ह0	.....
			भवतः शुभाकाङ्क्षिणी
		ह0	.....
(v)	अग्रजं प्रति		*भवतः अनुजः* / *अनुजा*
		ह0	.....

अभ्यासः – 302

✍ **अधोलिखितान् प्रति परिचयशब्दान् लिखन्तु–**

(i) आचार्यां प्रति .....
रमा

(ii) अम्बां प्रति .....
सुरेशः

(iii) अनुजां प्रति .....
सुकान्ता

(iv) अग्रजं प्रति .....
प्रणवः

(v) जनकं प्रति .....
सुषमा

स्वीकर्तुः पत्रसङ्केतः–

✉ **पत्रसङ्केते अपेक्षितः क्रमः–**

(i) आदरसूचकः शब्दः	श्री / श्रीमान् / श्रीमती / कुमारी
(ii) स्वीकर्तुः नाम	रामस्वरूप वर्मा
(iii) गृहसंख्या / खण्डसंख्या	4
(iv) मार्ग–संख्या	6 (यदि स्यात्)
(v) ग्रामस्य नाम	नाग (यदि स्यात्)
(vi) पत्रालयः	तामली (यदि स्यात्)
(vii) मण्डलस्य नाम	चम्पावतम् (यदि स्यात्)
(viii) प्रदेशस्य नाम	उत्तराञ्चलः
(ix) देशस्य नाम	भारतम् (विदेशात् एव)
(x) पत्रालयकूटसंख्या	☐☐☐☐☐☐

प्रायः नगरेषु ग्रामस्य, पत्रालयस्य मण्डलस्य च नाम न लिखामः। अपितु उपनगरस्य, नगरस्य, प्रदेशस्य नाम एव लिखामः। यदा विदेशात् पत्रं लिखामः तदा देशस्य नाम अपि लिखामः।

अभ्यासः – 303

1. अग्रे लिखितं पत्रसङ्केतं पठन्तु। तदनुसारं यथोचितं रिक्तस्थानानि पूरयन्तु–

श्री रामप्रकाश शुक्लः
40/2, मार्गसंख्या 6,
कैलाशनगरम्,
वृन्दावनम्, मथुरा
उत्तरप्रदेशः | 2 | 8 | 1 | 1 | 2 | 1 |

(i) आदरसूचकः शब्दः .....
(ii) नाम .....
(iii) गृहसंख्या .....
(iv) मार्गसंख्या .....
(v) ग्रामस्य नाम .....
(vi) पत्रालयस्य नाम .....
(vii) मण्डलस्य नाम .....
(viii) उपनगरस्य नाम .....
(ix) नगरस्य नाम .....
(x) प्रदेशस्य नाम .....
(xi) देशस्य नाम .....
(xii) पत्रालयकूटसंख्या .....

2. अत्र किं न पूरितम् अस्ति–
डॉ० महेन्द्रावः .....
प्लाट–संख्या – 65, मार्ग–संख्या – 5,
वेङ्कटरमण कालोनी, नागोल,
रंगारेड्डीमण्डलम्, आन्ध्रप्रदेशः
| | | | | | |

3. अत्र किं त्यक्तम् अस्ति–
श्रीमती कमला भारतीय .....
ग्राम– तिलकपुरः, पत्रालयः– बामदेव बाजार,
मण्डलम्– वाँका ( )
| 8 | 1 | 3 | 1 | 0 | 7 |

4. सुश्री सीमा राव .....
प्लाट–संख्या– 10, ग्रीक्षेम कालोनी,
उड़ीसा

7	5	2	0	0	2

5. श्री .....
छात्रावासः, प्रकोष्ठसंख्या, 40, ...
संस्कृत अकादमी, द्वारका,
जामनगरम्, गुर्जरप्रदेशः

1	3	3	6	3	5

पत्रप्रारूपम्–

✉ **सखीं प्रति दिनचर्याविषये पत्रलेखनम्–**

ॐ

छात्रावासः
जम्मू
विक्रमसंवत्–2058
श्रावणपूर्णिमा
तदनुसारम्
दिनाङ्कः–02/10/01

प्रियसखि विनीते !

सस्नेहं नमस्ते।

अत्र सर्वगतं कुशलम्। भवती अपि स्वस्था इति मम आशा। भवती दिनचर्यां ज्ञातुम् इच्छति। अतः लिखामि।

अत्र अहं पञ्चवादने उत्तिष्ठामि। सार्धपञ्चवादनात् सार्धषड्वादनपर्यन्तं व्यायामं करोमि। अष्टवादनतः अध्यापनं प्रचलति। मध्याह्ने एकवादने भोजनावकाशः। सायं पादोनचतुर्वादने क्रीडामि। सार्धसप्तवादने सन्ध्यादिकं कृत्वा भोजनाय गच्छामि।

दशवादनपर्यन्तं पठामि। अत्र मम सर्वाः अपि सहपाठिन्यः सहयोगेन प्रेमपूर्वकं वसन्ति। अहम् अतीव प्रसन्ना अस्मि। शिक्षकगणाः अपि अस्मासु पितृवत् स्निह्यन्ति। इति शम्।

सर्वेभ्यः नमः। मां न विस्मरतु। यदा कदाचित् पत्रेण वार्तां सूचयतु।

भवदीया प्रियसखी
अवन्तिका

पत्रसङ्केतः
कुमारी स्नेहप्रभा
ई/डी 94, टैगोरगार्डन,
नवदेहली

1	1	0	1	2	7

अभ्यासः – 304

पत्रं पठित्वा अधोलिखितप्रश्नान् उत्तरन्तु–

(i) पत्रं का लिखति ?
(ii) पत्रं कुतः लिखति ?
(iii) यां प्रति पत्रं लिखति सा कुत्र वसति ?
(iv) सा सम्बोधने किं लिखति ?
(v) कुशलसूचकं वाक्यं पुनः लिखत ?
(vi) पत्रे कस्याः वर्णनम् अस्ति ?
(vii) अवन्तिका व्यायामं कदा करोति ?
(viii) छात्रावासे छात्राः मध्याह्ने कदा भोजनं कुर्वन्ति ?
(ix) पत्रस्य अन्ते यत् वाक्यं लिखितं तत् पुनः लिखन्तु।
(x) अवन्तिकायाः सखी कुत्र वसति ?
(xi) पत्रं कस्यां तिथौ लिखितम् ?
(xii) हस्ताक्षरेभ्यः पूर्वं ये परिचयशब्दा लिखिताः तान् अत्र लिखन्तु ?
.....।

✍ **उदाहरणरूपेण अत्र कतिचन उदाहरणानि दत्तानि सन्ति। तानि सम्यक् परिशीलयन्तु–**

1. जनकं प्रति पुत्रः–

।। श्री ।।

विद्यारण्यपुरम्
चैन्नै – 14
02.02.94

परमपूज्यानां पितृचरणानां पादयोः साष्टाङ्गप्रणामाः।

अत्र अहं कुशली। तत्रापि भवन्तः सर्वे कुशलिनः इति भावयामि। अत्र मम अध्ययनं सम्यक् प्रचलति। अर्धवार्षिकी परीक्षा समाप्ता। परिणामः अपि प्रकटितः। सर्वविषयेषु अपि उत्तमाः अङ्काः आगताः सन्ति। गणिते केवलं 70 अङ्कान् प्राप्तवान् अस्मि। अग्रिमकाले गणितार्थम् अधिकम् अवधानं ददामि।

अत्र मम आरोग्यं सम्यक् अस्ति। मम विषये चिन्तां मा कुर्वन्तु। गृहस्य स्मरणं सदा भवति। अत्र मम मित्राणि उत्तमानि सन्ति। तैः सह स्नेहेन आनन्देन च अस्मि।

जनन्यै मम साष्टाङ्गप्रणामाः। भगिन्यै शुभाशीर्वादाः। पत्रं लिखन्तु।

भवदीयः पुत्रः
रविः

2. जनकः पुत्र्यै–

ॐ

लक्ष्मणपुरी
14.09.97

प्रिये वत्से !

अनेके शुभाशयाः।

मन्ये भवती कुशलिनी इति। भवत्याः गृहे सर्वे कुशलिनः खलु ? भवत्याः जननी सर्वदा भवतीं स्मरति। भवत्याः पुत्रस्य परीक्षा कदा भविष्यति ? ग्रीष्मविरामस्य आरम्भः कदा भविष्यति ? विरामावसरे भवती पुत्रेण सह अत्र आगच्छतु। भवत्याः सख्यः अपि भवतीं बहु स्मरन्ति। भवत्याः श्वशुरस्य आरोग्यम् इदानीं कथम् अस्ति ? तस्मै मम नमस्कारान् सूचयतु। अन्यत् सर्वं कुशलम्। गृहे सर्वेभ्यः मम नमस्काराः। सौरभाय शुभाशिषः।

भवदीयः पिता
रामप्रकाशः

3. पतिः पत्न्यै –

।। श्रीमात्रे नमः ।।

हरिद्वारम्
माघ–शुद्धद्वादशी

प्रियश्रीमत्यै,

अद्य भवत्याः पत्रं प्राप्तवान्। अहं कुशली एव। भवन्तः सर्वे कुशलिनः इति भावयामि। मम कार्यालयस्य कार्यं सम्यक् प्रचलति। अहं प्रतिदिनं नूतनान् अनुभवान् प्राप्नोमि। भवत्याः स्मरणं सर्वदा भवति। अत्रत्यं मम कार्यं अस्मिन् सप्ताहे न भवेत् इति भाति। अहं प्रायशः अग्रिमरविवासरे गृहम् आगमिष्यामि। राहुलस्य जन्मदिने अवश्यं तत्र भविष्यामि इति तं वदतु। माता समये औषधादिकं स्वीकरोति खलु ? तस्याः विषये भवती अवधानं ददाति इति मम विश्वासः अस्ति। राहुलः यत् पुस्तकम् इष्टवान् तत् क्रीतवान् अस्मि। अन्यत् सर्वं कुशलम्। भवत्याः स्वास्थ्यविषये निर्लक्ष्यं न करोतु।

भवदीयः
हरीशः

4. मित्रस्य पत्रस्य उत्तरम्–

।। जय श्रीराम ।।

भोपाल

04.06.95

प्रिय वरुण !

अहम् अत्र कुशली। भवतः पत्रं दृष्ट्वा मम महान् सन्तोषः जातः। भवान् तरणस्पर्धायां सुवर्णपदकं प्राप्तवान् इति ज्ञात्वा महान् सन्तोषः जातः। सफलतायै अभिनन्दनम्। तरणाभ्यासः सम्यक् प्रचलति खलु। किं रे। पूर्वं भवान् मीनः आसीत् वा ? भवान् सम्यक् परिश्रमं करोति फलमपि प्राप्नोति अतः मम बहु आनन्दः अभवत्। गृहे सर्वे कथं सन्ति ? मम जननी भवन्तं बहु स्मरति। विरामकाले भवन्तम् आगन्तुं सूचितवती अस्ति। अन्यत् सर्वं कुशलम्। पत्रं लिखीत खलु।

भवदीयः स्नेहाङ्कितः
प्रदीपः

अभ्यासः – 305

✍ **अधोलिखितशब्दान् उचिते स्तम्भे पूरयन्तु–**

जय श्रीरामः	शुभाशयाः	आदरणीय गुरो !	कथमस्ति भवान्?	नमस्काराः,
ॐ	भूयांसि नमांसि	सादरं वन्दे	14.12.82	प्रिय शिष्य
सादरं वन्दे	धन्यवादा	श्रीः	इति भवदीया	राकेशः
5.6.97	श्रीगुरुभ्यो नमः	आत्मीये लते	चन्द्रपालः	प्रिय मित्र !
गोरखपुरम्	प्रिय अम्ब	आदरपूर्वकाः प्रणामाः	शशाङ्कः	जनन्यै नमः
इति प्रियमित्रम् ।	पटना			

शीर्षिका	सम्बोधनम्	अभिवादनम्	समाप्तिः	हस्ताङ्कनम्

अभ्यासः – 306

✍ **पत्रस्य विषयं पठित्वा शीर्षक–सम्बोधन–समाप्त्यादिकम् विचारयन्तु–**

.....

.....

.....,

.....

कथमस्ति भवान् ? मां स्मरति खलु। मम अम्बा सर्वदा गिरीशस्य पत्रम् आगतं न वा ? इति पृच्छति। भवतः पठनं कथं प्रचलति ? देहल्याः वातावरणं भवान् जानात्येव। इदानीं बहु शैत्यम् अस्ति। अत एव प्रातः शीघ्रं न उत्तिष्ठामि। परश्वः (18–09–94) मम विद्यालये भाषणस्पर्धा भविष्यति / अहम् अपि भागं ग्रहीष्यामि। 'अरुण ! उत्तिष्ठतु' इति दशवारम् अम्बा माम् आह्वयति। अहम् तदनन्तरमेव उत्तिष्ठामि। भवतः स्नेहमयव्यवहारं सर्वदा स्मरामि। भवादृशमित्राणि विरलतया एव लभ्यन्ते। अन्यत् सर्वं कुशलम्। भवतः मातापितृभ्यां मम नमस्काराः। पत्रं लिखतु।

.....

.....

शुभाशयाः

दीपावली शुभाशयाः

❖ दीपावली भवतां जीवने उन्नत्याः
समृद्धेः प्रकाशं पूरयतु।

❖ शुभं करोतु कल्याणमारोग्यं धनसम्पदः।
शत्रुबुद्धिविनाशाय दीपज्योतिर्नमोऽस्तु ते।

❖ दीपज्योतिः परं ब्रह्म दीपज्योतिर्जनार्दनः।
दीपो हरतु मे पापं दीपज्योतिर्नमोऽस्तु ते।।

युगादिशुभाशयाः

❖ नववर्षं नवचैतन्यं ददातु।

❖ भूयात् नूतनवत्सरः शिवमयः शान्तिप्रदः श्रीमताम्।

❖ भवतां नववर्षम् उल्लासपूर्णं भवेत्।

❖ सफलतायै अभिनन्दनम्।

❖ शतं जीव शरदो वर्धमानः।

❖ पुत्रोत्पत्तौ वर्धापनानि।

❖ भवतोः दाम्पत्यजीवनं सुखमयं भूयात्।

❖ मकरसङ्क्रान्तिशुभाशयाः।

❖ होलिकोत्सवस्य शुभकामनाः।

❖ रक्षाबन्धनोत्सवे हार्दिक्यः शुभकामनाः।

❖ संस्कृतदिवसस्य शुभाशयाः।

❖ नित्यं प्रीतिकराः भवन्तु भवतां
सर्वेऽनुकूला ग्रहाः।

❖ 'ईद' उत्सवस्य शुभाशयाः।

❖ किस्मस' दिवसस्य हार्दिकी शुभकामना।

❖ सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।

❖ शुभाः ते सन्तु पन्थानः।

❖ भवदीयः समारम्भः यशस्वी भवतु।

❖ करोतु भव्यं भवतां रमेशः।

6.4.2 व्यावसायिककार्यालयीय–पत्राणि

✉ भवन्तः इदानीं व्यक्तिगतपत्राणि लेखितुं जानन्ति। कानिचित् पत्राणि व्यावसायिकानि कार्यालयीयानि वा भवन्ति।

यथा– क. पुस्तकविक्रेतारं प्रति पुस्तकक्रयणार्थम्।

ख. दूरदर्शनस्य निदेशकं प्रति संस्कृतनाटकानां प्रसारणार्थम्।

ग. पत्रिकासम्पादकं प्रति ग्राहकतायै।

घ. समाचारपत्रस्य सम्पादकं प्रति, उद्यानस्य दुरवस्थापरिहाराय।

ङ. प्रधानाचार्यं / प्रधानाचार्यां प्रति अवकाशस्य स्वीकरणाय। इत्यादयः।

📖 ध्यानेन पठन्तु–

पत्रप्रारूपम्

द्वारा–

विष्णुकान्त मिश्रः
कक्षसंख्या – 7, छात्रावासः,
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
जगतगंजः
वाराणसी, उत्तरप्रदेशः
पत्राचारकूटसंख्या – 221 002

सेवायाम्,

मान्यवर निदेशकमहोदय,
राष्ट्रिय संस्कृत संस्थानम्
56 – 57, इन्स्टीट्यूशनल एरिया,
डी ब्लाक, जनकपुरी, नवदेहली – 110 011

विषयः– संस्थानेन प्रकाशितानां संस्कृतशिक्षणपुस्तकानां क्रयणसन्दर्भे

महोदय,

राष्ट्रिय-संस्कृत-संस्थानेन प्रकाशितां संस्कृतशिक्षणपुस्तकमालाम् अहं क्रेतुम् इच्छामि। कृपया सम्पूर्णपाठ्यक्रमस्य प्रतिकृतिद्वयं वी० पी० पी० द्वारा प्रेषयितुं व्यवस्थां कुर्वन्तु इति निवेदयति।

सधन्यवादम्

भवदीयः

.....

(विष्णुकान्त मिश्रः)

वाराणसी
02.10.2001

पत्रसङ्केतः

सेवायाम्,

.....
.....
..... | | | | | | |

द्वारा–

.....
.....
..... | | | | | | |

व्यावसायिक / कार्यालयीयपत्र–प्रारूपम्

सकाशात्,

.....

.....

.....

.....

I. लेखकस्य सङ्केतः

सविधे,

.....

.....

.....

.....

II. स्वीकर्तुः सङ्केतः

विषयः– .....

III. विषयनाम

.....,

IV. सम्बोधनम्

.....

.....

.....

.....।

V. प्रतिपाद्यः विषयः

VI. उपसंहारः

.....

.....

VII. हस्ताङ्कनं पदं च

.....

.....

.....

.....

.....

VIII. स्थलम्, दिनाङ्कः

I. पत्रस्य आदौ उपरितनभागे पत्रलेखकस्य सङ्केतः लेखनीयः भवति। लेखकस्य पदनिर्देशः अपि कृतः चेत् उत्तमम्।

II. स्वीकर्तुः सङ्केतः लेखकस्य सङ्केतस्य अधोभागे भवति। स्वीकर्तुः नामलेखनम् अनिवार्यं न। पदोल्लेखः अवश्यं करणीयः भवति।

III. स्वीकर्तुः सङ्केतस्य अधोभागे विषयनाम इति भागः भवति। तत्र यस्मिन् विषये पत्रं लिख्यमानम् अस्ति एकवाक्येन सः विषयः लिखितः भवति।

IV. पत्रस्वीकर्तुः पदम् उल्लिख्य तस्य सम्बोधनं भवति।

यथा– सम्पादकमहाशय,
माननीय – प्रधानमन्त्रिमहोदय,
आदरणीय – निदेशक महोदय
मान्याः

V. विषयभागे साक्षात् विषयस्य उपस्थापनं भवति। कुशलप्रश्नादिकं वैयक्तिकपत्रे न भवति।

VI. उपसंहारः इति भागे सामान्यतः 'भवदीयः भवदीया इत्यादयः भवन्ति।

VII. हस्ताङ्कनस्थाने हस्ताङ्कनेन सह पदनिर्देशः अपि भवति।

VIII. अधः वामभागे स्थलनिर्देशः भवति। तस्य एव अधः पत्रप्रेषणस्य दिनाङ्कः अपि भवति।

कार्यालयीयं पत्रम्

विरामार्थं प्राचार्याय प्रार्थना पत्रम्

सकाशात्,
रामप्रसादशर्मा
संस्कृताध्यापकः
पाणिनिसंस्कृतमहाविद्यालयः,
गोरक्षपुरम्

सविधे,
प्राचार्यः
पाणिनिसंस्कृतमहाविद्यालयः
गोरक्षपुरम्

विषयः– भगिन्याः विवाहार्थं दिनद्वयस्य विरामाय प्रार्थना

आदरणीय प्राचार्यमहोदय,

मम भगिन्याः विवाहः 18–08–96 दिनाङ्के भविष्यति। तस्मिन् कार्यक्रमे मम उपस्थितिः अनिवार्या अस्ति इति कारणतः 17, 18 च दिनयोः अहं विद्यालये उपस्थातुं न शक्ष्यामि। अतः 17, 18 दिनद्वयं विरामं यच्छतु इति निवेदयति।

भवदीयः विधेयः
रामप्रसादशर्मा
(संस्कृताध्यापकः)

गोरक्षपुरम्
15–08–96

पत्रिकासम्पादकाय।

सम्पादकः,
'सम्भाषणसन्देशः' मासपत्रिका
बेङ्गलूरू – 25

मान्याः,

प्रतिमासं सम्भाषणसन्देशं पठामि। गतमासस्य पत्रिकायां प्रकटीकृतं **'सारस्वतीयं खलु सिन्धुसंस्कृतिः'** इति लेखः बहु उत्तमः अस्ति। एषः लेखः इतिहासस्य पुनश्चिन्तनाय मनसः प्रवर्तनं करोति। ईदृशान् लेखान् सर्वदा अधिकाधिकं प्रकाशयन्तु इति निवेदयामि।

भवदीयः
रामचन्द्रः
इन्दौर (मध्यप्रदेशः)

अभ्यासः – 307

अधोलिखितविषयान् अधिकृत्य पत्राणि लिखन्तु।

1. जनकः पुत्रं प्रति– परीक्षा सन्निहिता अस्ति। 'परीक्षार्थं कथं पूर्वसज्जा करणीया' इत्यस्मिन् विषये जनकः मार्गदर्शनं करोति। पठनार्थम् अवधातव्यान् अंशान् ज्ञापयति।

2. पुत्री जनकं प्रति– पुत्री गृहे वसति। तत्रत्यां दिनचर्यां विवृत्य जननीं प्रति पत्रं लिखति। नूतनाभिः सखीभिः सह प्राप्तान् अनुभवान् जनन्यै लिखति।

3. सहोदरः सहोदरीं प्रति– जनकस्य अस्वास्थ्यविषये सहोदरः सहोदर्यै पत्रं लिखति। किं जातम् आसीत्? किं कृतम्? तस्य स्थितिः कथम् अस्ति' इत्यादिकं विवृत्य एकवारम् आगत्य मिलतु इति सूचयति।

4. पुत्री जनकाय– पुत्रस्य जन्मदिनोत्सवः निश्चितः। दिनाङ्कादिकं संसूच्य जनकं जननीं च शीघ्रम् आगन्तुं प्रार्थयति।

5. सखी सखीं प्रति– ग्रामस्य वातावरणं विवृत्य विरामसमये स्वग्रामम् आगन्तुं प्रेरयति।

6. प्रथमस्थानं प्राप्तवते मित्राय– कौशिकाय, सत्यजित् अभिनन्दनपुरस्सरं पत्रं प्रेषयति।

7. दीपावलीशुभाशयान् संसूच्य अग्रजाय– सुमन्त्रः पत्रं प्रेषयति।

8. पत्रिकासम्पादकाय– कश्चित् लेखकः लेखं सम्प्रेष्य प्रकाशनार्थं निवेदयति।

9. दूरदर्शनकेन्द्रतः प्रसारितस्य संस्कृतनाटकस्य प्रशंसां कृत्वा निदेशकाय– कश्चित् संस्कृतप्रेमी पत्रं लिखति।

10. जलमण्डल्यै– जलपूरणव्यवस्थायां जातस्य विघ्नस्य निवारणार्थं श्रीनिवासनगरस्य जनाः निवेदनं कुर्वन्ति।

★★★

Teach Yourself Samskrit

पञ्चमी दीक्षा
व्युत्पादिनी

चतुर्थी दीक्षा
काव्यावगाहनी

तृतीया दीक्षा
काव्यावतरणी

द्वितीया दीक्षा
व्यवहारावगाहनी

प्रथमा दीक्षा
व्यवहारावतरणी

संस्कृत स्वाध्यायः

राष्ट्रिय संस्कृत संस्थानम्
नव देहली